CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओ३म्

यजुर्वेद संहिता

(वायुमहर्षौ प्रकटीभूता)

प्रकाशक

हरयाणा साहित्य संस्थान

गुरुकुल झज्जर, रोहतक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

SCANNED

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओ३म्

यजुर्वेद संहिता

(वायुमहर्षौ प्रकटीभूता)

प्रकाशक
हरयाणा साहित्य संस्थान
गुरुकुल झज्जर, रोहतक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकाशक :—

हरयाणा साहित्य संस्थान

गुरुकुल झज्जर, रोहतक

प्रथम संस्करण २०००

सृष्टिवेदसंवत् १९६०८५३०८९

कलियुग संवत् ५०८९

विक्रमसंवत् २०४५

मूल्य ६०/– रूपये

मुद्रक -

जैयद प्रेस

बल्लीमारान, दिल्ली-६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओ३म्

यजुर्वेदसंहिता

अथ प्रथमोऽध्यायः

अध्यायः १ ; अनुवाकौ १-२, मन्त्रौ १-२

ऋषिः—परमेष्ठी प्रजापतिः १—३१ ॥

देवता—सविता १, ३, १०, २०, २५, २६ । यज्ञः २, ७, १४, १५, २१, २७—३१ । विष्णुः ४, ६ । अग्निः ५, ८, ११, १७—१९, २३ । प्रजापतिः ६ । अप्सवितारौ १२ । इन्द्रः[उ], अग्निः[क], यज्ञः[र] १३ । वायुः[क], सविता[र] १६ । यज्ञः[क], अग्निसवितारौ[र] २२ । द्यौविद्युतौ २४ ॥

छन्दः—स्वराड्बृहती[क], ब्राह्म्युष्णिक्[र] १ । स्वराडार्षीत्रिष्टुप् २ । भुरिग्जगती ३ । अनुष्टुप् ४ । आर्चीत्रिष्टुप् ५ । आर्चीपङ्क्तिः ६ । प्राजापत्याजगती ७ । निचृदतिजगती ८ । निचृत्त्रिष्टुप् ९ । भुरिग्बृहती १० । स्वराड्जगती ११, १४ । भुरिगत्यष्टिः १२ । निचृदुष्णिक्[उ], भुरिगार्चीगायत्री[क], भुरिगुष्णिक्[र] १३ । निचृज्जगती[क], याजुषीपङ्क्तिः[र] १५ । स्वराड्ब्राह्मीत्रिष्टुप्[क], विराड्गायत्री[र] १६ । निचृद्ब्राह्मीपङ्क्तिः १७ । ब्राह्मीउष्णिक्,[उ] आर्चीत्रिष्टुप्[क], आर्चीपङ्क्तिः[र] १८ । निचृद्ब्राह्मीत्रिष्टुप् १९ । विराड्ब्राह्मीत्रिष्टुप् २०, २५ । गायत्री[क], निचृत्पङ्क्तिः[र] २१ । स्वराट्त्रिष्टुप्[क], गायत्री[र] २२ । बृहती २३ । स्वराड्ब्राह्मीपङ्क्तिः २४ । स्वराड्ब्राह्मीपङ्क्तिः[क], भुरिग्ब्राह्मीपङ्क्तिः[र] २६ । ब्राह्मीत्रिष्टुप् २७ । विराड्ब्राह्मीपङ्क्तिः २८ । त्रिष्टुप्[क], [र], २९ । निचृज्जगती ३० । जगती[क], अनुष्टुप्[र] ३१ ।

स्वरः—मध्यमः[क], ऋषभः[र] १ । धैवतः २, ५, ९, १९, २०, २५, २७ । निषादः ३, ७, ८, ११, १४, ३० । गान्धारः ४, १२ । पञ्चमः ६, १७, २४, २६, २८ । मध्यमः १०, २३ । ऋषभः[उ], [र], षड्जः[क] १३ । निषादः[क], पञ्चमः[र] १५ । धैवतः[क], षड्जः[र] १६ । ऋषभः[उ], धैवतः[क], पञ्चमः[र] १८ । षड्जः[क], पञ्चमः[र] २१ । धैवतः[क], षड्जः[र] २२ । धैवतः[क], [र], २९ । निषादः[क], गान्धारः[र] ३१ ॥

अनुवाकः

॥१॥ इषे त्त्वोर्ज्जे त्त्वा व्वायव स्त्थ देवो वः सविता प्प्रार्प्पयतु श्श्रेष्ठतमाय कर्म्मणऽआप्प्या-
यद्ध्वमघ्न्याऽइन्द्राय भागम्प्रजावतीरनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माघशꣳसो
ध्रुवाऽअस्मिन्गोपतौ स्यात बह्वीर्य्यजमानस्य पशून्पाहि ॥१॥

॥२॥ वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्श्वनो घर्म्मोऽसि व्विश्श्वधाऽअसि ।
परमेण धाम्म्ना दृꣳहस्व मा ह्वार्म्मा ते यज्ञपतिर्ह्वार्षीत् ॥२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वसोः पवित्रमसि शतधारँवसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्प्वा कामधुक्षः ॥३॥
सा विश्वायुः सा विश्वकर्म्मा सा विश्वधायाः ।
इन्द्रस्य त्वा भागꣳ सोमेनातनच्मि विष्णो हव्यꣳ रक्ष ॥४॥

॥३॥ अग्ने व्रतपते व्रतञ्चरिष्ष्यामि तच्छकेयन्तन्मे राध्यताम् ।
इदमहमनृतात्सत्त्यमुपैमि ॥५॥
कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति ।
कर्म्मणे वाँवेषाय वाम् ॥६॥
प्रत्युष्टꣳ रक्षः प्प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्प्ताऽअरातयः ।
उर्व्वन्तरिक्षमन्वेमि ॥७॥
धूरसि धूर्व्व धूर्व्वन्तन्धूर्व्व तँय्योस्म्मान्धूर्व्वति तन्धूर्व्व यँवयन्धूर्व्वामः ।
देवानामसि वह्नितमꣳ सस्निनतमम्पप्रितमञ्जुष्टतमन्देवहूतमम् ॥८॥
अह्रुतमसि हविर्द्धानन्दृꣳहस्व मा ह्वार्म्मा ते यज्ञपतिर्ह्वार्षीत् ।
विष्ण्णुस्त्वा क्क्रमतामुरु वातायापहतꣳ रक्षो यच्छन्तामपञ्च ॥९॥
देवस्य त्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुभ्याम्पूष्ण्णो हस्ताभ्याम् ।
अग्नये जुष्टङ्गृह्णाम्म्यग्नीषोमाभ्याञ्जुष्टङ्गृह्णामि ॥१०॥
भूताय त्वा नारातये स्वरभिविक्ख्येषन्दृꣳहन्तान्दुर्य्याः पृथिव्यामुर्व्वन्तरिक्षमन्वेमि
पृथिव्यास्त्वा नाभौ सादयाम्म्यदित्याऽउपस्थेग्ने हव्यꣳ रक्ष ॥११॥

॥४॥ पवित्रे स्त्थो वैष्ण्णव्यौ सवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्रेण पवित्रेण सूर्य्यस्य
रश्मिभिः । देवीरापोऽअग्रेगुवोऽअग्रेपुवोग्रऽइममद्य यज्ञन्नयताग्रे यज्ञपतिꣳ
सुधातुँय्यज्ञपतिन्देवयुवम् ॥१२॥
युष्म्माऽइन्द्रोवृणीत वृत्रतूर्य्ये यूयमिन्द्रमवृणीध्वँवृत्रतूर्य्ये प्प्रोक्षिता स्त्थ ।
अग्नये त्वा जुष्टम्प्रोक्षाम्म्यग्नीषोमाभ्यान्त्वा जुष्टम्प्रोक्षामि ।
दैव्याय कर्म्मणे शुन्धद्ध्वन्देवयज्ज्यायै यद्वोशुद्धाः पराजग्घ्नुरिदँवस्तच्छुन्धामि ॥१३॥

॥५॥ शर्म्मास्यवधूतꣳ रक्षोवधूताऽअरातयोदित्त्यास्त्वगसि प्प्रति त्वादितिर्व्वेत्तु ।
अद्रिरसि वानस्प्पत्त्यो ग्ग्रावासि पृथुबुध्नः प्प्रति त्वादित्त्यास्त्वग्वेत्तु ॥१४॥
अग्नेस्तनूरसि वाचो विसर्ज्जनन्देववीतये त्वा गृह्णामि बृहद्ग्रावासि वानस्प्पत्त्यः
सऽइदन्देवेभ्यो हविः शमीष्ष्व सुशमि शमीष्ष्व । हविष्कृदेहि हविष्कृदेहि ॥१५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कुक्कुटोसि मधुजिह्वऽइषमूर्ज्जमावद त्वया वयꣳ सङ्घातꣳसङ्घातञ्जेष्म वर्षवृद्धमसि
प्प्रति त्वा वर्षवृद्धँवेत्तु परापूतꣳ रक्षः परापूताऽअरातयोपहतꣳ रक्षो वायुर्वो
विविनक्तु देवो वः सविता हिरण्यपाणिः प्प्रति गृब्भ्णात्त्वच्छिद्रेण पाणिना ॥१६॥

॥६॥ धृष्टिरस्यपाग्नेऽअग्निमामादञ्जहि निष्क्रव्यादꣳ सेधा देवयजँवह । ध्रुवमसि पृथिवी-
न्दृꣳह ब्रह्मवनि त्वा क्षत्रवनि सजातवन्न्युपदधामि ब्भ्रातृव्यस्य वधाय ॥१७॥

अग्ने ब्रह्म गृब्भ्णीष्व धरुणमस्यन्तरिक्षन्दृꣳह ब्रह्मवनि त्वा क्षत्रवनि
सजातवन्न्युपदधामि ब्भ्रातृव्यस्य वधाय । धर्त्रमसि दिवन्दृꣳह ब्रह्मवनि त्वा
क्षत्रवनि सजातवन्न्युपदधामि ब्भ्रातृव्यस्य वधाय । विश्वाब्भ्यस्त्वाशाब्भ्यऽउप-
दधामि चित स्त्थोर्द्ध्वचितो भृगूणामङ्गिरसान्तपसा तप्प्यद्ध्वम् ॥१८॥

॥७॥ शर्म्मास्यवधूतꣳ रक्षोवधूताऽअरातयोदित्त्यास्त्वगसि प्प्रति त्वादितिर्वेत्तु । धिष-
णासि पर्व्वती प्प्रति त्वादित्त्यास्त्वग्वेत्तु दिव स्कम्भनीरसि धिषणासि पार्वतेयी प्प्रति
त्वा पर्व्वती वेत्तु ॥१९॥

धान्न्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्व्यानाय त्वा । दीर्ग्घामनु
प्प्रसितिमायुषे धान्देवो वः सविता हिरण्यपाणिः प्प्रतिगृब्भ्णात्त्वच्छिद्रेण पाणिना
चक्क्षुषे त्वा महीनाम्पयोसि ॥२०॥

॥८॥ देवस्य त्वा सवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम् ।
सँवपामि समापऽओषधीभिः समोषधयो रसेन ।
सꣳ रेवतीर्ज्जगतीभिः पृच्यन्ताꣳ सम्मधुमतीर्म्मधुमतीभिः पृच्यन्ताम् ॥२१॥

जनयत्त्यै त्वा सँय्यौमीदमग्नेरिदमग्नीषोमयोरिषे त्वा घर्म्मोसि विश्वायुरुरुप्प्रथाऽउरु
प्प्रथस्वोरु ते यज्ञपतिः प्प्रथतामग्निष्टे त्वचम्मा हिꣳसीद्देवस्त्वा सविता श्श्रपयतु
वर्षिष्ठेधि नाके ॥२२॥

मा भेर्म्मा सँविक्क्थाऽअतमेरुर्य्यज्ञोतमेरुर्य्यजमानस्य प्प्रजा भूयात्त्रिताय त्वा द्विताय
त्त्वैकताय त्वा ॥२३॥

॥९॥ देवस्य त्वा सवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम् । आददेद्ध्वरकृत-
न्देवेब्भ्यऽइन्द्रस्य बाहुरसि दक्क्षिणः सहस्रभृष्टिः शततेजा वायुरसि तिग्ग्मतेजा
द्विषतो वधः ॥२४॥

पृथिवि देवयजन्न्योषद्ध्यास्ते मूलम्मा हिꣳसिषँव्व्रजङ्गच्छ गोष्ठानँवर्षतु ते द्यौर्बधान

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देव सवितः परमस्याम्पृथिव्याꣳ शतेन पाशैर्य्योऽस्मान्द्वेष्टि यञ्च व्वयन्द्विष्म्मस्तमतो मा मौक् ॥२५॥

[क] अपाररुम्पृथिव्यै देवयजनाद्वध्यासँव्व्रजङ्गच्छ गोष्ठानँव्वर्षतु ते द्यौर्ब्बधान देव सवितः परमस्याम्पृथिव्याꣳ शतेन पाशैर्य्योऽस्मान्द्वेष्टि यञ्च व्वयन्द्विष्म्मस्तमतो मा मौक् । [र] अररो दिवम्मा पप्तो द्रप्स्सस्ते द्याम्मा स्कन्व्रजङ्गच्छ गोष्ठानँव्वर्षतु ते द्यौर्ब्बधान देव सवितः परमस्याम्पृथिव्याꣳ शतेन पाशैर्य्योऽस्मान्द्वेष्टि यञ्च व्वयन्द्विष्म्मस्तमतो मा मौक् ॥२६॥

गायत्रेण त्वा च्छन्दसा परिगृह्णामि त्रैष्टुभेन त्वा च्छन्दसा परिगृह्णामि जागतेन त्वा च्छन्दसा परिगृह्णामि । सुक्ष्मा चासि शिवा चासि स्योना चासि सुषदा चास्यूर्जस्वती चासि पयस्वती च ॥२७॥

पुरा क्क्रूरस्य व्विसृपो व्विरप्प्शिन्नुदादाय पृथिवीञ्जीवदानुम् । यामैरयँश्चन्द्रमसि स्वधाभिस्तामु धीरासोऽअनुदिश्य यजन्ते । प्रोक्षणीरासादय द्विषतो व्वधोसि ॥२८॥

॥१०॥ [क] प्रत्युष्टꣳ रक्षः प्प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ताऽअरातयः । अनिशितोसि सपत्नक्षिद्वाजिनन्त्वा व्वाजेध्यायै सम्मार्ज्मि । [र] प्रत्युष्टꣳ रक्षः प्प्रत्युष्टाऽअरातयो निष्टप्तꣳ रक्षो निष्टप्ताऽअरातयः । अनिशितासि सपत्नक्षिद्वाजिनीन्त्वा व्वाजेध्यायै सम्मार्ज्मि ॥२९॥

अदित्यै रास्नासि व्विष्णोर्व्वेष्प्पोस्यूर्जे त्वादब्धेन त्वा चक्क्षुषावपश्यामि । अग्नेर्जिह्वासि सुहूर्द्देवेभ्यो धाम्नेधाम्ने मे भव यजुषेयजुषे ॥३०॥

[क] सवितुस्त्वा प्प्रसवऽउत्पुनाम्म्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । सवितुर्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । [र] तेजोसि शुक्क्रमस्यमृतमसि धाम नामासि प्प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥३१॥

इति प्रथमोऽध्यायः ॥

अथ द्वितीयोऽध्यायः

ऋषिः--परमेष्ठी प्रजापतिः १--१६, १८--२० । देवलः १७ । वामदेवः २१--३४ ॥

देवता—यज्ञः १, २, ५ । अग्निः ३, ४, ७, ९, १४, १७, २७- ३० । विष्णुः ६, ८, २५ । इन्द्रः १०, २२ । द्यावापृथिवी ११ । सविता १२ । बृहस्पतिः १३ । अग्नीषोमौ[क], इन्द्राग्नी[र] १५ । द्यावापृथिवी मित्रावरुणौ च[क], अग्निः[र] १६ । विश्वेदेवाः १८ । अग्निवायू १९ । अग्निसरस्वत्यौ २० । प्रजापतिः २१, २३ । त्वष्टा २४ । ईश्वरः २६ । पितरः ३१--३३ । आपः ३४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छन्दः—निचृत्पङ्क्तिः १ । स्वराड्जगती २ । भुरिगार्चीत्रिष्टुप्[उ], भुरिगार्चीपङ्क्तिः[क], पङ्क्तिः[र] ३ । निचृद्गायत्री ४, ३३ । निचृद्ब्राह्मीबृहती ५ । ब्राह्मीत्रिष्टुप्[क], निचृत्त्रिष्टुप्[र] ६ । बृहती ७ । विराड्ब्राह्मीपङ्क्तिः ८ । जगती ९, भुरिग्ब्राह्मीपङ्क्तिः १० । ब्राह्मीबृहती ११ । भुरिग्बृहती १२ । विराड्जगती १३ । अनुष्टुप्[क], भुरिगार्ची गायत्री[र] १४ । ब्राह्मीबृहती[क], निचृदतिजगती[र] १५ । भुरिगार्चीपङ्क्तिः[क], भुरिक्त्रिष्टुप्[र] १६ । निचृज्जगती १७ । स्वराट्त्रिष्टुप् १८ । भुरिक्पङ्क्तिः १९, ३० । भुरिग्ब्राह्मीत्रिष्टुप् २० । भुरिग्ब्राह्मीबृहती २१ । विराट्त्रिष्टुप् २२, २४ । निचृद्बृहती २३ । निचृदार्चीपङ्क्तिः[उ], आर्चीपङ्क्तिः[क], भुरिग्जगती[र] २५ । उष्णिक् २६ । निचृत्पङ्क्तिः[क], गायत्री[र] २७ । भुरिगुष्णिक् २८, ३४ । स्वराडार्षी अनुष्टुप् २९ । बृहती ३१ । ब्राह्मीबृहती[क], निचृद्बृहती[र] ३२ ॥

स्वरः—पञ्चमः १, ८, १०, १९, ३० । निषादः २, ९, १३, १७ । धैवतः[उ], पञ्चमः[क], [र] ३ । षड्जः ४, ३३ । मध्यमः ५, ७, ११, १२, २१, २३, ३१, ३२ । धैवतः ६, १८, २०, २२, २४ । गान्धारः[क], षड्जः[र] १४ । मध्यमः[क], निषादः[र] १५ । पञ्चमः[क], धैवतः[र] १६ । पञ्चमः[उ], [क], निषादः[र], २५ । ऋषभः २६, २८, ३४ । पञ्चमः[क], षड्जः[र] २७ । गान्धारः २९ ।

॥१॥ कृष्णोस्याखरेष्ठोग्नये त्वा जुष्टम्प्रोक्षामि वेदिरसि बर्हिषे त्वा जुष्टाम्प्रोक्षामि
बर्हिरसि स्रुग्भ्यस्त्वा जुष्टम्प्रोक्षामि ॥१॥
अदित्यै व्युन्दनमसि विष्णो स्तुपोस्यूर्णम्म्रदसन्त्वा स्तृणामि स्वासुस्थान्देवेभ्यो
भुवपतये स्वाहा भुवनपतये स्वाहा भूतानाम्पतये स्वाहा ॥२॥
[उ]गन्धर्वस्त्वा विश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्यग्निरिड
ऽईडितः । [क]इन्द्रस्य बाहुरसि दक्षिणो विश्वस्यारिष्ट्यै यजमानस्य परिधिरस्य-
ग्निरिडऽईडितः । [र]मित्रावरुणौ त्वोत्तरतः परिधत्तान्ध्रुवेण धर्म्मणा विश्वस्यारिष्ट्यै
यजमानस्य परिधिरस्यग्निरिडऽईडितः ॥३॥
वीतिहोत्रन्त्वा कवे द्युमन्तꣳ समिधीमहि । अग्ने बृहन्तमध्वरे ॥४॥
समिदसि सूर्य्यस्त्वा पुरस्तात्पातु कस्याश्चिदभिशस्त्यै । सवितुर्ब्बाहू स्थऽऊर्णम्म्रद-
सन्त्वा स्तृणामि स्वासुस्थन्देवेभ्यऽआ त्वा वसवो रुद्राऽआदित्याः सदन्तु ॥५॥
[क]घृताच्यसि जुहूर्न्नाम्ना सेदम्प्रियेण धाम्ना प्रियꣳ सदऽआसीद घृताच्यस्युपभृ-
न्नाम्ना सेदम्प्रियेण धाम्ना प्रियꣳ सदऽआसीद घृताच्यसि ध्रुवा नाम्ना सेदम्प्रियेण
धाम्ना प्रियꣳ सदऽआसीद [र]प्रियेण धाम्ना प्रियꣳ सदऽआसीद । ध्रुवाऽअसद-
न्नृतस्य योनौ ता विष्णो पाहि पाहि यज्ञम्पाहि यज्ञपतिम्पाहि माँय्यज्ञ-
न्यम् ॥६॥
॥२॥ अग्ने वाजजिद्वाजन्त्वा सरिष्यन्तँवाजजितꣳ सम्मार्ज्मि । नमो देवेभ्यः स्वधा
पितृभ्यः सुयमे मे भूयास्तम् ॥७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्कन्नमद्य देवेब्भ्यऽआज्ज्यꣳ सम्भ्रियासमङ्घ्रिणा व्विष्ष्णो मा त्वावक्क्रमिषँव्वसु-
मतीमग्ग्ने ते च्छायामुपस्त्थेषँव्विष्ष्णो स्त्थानमसीतऽइन्द्रो व्वीर्य्यमकृणोदूर्द्ध्वोऽद्ध्वरऽआ-
स्त्थात् ॥८॥

अग्ग्ने व्वेर्होत्रँव्वेर्द्दूत्त्यमवतान्त्वान्द्यावापृथिवीऽअव त्वन्द्यावापृथिवी स्विष्टकृद्देवेब्भ्यऽ
इन्द्रऽआज्ज्येन हविषा भूत्स्वाहा सञ्ज्योतिषा ज्ज्योतिः ॥९॥

॥३॥ मयीदमिन्द्रऽइन्द्रियन्दधात्त्वस्म्मान्न्रायो मघवानः सचन्ताम् । अस्म्माकꣳ सन्त्वा-
शिषः सत्त्या नः सन्त्वाशिषऽउपहूता पृथिवी मातोप माम्पृथिवी माता ह्वयता-
मग्निराग्नीद्ध्रात्स्वाहा ॥१०॥

उपहूतो द्यौष्पितोप मान्द्यौष्पिता ह्वयतामग्निराग्नीद्ध्रात्स्वाहा ।
देवस्य त्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्ष्णो हस्ताब्भ्याम् ।
प्रतिगृह्णाम्म्यग्ग्नेष्ट्वास्येन प्प्राश्नामि ॥११॥

एतन्ते देव सवितर्य्यज्ञम्प्राहुर्बृहस्पतये ब्रह्मणे ।
तेन यज्ञमव तेन यज्ञपतिन्तेन मामव ॥१२॥

मनो जूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टँय्यज्ञꣳ समिमन्दधातु ।
व्विश्श्वे देवासऽइह मादयन्तामो३म्प्रतिष्ठ ॥१३॥

एषा तेऽअग्ग्ने समित्तया वर्द्धस्व चा च प्प्यायस्व । वर्द्धिषीमहि च वयमा च प्प्यासि-
षीमहि । अग्ग्ने व्वाजजिद्वाजन्त्वा ससृवाꣳसँव्वाजजितꣳ सम्मार्ज्मि ॥१४॥

॥४॥ अग्ग्नीषोमयोरुज्जितिमनूज्जेषँव्वाजस्य मा प्प्रसवेन प्प्रोहामि । अग्ग्नीषोमौ तमपनुदताँ-
य्योऽस्म्मान्द्वेष्टि यञ्च वयन्द्विष्ष्मो व्वाजस्यैनम्प्रसवेनापोहामि । इन्द्राग्ग्न्योरुज्जितिम-
नूज्जेषँव्वाजस्य मा प्प्रसवेन प्प्रोहामि । इन्द्राग्ग्नी तमपनुदताँय्योऽस्म्मान्द्वेष्टि यञ्च
वयन्द्विष्ष्मो व्वाजस्यैनम्प्रसवेनापोहामि ॥१५॥

व्वसुब्भ्यस्त्वा रुद्द्रेब्भ्यस्त्वादित्त्येब्भ्यस्त्वा सञ्जानाथान्द्यावापृथिवी मित्त्रावरुणौ त्वा
व्वृष्ट्यावताम् । व्यन्तु वयोक्तꣳ रिहाणा मरुताम्पृषतीर्ग्गच्छ वशा पृश्निर्ब्भूत्त्वा
दिवङ्गच्छ ततो नो व्वृष्टिमावह । चक्षुष्पाऽअग्ग्नेसि चक्षुर्म्मे पाहि ॥१६॥

यम्परिधिम्पर्य्यधत्थाऽअग्ग्ने देव पणिभिर्ग्गुह्यमानः ।
तन्तऽएतमनु जोषम्भराम्म्येष नेत्त्वदपचेतयाताऽअग्ग्नेः प्प्रियम्पाथोपीतम् ॥१७॥

सꣳस्रवभागा स्त्थेषा बृहन्तः प्प्रस्तरेष्ठाः परिधेयाश्च देवाः ।
इमाँव्वाचमभि विश्श्वे गृणन्तऽआसद्यास्मिन्बर्हिषि मादयद्ध्वꣳ स्वाहा व्वाट् ॥१८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

घृताची स्थो धुर्य्यौ पातꣳ सुम्ने स्थः सुम्ने मा धत्तम् ।
यज्ञ नमश्च तऽउप च यज्ञस्य शिवे सन्तिष्ठस्व स्विष्टे मे सन्तिष्ठस्व ॥१९॥

॥५॥ अग्नेदब्धायोशीतम पाहि मा दिद्योः पाहि प्रसित्यै पाहि दुरिष्ट्यै पाहि दुरद्मन्याऽअविषन्नः पितुङ्कृणु सुषदा योनौ स्वाहा वाडग्नये संवेशपतये स्वाहा सरस्वत्यै यशोभगिन्यै स्वाहा ॥२०॥

वेदोसि येन त्वन्देव वेद देवेभ्यो वेदोभवस्तेन मह्यंवेदो भूयाः । देवा गातुविदो गातुंवित्त्वा गातुमित । मनसस्पतऽइमन्देव यज्ञꣳ स्वाहा वाते धाः ॥२१॥

सम्बर्हिरङ्क्ताꣳ हविषा घृतेन समादित्यैर्वसुभिः सम्मरुद्भिः ।
समिन्द्रो विश्वदेवेभिरङ्क्तान्दिव्यन्नभो गच्छतु यत्स्वाहा ॥२२॥

कस्त्वा विमुञ्चति स त्वा विमुञ्चति कस्मै त्वा विमुञ्चति तस्मै त्वा विमुञ्चति ।
पोषाय रक्षसाम्भागोसि ॥२३॥

॥६॥ संवर्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टम् ॥२४॥

उदिवि विष्णुर्व्यक्रꣳस्त जागतेन च्छन्दसा ततो निर्भक्तो योस्मान्द्वेष्टि यञ्च वयन्द्विष्मोन्तरिक्षे विष्णुर्व्यक्रꣳस्त त्रैष्टुभेन च्छन्दसा ततो निर्भक्तो योस्मान्द्वेष्टि यञ्च वयन्द्विष्मः रपृथिव्यांविष्णुर्व्यक्रꣳस्त गायत्रेण च्छन्दसा ततो निर्भक्तो योस्मान्द्वेष्टि यञ्च वयन्द्विष्मोस्मादन्नादस्यै प्रतिष्ठायाऽअगन्म स्वः सञ्ज्योतिषाभूम ॥२५॥

स्वयम्भूरसि श्रेष्ठो रश्मिर्वर्चोदाऽअसि वर्चो मे देहि ।
सूर्य्यस्यावृतमन्वावर्त्ते ॥२६॥

कअग्ने गृहपते सुगृहपतिस्त्वयाग्नेहङ्गृहपतिना भूयासꣳ सुगृहपतिस्त्वम्मयाग्ने गृहपतिना भूयाः । रअस्थूरि णौ गार्हपत्यानि सन्तु शतꣳ हिमाः सूर्य्यस्यावृतमन्वावर्त्ते ॥२७॥

अग्ने व्रतपते व्रतमचारिषन्तदशकन्तन्मेराधीदमहंय्यऽएवास्मि सोस्मि ॥२८॥

॥७॥ अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहा ।
अपहताऽअसुरा रक्षाꣳसि वेदिषदः ॥२९॥

ये रूपाणि प्रतिमुञ्चमानाऽअसुराः सन्तः स्वधया चरन्ति ।
परापुरो निपुरो ये भरन्त्यग्निष्टाँल्लोकात्प्रणुदात्यस्मात् ॥३०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र॑ पितरो मादयद्ध्वँय्यथाभागमावृ॑षायद्ध्वम् ।
अमी॑मदन्त पितरो॑ यथाभागमावृ॑षायिषत ॥३१॥

[क]नमो॑ वः पितरो॒ रसा॑य॒ नमो॑ वः पितरः॒ शोषा॑य॒ नमो॑ वः पितरो॒ जीवा॑य॒ नमो॑ वः
पितरः॒ स्वधायै॒ नमो॑ वः पितरो॒ घोरा॑य॒ नमो॑ वः पितरो॒ मन्यवे॒ [र]नमो॑ वः पितरः॒
पित॑रो॒ नमो॑ वो गृहान्नः पितरो दत्त सतो वः पितरो देष्मैतद्वः पितरो॒ वासः
॥३२॥

आध॑त्त पितरो॒ गर्भङ्कुमा॒रम्पुष्क॑रस्रजम् । यथे॒ह पुरु॑षोऽस॑त् ॥३३॥
ऊर्ज्जँवह॑न्तीरमृत॑ङ्घृतम्पयः कीला॒लम्परि॑स्रुतम् । स्वधा स्त्थ त॒र्प्पय॑त मे पितॄन् ॥३४॥

इति द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्यायः

ऋषिः—विरूप आङ्गिरसः १ । वसुश्रुतः २ । भरद्वाजः ३, १३ । प्रजापतिः ४, ५, ९, १०, ४४, ४५ । सर्पराज्ञी कद्रूः ६—८ । गोतमः ११, ५१, ५२ । विरूपः । १२ । देववातभरतौ १४ । वामदेवः १५, ३६, ३७ । अवत्सारः १६—१९ । याज्ञवल्क्यः २०, २१ । वैश्वामित्रो मधुच्छन्दाः २२—२४ । सुबन्धुः २५, २६ । श्रुतबन्धुः २७ । विप्रबन्धुः २८ । मेधातिथिः २९ । सत्यधृतिर्वारुणिः ३०—३३ । मधुच्छन्दाः ३४ । विश्वामित्रः ३५ । आसुरिः ३८—४१ । शंयुः ४२ । शंयुर्बार्हस्पत्यः ४३ । आगस्त्यः । ४६, ४७ । और्णवाभः ४८—५० । बन्धुः ५३—५९ । वसिष्ठः ६०, ६१ । नारायणः ६२, ६३ ।

देवता—अग्निः १—४, ६—८, ११, १२, १४—१९, २२—२७, ३६, ३८—४०, ४७ । अग्निवायुसूर्याः ५ । अग्निसूर्यौ ९ । अग्निः[क], सूर्यः[र] १० । इन्द्राग्नी १३ आपः २० । विश्वेदेवाः २१ बृहस्पतिः २८, २९ । ब्रह्मणस्पतिः ३० । आदित्यः ३१—३३ । इन्द्रः ३४, ५०—५२ । सविता ३५ । प्रजापतिः ३७ । वास्तुपतिरग्निः ४१, ४२ । वास्तुपतिः ४३ । मरुतः ४४, ४५ । इन्द्रमारुतौ ४६ । यज्ञः ४८, ४९ । मनः ५३—५५ । सोमः ५६ । रुद्रः ५७—६३ ॥

छन्दः—गायत्री १, २, ४, ८, १६, २३, २९, ४४, ५६ । निचृद्गायत्री ३, ६, ११, १२, ३०, ३२, ३५, ३६, ५५ । दैवीबृहती[क], निचृद्बृहती[र] ५ । विराड्गायत्री ७, २३, २४, २७, २८, ३१, ३३, ५४ । पङ्क्तिः,[क] याजुषीपङ्क्तिः[र] ९ । गायत्री[क], भुरिग्गायत्री[र] १० । विराट्त्रिष्टुप् १३ । निचृदनुष्टुप् १४, ४०, ५७ । भुरिक्त्रिष्टुप् १५ । त्रिष्टुप् १७ । निचृद्ब्राह्मीपङ्क्तिः १८ । जगती १९ । भुरिग्बृहती २०, २५, ३९ । उष्णिक् २१, ६२ । भुरिगासुरीगायत्री[क], गायत्री[र] २२ । स्वराड्बृहती २६ । पथ्याबृहती ३४ । ब्राह्म्युष्णिक् ३७ । अनुष्टुप् ३८, ४२, ४९ । आर्षीपङ्क्तिः ४१ । भुरिग्जगती ४३, ६३ । स्वराडनुष्टुप् ४५ । भुरिक्पङ्क्तिः ४६ । विराडनुष्टुप् ४७ । ब्राह्म्यनुष्टुप् ४८ । भुरिगनुष्टुप् ५० विराट्पङ्क्तिः ५१, ५२, ५८ । अतिपादनिचृद्गायत्री ५३ । स्वराड्गायत्री ५९ । विराड्ब्राह्मीत्रिष्टुप् ६० । पङ्क्तिः ६१ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वरः—षड्जः १—४, ६—८, १०—१२, १६, २२—२४, २७—३३, ३५, ३६, ४४, ५३—५६, ५९। मध्यमः ५, २०, २५, २६, ३४, ३९ । पञ्चमः ९, १८, ४१, ४६, ५१, ५२, ५८, ६१ । धैवतः १३, १५, १७, ६० । गान्धारः १४, ३८, ४०, ४२, ४५, ४७—५०, ५७ । निषादः १९, ४३, ६३ । ऋषभः २१, ३७, ६२ ॥

॥१॥ समिधाग्निन्दुवस्यत घृतैर्ब्बोधयतातिथिम् । आस्मिन्हव्या जुहोतन ॥१॥
सुसमिद्धाय शोचिषे घृतन्तीव्रञ्जुहोतन । अग्नये जातवेदसे ॥२॥
तन्त्वा समिद्भिरङ्गिरो घृतेन वर्द्धयामसि । बृहच्छोचा यविष्ठ्य ॥३॥
उप त्वाग्ने हविष्मतीर्घृताचीर्य्यन्तु हर्य्यत । जुषस्व समिधो मम ॥४॥
॥२॥ क भूर्भुवः स्वर्द्यौरिव भूम्ना पृथिवीव वरिम्णा ।
तस्यास्ते पृथिवि देवयजनि पृष्ठेग्निमन्नादमन्नाद्यायादधे ॥५॥
आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः । पितरञ्च प्रयन्त्स्वः ॥६॥
अन्तश्चरति रोचनास्य प्राणादपानती । व्यख्यन्महिषो दिवम् ॥७॥
त्रिꣳशद्धाम विराजति वाक्पतङ्गाय धीयते । प्रतिवस्तोरह द्युभिः ॥८॥
॥३॥ क अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्य्यो ज्योतिर्ज्योतिः सूर्य्यः स्वाहा ।
अग्निर्वर्च्चो ज्योतिर्वर्च्चः स्वाहा सूर्य्यो वर्च्चो ज्योतिर्वर्च्चः स्वाहा ।
ख ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा ॥९॥
क सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या । जुषाणोऽअग्निर्वेतु स्वाहा ।
ख सजूर्देवेन सवित्रा सजूरुषसेन्द्रवत्या । जुषाणः सूर्य्यो वेतु स्वाहा ॥१०॥
॥४॥ उपप्रयन्तोऽअध्वरम्मन्त्रँवोचेमाग्नये । आरेऽअस्मे च शृण्वते ॥११॥
अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम् ।
अपाꣳ रेताꣳसि जिन्वति ॥१२॥
उभा वामिन्द्राग्नीऽआहुवध्याऽउभा राधसः सह मादयध्यै ।
उभा दाताराविषाꣳ रयीणामुभा वाजस्य सातये हुवे वाम् ॥१३॥
अयन्ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः ।
तञ्जानन्नग्नऽआरोहाथा नो वर्द्धया रयिम् ॥१४॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रँविभ्वँविशेविशे ॥१५॥
अस्य प्रत्नामनु द्युतꣳ शुक्रन्दुदुह्रेऽअह्रयः । पयः सहस्रसामृषिम् ॥१६॥
तनूपाऽअग्नेसि तन्वम्मे पाह्यायुर्दाऽअग्नेस्यायुर्म्मे देहि वर्च्चोदाऽअग्नेसि वर्च्चो मे देहि । अग्ने यन्मे तन्वाऽऊनन्तन्मऽआपृण ॥१७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्धानास्त्वा शतꣳ हिमा द्युमन्तꣳ समिधीमहि। वयस्वन्तो वयस्कृतꣳ सहस्वन्तः
सहस्कृतम्। अग्ने सपत्नदम्भनमदब्धासोऽअदाभ्यम्। चित्रावसो स्वस्ति ते
पारमशीय ॥१८॥

सन्त्वमग्ने सूर्यस्य वर्चसागथाः समृषीणाꣳ स्तुतेन। सम्प्रियेण धाम्ना समह-
मायुषा सँवर्चसा सम्प्रजया सꣳ रायस्पोषेण ग्मिषीय ॥१९॥

अन्ध स्थान्धो वो भक्षीय मह स्थ महो वो भक्षीयोर्ज्ज स्थोर्ज्जँवो भक्षीय
रायस्पोष स्थ रायस्पोषँवो भक्षीय ॥२०॥

रेवती रमध्वमस्मिन्योनावस्मिन्गोष्ठेऽस्मिँल्लोकेऽस्मिन्क्षये।
इहैव स्त मापगात ॥२१॥

सꣳहितासि विश्वरूप्यूर्जा माविश गौपत्येन। उप त्वाग्ने दिवेदिवे दोषावस्त-
र्द्धिया वयम्। नमो भरन्तऽएमसि ॥२२॥

राजन्तमध्वराणाङ्गोपामृतस्य दीदिविम्। वर्द्धमानꣳ स्वे दमे ॥२३॥

स नः पितेव सूनवेऽग्ने सूपायनो भव। सचस्वा नः स्वस्तये ॥२४॥

अग्ने त्वन्नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्यः।
वसुरग्निर्वसुश्रवाऽअच्छा नक्षि द्युमत्तमꣳ रयिन्दाः ॥२५॥

तन्त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे सखिभ्यः।
स नो बोधि श्रुधी हवमुरुष्या णोऽअघायतः समस्मात् ॥२६॥

इडऽएह्यदितऽएहि काम्याऽएत। मयि वः कामधरणम्भूयात् ॥२७॥

सोमानꣳ स्वरणङ्कृणुहि ब्रह्मणस्पते। कक्षीवन्तँय्यऽऔशिजः ॥२८॥

यो रेवान्योऽअमीवहा वसुवित्पुष्टिवर्द्धनः।
स नः सिषक्तु यस्तुरः ॥२९॥

मा नः शꣳसोऽअररुषो धूर्त्तिः प्रणङ्मर्त्यस्य। रक्षा णो ब्रह्मणस्पते ॥३०॥

महि त्रीणामवोऽस्तु द्युक्षम्मित्रस्यार्य्यम्णः। दुराधर्षँवरुणस्य ॥३१॥

नहि तेषाममा चन नाध्वसु वारणेषु। ईशे रिपुरघशꣳसः ॥३२॥

ते हि पुत्रासोऽअदितेः प्रजीवसे मर्त्याय। ज्योतिर्य्यच्छन्त्यजस्रम् ॥३३॥

कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे।
उपोपेन्नु मघवन्भूयऽइन्नु ते दानन्देवस्य पृच्यते ॥३४॥

तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥३५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परि॑ ते दूडभो॒ रथो॒ऽस्माँ२॥ऽअ॑श्नोतु वि॒श्वत॑ः। येन॒ रक्ष॑सि दा॒शुष॑ः ॥३६॥
॥५॥ भूर्भुव॒: स्व॑: सुप्र॒जाः प्र॒जाभि॑: स्याथं सु॒वीरो॑ वी॒रैः सु॒पोष॒: पोषै॑: ।
नर्य॑ प्र॒जां मे॑ पाहि॒ शंस्य॑ प॒शून्मे॑ पाह्यथर्य्य पि॒तुं मे॑ पाहि ॥३७॥
आग॑न्म वि॒श्ववे॑दसम॒स्मभ्यं॑ वसु॒वित्त॑मम् ।
अग्ने॑ सम्राड॒भि द्यु॒म्नम॒भि सह॒ऽआय॑च्छस्व ॥३८॥
अ॒यम॒ग्निर्गृ॒हप॑तिर्गार्ह॑पत्यः प्र॒जाया॑ वसु॒वित्त॑मः ।
अग्ने॑ गृहपते॒ऽभि द्यु॒म्नम॒भि सह॒ऽआय॑च्छस्व ॥३९॥
अ॒यम॒ग्निः पु॑री॒ष्यो॑ रयि॒मान्पु॑ष्टि॒वर्द्ध॑नः ।
अग्ने॑ पुरीष्या॒भि द्यु॒म्नम॒भि सह॒ऽआय॑च्छस्व ॥४०॥
॥६॥ गृहा॒ मा बि॑भीत॒ मा वे॑पध्व॒मूर्ज॒म्बिभ्र॑त॒ऽएम॑सि । ऊर्ज॒म्बिभ्र॑द्वः सु॒मना॑: सु॒मेधा॒
गृ॒हानैमि॒ मन॑सा॒ मोद॑मानः ॥४१॥
येषा॑म॒ध्येति॑ प्र॒वस॒न्येषु॑ सौमन॒सो ब॒हुः ।
गृ॒हानुप॑ह्वयामहे॒ ते नो॑ जानन्तु जान॒तः ॥४२॥
उप॑हूता॒ऽइ॒ह गाव॒ऽउप॑हूता॒ऽअ॒जाव॑यः। अथो॒ऽअन्न॑स्य की॒लाल॒ऽउप॑हूतो गृ॒हेषु॑ नः ।
क्षेमा॑य वः॒ शान्त्यै॑ प्र॒पद्ये॑ शि॒वꣳ श॒ग्मꣳ शंयोः॒ शंयोः॑ ॥४३॥
॥७॥ प्र॒घा॒सिनो॑ हवामहे म॒रुत॑श्च रि॒शाद॑सः । क॒रम्भे॑ण स॒जोष॑सः ॥४४॥
यद्ग्रामे॒ यदर॑ण्ये॒ यत्स॒भायां॒ यदि॑न्द्रि॒ये ।
यदेन॑श्चकृ॒मा व॒यमि॒दन्तदव॑यजामहे॒ स्वाहा॑ ॥४५॥
मो षू ण॑ऽइन्द्रा॒त्र पृ॒त्सु दे॒वैरस्ति॒ हि ष्मा॑ ते शुष्मिन्नव॒याः ।
म॒हश्चि॒द्यस्य॑ मी॒ढुषो॑ य॒व्या ह॒विष्म॑तो म॒रुतो॒ वन्द॑ते॒ गीः ॥४६॥
अक्र॒न्कर्म॑ कर्म॒कृत॑: स॒ह वा॒चा म॑यो॒भुवा॑ ।
दे॒वेभ्य॒: कर्म॑ कृ॒त्वास्त॒म्प्रेत॑ सचाभुवः ॥४७॥
अव॑भृथ निचुम्पुण निचे॒रुर॑सि निचु॒म्पुणः। अव॑ दे॒वैर्दे॒वकृ॑त॒मेनो॑ऽयासिष॒मव॒ मर्त्यै॒-
र्मर्त्य॑कृतम्पुरु॒राव्णो॑ देव रि॒षस्पा॑हि ॥४८॥
॥८॥ पू॒र्णा द॑र्वि॒ परा॑पत॒ सुपू॑र्णा॒ पुन॒राप॑त। व॒स्नेव॒ विक्री॑णावहा॒ऽइष॒मूर्ज॑ꣳ शतक्रतो ॥४९॥
दे॒हि मे॒ ददा॑मि ते॒ नि मे॑ धेहि॒ नि ते॑ दधे ।
नि॒हार॒ञ्च हरा॑सि मे नि॒हार॒न्निह॑राणि ते॒ स्वाहा॑ ॥५०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥९॥ अक्षन्नमीमदन्त ह्यव प्प्रिया ऽअधूषत । अस्तोषत स्वभानवो विप्प्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥५१॥
सुसन्दृशन्त्वा वयम्मघवन्वन्दिषीमहि । प्र नूनम्पूर्णबन्धुर स्तुतो यासि वशाँ २॥ ऽअनु योजा न्विन्द्र ते हरी ॥५२॥
मनो न्वाह्वामहे नाराशꣳसेन स्तोमेन । पितॄणाञ्च मन्मभिः ॥५३॥
आ नऽएतु मनः पुनः क्क्रत्वे दक्षाय जीवसे ।
ज्योक्च सूर्य्यन्दृशे ॥५४॥
पुनर्न्नः पितरो मनो ददातु दैव्यो जनः । जीवँव्व्रातꣳ सचेमहि ॥५५॥
वयꣳ सोम व्व्रते तव मनस्तनूषु बिब्भ्रतः । प्रजावन्तः सचेमहि ॥५६॥

॥१०॥ एष ते रुद्र भागः सह स्वस्राम्बिकया तञ्जुषस्व
स्वाहैष ते रुद्र भागऽआखुस्ते पशुः ॥५७॥
अव रुद्रमदीमह्यव देवन्त्र्यम्बकम् । यथा नो वस्यसस्करद्यथा नः श्रेयसस्करद्यथा नो व्यवसाययात् ॥५८॥
भेषजमसि भेषजङ्गवेऽश्वाय पुरुषाय भेषजम् । सुखम्मेषाय मेष्यै ॥५९॥
त्र्यम्बकँय्यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् ।
त्र्यम्बकँय्यजामहे सुगन्धिम्पतिवेदनम् ।
उर्वारुकमिव बन्धनादितो मुक्षीय मामुतः ॥६०॥
एतत्ते रुद्रावसन्तेन परो मूजवतोतीहि । अवततधन्वा पिनाकावसः कृत्तिवासा ऽअहिꣳसन्नः शिवोतीहि ॥६१॥
त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम् ।
यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु त्र्यायुषम् ॥६२॥
शिवो नामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मा मा हिꣳसीः । निवर्त्तयाम्म्यायुषे-न्नाद्याय प्प्रजननाय रायस्पोषाय सुप्प्रजास्त्वाय सुवीर्य्याय ॥६३॥

इति तृतीयोऽध्यायः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ चतुर्थोऽध्यायः

ऋषिः—प्रजापतिः १—७ । आत्रेयः ८ । आङ्गिरसः ९—१५ । वत्सः १६—३६ । गोतमः ३७ ॥

देवता—अबोषध्यौ १ । आपः २, १२, १३ । मेघः ३ । परमात्मा ४ । यज्ञः ५, ६, १०, २४, २६, ३७ । अग्न्यब्बृहस्पतयः ७ । ईश्वरः ८ । विद्वान् ९, २७ । अग्निः ११, १४—१७, २८, २९, ३२ । वाग्विद्युतौ १८—२३ । सविता २५ । वरुणः ३०, ३१ । सूर्य्यविद्वांसौ ३३ । यजमानः ३४ । सूर्य्यः ३५, ३६ ॥

छन्दः—विराड्ब्राह्मीजगती १ । स्वराड्ब्राह्मीत्रिष्टुप् २ । भुरिगार्चीत्रिष्टुप् ३ । निचृद्ब्राह्मीपङ्क्तिः ४,१९ । निचृदार्ष्यनुष्टुप् ५, ६, २९, ३२ । पङ्क्तिः[क], आर्षीबृहती[र] ७ । आर्ष्यनुष्टुप् ८ । आर्षीपङ्क्तिः ९ । निचृदार्षीजगती[क], साम्नीत्रिष्टुप्[र] १० । स्वराड्ब्राह्म्यनुष्टुप्[क], आर्ष्युष्णिक्[र] ११ । भुरिग्ब्राह्म्यनुष्टुप् १२ । भुरिगार्षीबृहती १३ । स्वराडार्ष्युष्णिक् १४ । ब्राह्मीबृहती १५ । भुरिगार्षीपङ्क्तिः १६ । आर्चीत्रिष्टुप् १७ । स्वराडार्षीबृहती १८ । साम्नीजगती[क], भुरिगार्ष्युष्णिक्[र] २० । विराडार्षीबृहती २१ । ब्राह्मीपङ्क्तिः २२ । आस्तारपङ्क्ति २३ । ब्राह्मीजगती[क], याजुषीपङ्क्तिः[र] २४ । भुरिक्शक्वरी[क], भुरिगार्षीगायत्री[र] २५ । भुरिग्ब्राह्मीपङ्क्तिः २६, २७ । साम्नीबृहती[क], साम्न्युष्णिक्[र] २८ । स्वराड्याजुषीत्रिष्टुप्[क], आर्षीत्रिष्टुप्[र] ३० । विराडार्षीत्रिष्टुप् ३१ । निचृदार्षीगायत्री[क], याजुषीजगती[र] ३३ । भुरिगार्चीगायत्री[क], भुरिगार्चीबृहती[र], विराडार्च्यनुष्टुप्[उ] ३४ निचृदार्षीजगती ३५ । विराड्ब्राह्मीबृहती ३६ । निचृदार्षीत्रिष्टुप् ३७ ॥

स्वरः—निषादः १, ३५ । धैवतः २, ३, १७, ३०, ३१, ३७ । पञ्चमः ४, ९, १६, १९, २२, २३, २६, २७, गान्धारः ५, ६, ८, १२, २९, ३२, । पञ्चमः[क], मध्यमः[र] ७ । निषादः[क], धैवतः[र], १० । गान्धारः[क], ऋषभः[र] ११ । ऋषभः १४ । मध्यमः १३, १५, १८, २१, ३६ । निषादः[क], ऋषभः[र] २० । निषादः[क], पञ्चमः[र] २४ । धैवतः[क], षड्जः[र] २५ । मध्यमः[क], ऋषभः[र] २८ । षड्जः[क], निषादः[र] ३३ । षड्जः[क], मध्यमः[र], गान्धारः[उ] ३४ ॥

॥१॥ एदमगन्म देवयजनम्पृथिव्या यत्र देवासोऽअजुषन्त विश्वे । ऋक्सामाभ्याꣳ
सन्तरन्तो यजुर्भी रायस्पोषेण समिषा मदेम । इमाऽआपः शमु मे सन्तु देवीरोषधे
त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥१॥
आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वꣳ हि रिप्प्र-
म्प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूतऽएमि । दीक्षातपसोस्तनूरसि तान्त्वा
शिवाꣳ शग्ग्माम्परिदधे भद्द्रँवर्ण्णम्पुष्ष्यन् ॥२॥
॥२॥ महीनाम्पयोसि वर्चोदाऽअसि वर्चो मे देहि ।
वृत्रस्यासि कनीनकश्चक्षुर्दाऽअसि चक्षुर्म्मे देहि ॥३॥
चित्पतिर्म्मा पुनातु वाक्पतिर्म्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण
सूर्य्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥४॥
आ वो देवासऽईमहे वामम्प्रयत्यध्वरे ।
आ वो देवासऽआशिषो यज्ञियासो हवामहे ॥५॥
स्वाहा यज्ञम्मनसः स्वाहोरोरन्तरिक्षात्स्वाहा द्यावापृथिवीभ्याꣳ स्वाहा वाता-
दारभे स्वाहा ॥६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥३॥ कआकूत्त्यै प्प्रयुजेग्ग्नये स्वाहा मेधायै मनसेग्ग्नये स्वाहा दीक्षायै तपसेग्ग्नये स्वाहा सरस्वत्त्यै पूष्ण्णेग्ग्नये स्वाहा। रआपो देवीर्ब्बृहतीर्व्विश्श्वशम्भुवो द्यावापृथिवीऽउरोऽअन्तरिक्क्ष। बृहस्प्पतये हविषा विधेम स्वाहा ॥७॥

विश्श्वो देवस्य नेतुर्म्मर्त्तो वुरीत सुक्ख्यम्। विश्श्वो रायऽइषुद्ध्यति द्युम्न्नंवृणीत पुष्ष्यसे स्वाहा ॥८॥

॥४॥ ऋक्क्सामयोः शिल्प्पे स्त्थस्त्ते वामारभे ते मा पातमास्य यज्ज्ञस्योदृचः।
शर्म्मासि शर्म्म मे यच्छ नमस्त्तेऽअस्तु मा मा हिꣳसीः ॥९॥

कऊर्ग्गस्याङ्गिरस्यूर्ण्णम्म्रदाऽऊर्ज्जम्मयि धेहि। सोमस्य नीविरसि विष्ण्णोः शर्म्मासि शर्म्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि। रउच्छ्रयस्व वनस्प्पत ऽऊर्द्ध्वो मा पाह्यꣳहसऽआस्य यज्ज्ञस्योदृचः ॥१०॥

॥५॥ कव्रतङ्कृणुत व्रतङ्कृणुताग्ग्निर्ब्ब्रह्माग्ग्निर्य्यज्ज्ञो वनस्प्पतिर्य्यज्ज्ञियः। दैवीन्धियम्मनामहे सुमृडीकामभिष्ट्टये वर्च्चोधाँय्यज्ज्ञवाहसꣳ सुतीर्त्था नोऽअसद्वशे। रये देवा मनोजाता मनोयुजो दक्क्षक्क्रतवस्त्ते नोवन्तु ते नः पान्तु तेब्भ्यः स्वाहा ॥११॥

श्वात्राः पीता भवत यूयमापोऽअस्म्माकमन्तरुदरे सुशेवाः।
ताऽअस्म्मब्भ्यमयक्ष्माऽअनमीवाऽअनागसः स्वदन्तु देवीरमृताऽऋतावृधः ॥१२॥

इयन्ते यज्ज्ञिया तनूरपो मुञ्चामि न प्प्रजाम्।
अꣳहोमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्व्या सम्भव ॥१३॥

अग्ग्ने त्त्वꣳ सुजागृहि वयꣳ सुमन्दिषीमहि।
रक्क्षा णोऽअप्प्रयुच्छन्प्प्रबुधे नः पुनस्कृधि ॥१४॥

पुनर्म्मनः पुनरायुर्म्मऽआगन्पुनः प्प्राणः पुनरात्त्मा मऽआगन्पुनश्चक्क्षुः पुनः श्रोत्रम्मऽआगन्। वैश्श्वानरोऽअदब्धस्त्तनूपाऽअग्ग्निर्न्नः पातु दुरितादवद्यात् ॥१५॥

त्त्वमग्ग्ने व्रतपाऽअसि देवऽआ मर्त्त्येष्ष्वा। त्त्वँय्यज्ज्ञेष्ष्वीड्यः। रास्स्वेयत्त्सोमा भूयो भर देवो नः सविता वसोर्द्दाता वस्वदात् ॥१६॥

॥६॥ एषा ते शुक्क्र तनूरेतद्वर्च्चस्त्तया सम्भव ब्भ्राजङ्गच्छ।
जूरसि धृता मनसा जुष्ट्टा विष्ण्णवे ॥१७॥

तस्यास्त्ते सत्यसवसः प्प्रसवे तन्न्वो यन्त्रमशीय स्वाहा।
शुक्क्रमसि चन्द्रमस्यमृतमसि वैश्श्वदेवमसि ॥१८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चिर्दसि मुनासि धीरसि दक्षिणासि क्षुत्रियासि युज्ञियास्यदितिरस्युभयतः शीर्ष्णी । सा नः सुप्प्राची सुप्प्रतीच्येधि मित्रस्त्वा पुदि बंध्नीताम्पूषाध्वनस्प्पात्त्विन्द्रायाध्यक्षाय ॥१९॥

अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योनु सखा सयूथ्यः ।
सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्रस्त्वावर्त्तयतु स्वस्ति सोमसखा पुनरेहि ॥२०॥

॥७॥ वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि ।
बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो वसुभिराचके ॥२१॥

अदित्यास्त्वा मूर्द्धन्नाजिघर्म्मि देवयजने पृथिव्याऽइडायास्पदमसि घृतवत्स्वाहा । अस्मे रमस्वास्मे ते बन्धुस्त्वे रायो मे रायो मा वयꣳ रायस्पोषेण वियौष्म तोतो रायः ॥२२॥

समख्ये देव्या धिया सन्दक्षिणयोरुचक्षसा ।
मा मऽआयुः प्रमोषीर्म्मोऽअहन्तव वीरँविदेय तव देवि सन्दृशि ॥२३॥

॥८॥ एष ते गायत्रो भागऽइति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भागऽइति मे सोमाय ब्रूतादेष ते जागतो भागऽइति मे सोमाय ब्रूताच्छन्दोनामानाꣳ साम्राज्यङ्गच्छेति मे सोमाय ब्रूतादास्माकोसि शुक्रस्ते ग्रह्यो विचितस्त्वा विचिन्वन्तु ॥२४॥

अभि त्यन्देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳ रत्नधामभि प्रियम्मतिङ्कविम् । ऊर्द्ध्वा यस्यामतिर्भाऽअदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः । प्रजाभ्यस्त्वा प्रजास्त्वानुप्प्राणन्तु प्रजास्त्वमनुप्प्राणिहि ॥२५॥

॥९॥ शुक्रन्त्वा शुक्रेण क्रीणामि चन्द्रञ्चन्द्रेणामृतममृतेन । सग्मे ते गोरस्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे सहस्रपोषम्पुषेयम् ॥२६॥

मित्रो नऽएहि सुमित्रधऽइन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳ स्योनः स्योनम् । स्वान भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वम्मा वो दभन् ॥२७॥

परि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज ।
उदायुषा स्वायुषोदस्थाममृताँ२ऽअनु ॥२८॥

प्रति पन्थामपद्महि स्वस्तिगामनेहसम् ।
येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु ॥२९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥१०॥ अदित्यास्त्वगस्यदित्यै सदऽआसीद । अस्तभ्नाद्द्यां वृषभोऽअन्तरिक्षममिमीत वरि-
माणम्पृथिव्याः । आसीदद्विश्श्वा भुवनानि सम्म्राड्विश्श्वेत्तानि वरुणस्य व्रतानि ॥३०॥
वनेषु व्यन्तरिक्षन्ततान वाजमर्वत्सु पयऽउस्रियासु ।
हृत्सु क्रतुँवरुणो विक्क्ष्वग्ग्निन्दिवि सूर्य्यमदधात्सोममद्रौ ॥३१॥
सूर्य्यस्य चक्क्षुरारोहाग्नेरक्क्ष्णः कनीनकम् ।
यत्रैतशेभिरीयसे भ्भ्राजमानो विपश्चिता ॥३२॥
उस्रावेतन्धूर्षाहौ युज्येथामनश्श्रूऽअवीरहणौ ब्रह्मचोदनौ ।
स्वस्ति यजमानस्य गृहान्गच्छतम् ॥३३॥
भद्रो मेसि प्प्रच्च्यवस्व भुवस्प्पते विश्श्वान्यभि धामानि । मा त्वा परिपरिणो विदन्मा
त्वा परिपन्थिनो विदन्मा त्वा वृकाऽअघायवो विदन् । श्येनो भूत्वा परापत यज-
मानस्य गृहान्गच्छ तन्नौ सँस्कृतम् ॥३४॥
नमो मित्रस्य वरुणस्य चक्क्षसे महो देवाय तदृतꣳ सपर्य्यत ।
दूरेदृशे देवजाताय केतवे दिवस्प्पुत्राय सूर्य्याय शꣳसत ॥३५॥
वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनी स्त्थो वरुणस्यऽऋतसदन्न्यसि वरुणस्य
ऽऋतसदनमसि वरुणस्यऽऋतसदनमासीद ॥३६॥
या ते धामानि हविषा यजन्ति ता ते विश्श्वा परिभूरस्तु यज्ञम् ।
गयस्प्फानः प्प्रतरणः सुवीरोवीरहा प्प्रचरा सोम दुर्य्यान् ॥३७॥

इति चतुर्थोऽध्यायः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ पञ्चमोऽध्यायः

ऋषिः—गोतमः १—१४ । मेधातिथिः १५ । वसिष्ठः १६, १७ । औतथ्यो दीर्घतमा १८—२९ । मधुच्छन्दाः ३०—३५ । आगस्त्यः ३६—४३ ॥

देवता—विष्णुः १, १५—२१, ३८, ४१ । विष्णुर्यज्ञः २ । यज्ञः ३, १३, २२, २३, २५—२८, ४३ । अग्निः ४, ६, ८, ९, ३१—३७, ४०, ४२ । विद्युत् ५ । सोमः ७ । वाक् १०—१२ । सविता १४ । सूर्यविद्वांसौ २४ । ईश्वरसभाध्यक्षौ २९, ३० । सोमसवितारौ ३९ ॥

छन्दः—स्वराड्ब्राह्मीबृहती १, ३४ . आर्षीगायत्री[क], आर्चीत्रिष्टुप्[र] २ । आर्षीपङ्क्तिः ३ । आर्षीत्रिष्टुप् ४ । आर्ष्युष्णिक्[क], भुरिगार्षीपङ्क्तिः[र] ५ । विराड्ब्राह्मीपङ्क्तिः ६ । आर्षीबृहती[क], आर्षीजगती[र] ७ । विराडार्षी बृहती[क], निचृदार्षीबृहती[र], [उ], ८ । भुरिगार्षीगायत्री[1], भुरिग्ब्राह्मीबृहती[2], निचृद्ब्राह्मीजगती[3], याजुष्यनुष्टुप्[4] ९ । ब्राह्म्युष्णिक् १० । निचृद्ब्राह्मीत्रिष्टुप् ११, ४० । भुरिग्ब्राह्मीपङ्क्तिः १२ । भुरिगार्ष्यनुष्टुप् १३, २४, ३८, ४१ । स्वराडार्षी जगती १४ । भुरिगार्षीगायत्री १५ । स्वराडार्षीत्रिष्टुप् १६, १८ । स्वराड्ब्राह्मीत्रिष्टुप् १७, ३२, ४२ । निचृदार्षीजगती १९ । विराडार्षीत्रिष्टुप् २० । भुरिगार्चीपङ्क्तिः २१ । साम्नीपङ्क्तिः[क], भुरिगार्षीबृहती[र] २२ । याजुषीबृहती[उ], आसुरी गायत्री[क], ब्राह्म्यनुष्टुप्[ख], स्वराड्ब्राह्म्युष्णिक्[र] २३ । ब्राह्मीबृहती[क], आर्षीपङ्क्तिः[र] २५ । निचृदार्षीपङ्क्तिः[क], निचृदार्षीत्रिष्टुप्[र] २६ । ब्राह्मीजगती २७ । आर्षीजगती २८ । अनुष्टुप् २९ । आर्च्युष्णिक् ३० । विराडार्ष्यनुष्टुप् ३१ । ब्राह्मीपङ्क्तिः ३३ । विराड्ब्राह्मीबृहती ३५ । निचृदार्चीत्रिष्टुप् ३६ । भुरिगार्षीत्रिष्टुप् ३७ । साम्नीबृहती[क], निचृदार्षीपङ्क्तिः[र], ३९ । ब्राह्मीत्रिष्टुप् ४३ ॥

स्वरः—मध्यमः १, ८, ३४, ३५, षड्जः[क], धैवतः[र] २ । पञ्चमः ३, ६, १२, २१, ३३, । धैवतः ४, ११, १६—१८, २०, ३२, ३६, ३७, ४०, ४२, ४३, । ऋषभः[क], पञ्चमः[र], ५ । मध्यमः[क], निषादः[र] ७ । षड्जः[1], मध्यमः[2], निषादः[3], गान्धारः[4] ९ । ऋषभः १०, ३० । गान्धारः १३, २४, २९, ३१, ३८, ४१ । निषादः १४, १९, २७, २८, । षड्जः १५ । पञ्चमः[क], मध्यमः[र], २२ । मध्यमः[उ], षड्जः[क], गान्धारः[ख], ऋषभः[र], २३ । मध्यमः[क], पञ्चमः[र] २५ । पञ्चमः[क], धैवतः:[र] २६ । मध्यमः[क], पञ्चमः[र] ३९ ॥

॥१॥ अग्नेस्तनूरसि विष्णवे त्वा सोमस्य तनूरसि विष्णवे त्वातिथेरातिथ्यमसि विष्णवे
त्वा श्येनाय त्वा सोमभृते विष्णवे त्वाग्नये त्वा रायस्पोषदे विष्णवे त्वा ॥१॥
[क]अग्नेर्जनित्रमसि वृषणौ स्थऽउर्वश्यस्यायुरसि पुरूरवाऽअसि । [र]गायत्रेण त्वा
छन्दसा मन्थामि त्रैष्टुभेन त्वा छन्दसा मन्थामि जागतेन त्वा छन्दसा
मन्थामि ॥२॥
भवतन्नः समनसौ सचेतसावरेपसौ ।
मा यज्ञꣳ हिꣳसिष्टम्मा यज्ञपतिञ्जातवेदसौ शिवौ भवतमद्य नः ॥३॥
अग्नावग्निश्चरति प्रविष्टऽऋषीणाम्पुत्रोऽअभिशस्तिपावा ।
स नः स्योनः सुयजा यजेह देवेभ्यो हव्यꣳ सदमप्रयुच्छन्त्स्वाहा ॥४॥
॥२॥ [क]आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्वराय शक्वनऽओजिष्ठाय । [र]अना-
धृष्टमस्यनाधृष्यन्देवानामोजोऽनभिशस्त्यभिशस्तिपाऽअनभिशस्तेन्यमञ्जसा सत्य-
मुपगेषꣳ स्विते मा धाः ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अग्ने व्रतपास्त्वे व्रतपा या तव तनूरियꣳ सा मयि यो मम तनूरेषा सा त्वयि ।
सह नौ व्रतपते व्रतान्यनु मे दीक्षान्दीक्षापतिर्म्मन्यतामनु तपस्तपस्पतिः ॥६॥

अꣳशुरꣳशुष्टे देव सोमाप्प्यायतामिन्द्रायैकधनविदे । आ तुब्भ्यमिन्द्रः प्प्यायतामा त्वमिन्द्राय प्प्यायस्व । आप्प्याययास्म्मान्त्सखीन्त्सन्न्या मेधया स्वस्ति ते देव सोम सुत्यामशीय । एष्टा रायः प्प्रेषे भगायऽऋतमृतवादिब्भ्यो नमो द्यावापृथिवीब्भ्याम् ॥७॥

या तेऽअग्नेयःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्ग्रँव्वचोऽअपावधीत्त्वेषँव्वचोऽअपावधीत्स्वाहा । या तेऽअग्ने रजःशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्ग्रँव्वचोऽअपावधीत्त्वेषँव्वचोऽअपावधीत्स्वाहा । या तेऽअग्ने हरिशया तनूर्वर्षिष्ठा गह्वरेष्ठा । उग्ग्रँव्वचोऽअपावधीत्त्वेषँव्वचोऽअपावधीत्स्वाहा ॥८॥

॥३॥ तप्तायनी मेसि वित्तायनी मेस्यवतान्मा नाथितादवतान्मा व्यथितात् । विदेदग्ग्निर्न्नभो नामाग्नेऽअङ्गिरऽआयुना नाम्नेहि योऽस्याम्पृथिव्यामसि यत्तेनाधृष्टन्नाम यज्ञियन्तेन त्वा दधे विदेदग्ग्निर्न्नभो नामाग्नेऽअङ्गिरऽआयुना नाम्नेहि यो द्वितीयस्याम्पृथिव्यामसि यत्तेनाधृष्टन्नाम यज्ञियन्तेन त्वा दधे विदेदग्ग्निर्न्नभो नामाग्नेऽअङ्गिरऽआयुना नाम्नेहि यस्तृतीयस्याम्पृथिव्यामसि यत्तेनाधृष्टन्नाम यज्ञियन्तेन त्वा दधे । अनु त्वा देववीतये ॥९॥

सिꣳह्यसि सपत्नसाही देवेब्भ्यः कल्पस्व सिꣳह्यसि सपत्नसाही देवेब्भ्यः शुन्धस्व सिꣳह्यसि सपत्नसाही देवेब्भ्यः शुम्भस्व ॥१०॥

॥४॥ इन्द्रघोषस्त्वा वसुभिः पुरस्तात्पातु प्प्रचेतास्त्वा रुद्रैः पश्चात्पातु मनोजवास्त्वा पितृभिर्द्दक्षिणतः पातु विश्वकर्म्मा त्वादित्यैरुत्तरतः पात्विदमहन्तप्तँव्वार्बहिर्द्धा यज्ञान्निःसृजामि ॥११॥

सिꣳह्यसि स्वाहा सिꣳह्यस्यादित्यवनिः स्वाहा सिꣳह्यसि ब्रह्मवनिः क्षत्रवनिः स्वाहा सिꣳह्यसि सुप्रजावनी रायस्प्पोषवनिः स्वाहा सिꣳह्यस्यावह देवान्यजमानाय स्वाहा भूतेब्भ्यस्त्वा ॥१२॥

ध्रुवोसि पृथिवीन्दृꣳह ध्रुवक्षिदस्यन्तरिक्षन्दृꣳहाच्युतक्षिदसि दिवन्दृꣳहाग्नेः पुरीषमसि ॥१३॥

युञ्जते मनऽउत युञ्जते धियो विप्प्रा विप्प्रस्य बृहतो विपश्चितः ।
वि होत्रा दधे वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः स्वाहा ॥१४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इदँविष्ण्णुर्विचक्क्रमे त्रेधा निदधे पदम्। समूढमस्य पाᳬसुरे स्वाहा ॥१५॥
इरावती धेनुमती हि भूतᳲ सूयवसिनी मनवे दशस्या।
व्यस्कभ्भ्ना रोदसी विष्ण्णवेते दाधर्त्थ पृथिवीमभितो मयूखैः स्वाहा ॥१६॥
देवश्श्रुतौ देवेष्ष्वा घोषतम्प्राची प्प्रेतमद्ध्वरङ्कल्प्पयन्तीऽऊर्द्ध्वँय्यज्ज्ञन्नयतम्मा जिह्व-
रतम्। स्वङ्गोष्ठमावदतन्देवी दुर्य्येऽआयुर्म्मा निर्व्वादिष्ष्टम्प्रजाम्मा निर्व्वादिष्ष्टमत्र
रमेथाँवर्ष्ष्मन्पृथिव्याः ॥१७॥
विष्ण्णोर्न्नुकँवीर्य्याणि प्प्रवोचँय्यः पार्त्थिवानि विममे रजाᳬसि।
योऽअस्कभायदुत्तरᳲ सधस्त्थँविचक्क्रमाणस्त्रेधोरुगायो विष्ण्णवे त्त्वा ॥१८॥
दिवो वा विष्ण्णऽउत वा पृथिव्या महो वा विष्ण्णऽउरोरन्तरिक्क्षात्।
उभा हि हस्त्ता वसुना पृणस्वा प्प्रयच्छ दक्क्षिणादोत सव्व्याद्विष्ण्णवे त्त्वा ॥१९॥
प्र तद्विष्ण्णु स्त्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्क्रमणेष्ष्वधिक्क्षियन्ति भुवनानि विश्श्वा ॥२०॥
विष्ण्णो रराटमसि विष्ण्णोः श्नप्त्रे स्त्थो विष्ण्णोः स्यूरसि विष्ण्णोर्द्ध्रुवोसि।
वैष्ण्णवमसि विष्ण्णवे त्त्वा ॥२१॥
॥६॥ ^क^देवस्य त्त्वा सवितुः प्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्ण्णो हस्त्ताब्भ्याम्। ^ख^आददे नार्य्यसीद-
महᳲ रक्क्षसाङ्ग्रीवाऽअपि कृन्तामि। बृहन्नसि बृहद्ग्रवा बृहतीमिन्द्राय वाचँवद ॥२२॥
^ग^रक्क्षोहणँवलगहनँ^क^वैष्ण्णवीमिदमहन्तँवलगमुत्किरामि ^ख^यम्मे निष्ट्यो यममात्त्यो
निचखानेदमहन्तँवलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तँव-
लगमुत्किरामि ^ग^यम्मे सबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तँवलगमुत्किरामि यम्मे
सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥२३॥
स्वराडसि सपत्क्नहा सत्त्रराडस्यभिमातिहा जनराडसि रक्क्षोहा सर्व्वराडस्यमित्त्रहा ॥२४॥
^क^रक्क्षोहणो वो वलगहनः प्प्रोक्क्षामि वैष्ण्णवान्न्रक्क्षोहणो वो वलगहनोवनयामि
वैष्ण्णवान्न्रक्क्षोहणो वो वलगहनोवस्तृणामि वैष्ण्णवान्न्रक्क्षोहणौ ^ख^वाँवलगहनाऽउप-
दधामि वैष्ण्णवी रक्क्षोहणौ वाँवलगहनौ पर्य्यूहामि वैष्ण्णवी वैष्ण्णवमसि
वैष्ण्णवा स्त्थ ॥२५॥
॥७॥ ^क^देवस्य त्त्वा सवितुः प्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्ण्णो हस्त्ताब्भ्याम्। आददे
नार्य्यसीदमहᳲ रक्क्षसाङ्ग्रीवाऽअपि कृन्तामि। ^ख^यवोसि यवयास्म्मद्द्वेषो यवयारातीर्द्दिवे
त्त्वान्तरिक्क्षाय त्त्वा पृथिव्यै त्त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥२६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उद्दिवꣳ स्तभानान्तरिक्षम्पृण दृꣳहस्व पृथिव्यान्द्युतानस्त्वा मारुतो मिनोतु
मित्रावरुणौ ध्रुवेण धर्म्मणा । ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्य्यूहामि ।
ब्रह्म दृꣳह क्षत्रन्दृꣳहायुर्दृꣳह प्रजान्दृꣳह ॥२७॥
ध्रुवासि ध्रुवोयँय्यजमानोस्मिन्नायतने प्रजया पशुभिर्भूयात् । घृतेन द्यावापृथिवी
पूर्य्येथामिन्द्रस्य च्छदिरसि विश्वजनस्य च्छाया ॥२८॥
परि त्वा गिर्वणो गिरऽइमा भवन्तु विश्वतः ।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥२९॥
इन्द्रस्य स्यूरसीन्द्रस्य ध्रुवोसि । ऐन्द्रमसि वैश्वदेवमसि ॥३०॥
॥८॥ विभूरसि प्रवाहणो वह्निरसि हव्यवाहनः ।
श्वात्रोसि प्रचेतास्तुथोसि विश्ववेदाः ॥३१॥
उशिगसि कविरङ्घारिरसि बम्भारिरवस्यूरसि दुवस्वाञ्छुन्ध्यूरसि मार्ज्जालीयः
सम्राडसि कृशानुः परिषद्योसि पवमानो नभोसि प्रतक्वा मृष्टोसि हव्यसूदनऽ
ऋतधामासि स्वर्ज्योतिः ॥३२॥
समुद्रोसि विश्वव्यचाऽअजोस्येकपादहिरसि बुध्न्यो वागस्यैन्द्रमसि सदोस्यृतस्य
द्वारौ मा मा सन्ताप्तमध्वनामध्वपते प्र मा तिर स्वस्ति मेस्मिन्पथि देवयाने
भूयात् ॥३३॥
मित्रस्य मा चक्षुषेक्षध्वमग्नयः सगराः सगरा स्थ सगरेण नाम्ना रौद्रेणानीकेन
पात माग्नयः पिपृत माग्नयो गोपायत मा नमो वोस्तु मा मा हिꣳसिष्ट ॥३४॥
॥९॥ ज्योतिरसि विश्वरूपँविश्वेषान्देवानाꣳ समित् । त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योन्य-
कृतेभ्यऽउरु यन्तासि वरूथꣳ स्वाहा जुषाणोऽअप्तुराज्यस्य वेतु स्वाहा ॥३५॥
अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्म-
ज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिँविधेम ॥३६॥
अयन्नोऽअग्निर्वरिवस्कृणोत्वयम्मृधः पुरऽएतु प्रभिन्दन् ।
अयँवाजाञ्जयतु वाजसातावयꣳ शत्रूञ्जयतु जर्हृषाणः स्वाहा ॥३७॥
उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतङ्घृतयोने पिब प्रप्र यज्ञपतिन्तिर स्वाहा ॥३८॥
[क]देव सवितरेष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् । [र]एतत्त्वन्देव सोम देवो देवाँ॥ऽ
उपागाऽइदमहम्मनुष्यान्त्सह रायस्पोषेण स्वाहा निर्वरुणस्य पाशान्मुच्ये ॥३९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अग्ने व्रतपास्त्वे व्रतपा या तव तनूर्म्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियꣳ
सा मयि। यथायथन्नौ व्रतपते व्रतान्यनु मे दीक्षान्दीक्षापतिरमꣳस्तानु तपस्तप-
स्पतिः ॥४०॥

॥६०॥ उरु विष्णो विक्रमस्वोरु क्षयाय नस्कृधि ।
घृतङ्घृतयोने पिब प्रप्र यज्ञपतिन्तिर स्वाहा ॥४१॥
अत्यन्याँ२॥ऽअगान्नान्याँ२॥ऽउपागामर्वाक्त्वा परेभ्योविदम्परोवरेभ्यः । तन्त्वा
जुषामहे देव वनस्पते देवयज्यायै देवास्त्वा देवयज्यायै जुषन्ताँविष्णवे त्वा ।
ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥४२॥
द्याम्मा लेखीरन्तरिक्षम्मा हिꣳसीः पृथिव्या सम्भव । अयꣳ हि त्वा स्वधितिस्ते-
तिजानः प्रणिनाय महते सौभगाय । अतस्त्वन्देव वनस्पते शतवल्शो विरोह
सहस्रवल्शा वि वयꣳ रुहेम ॥४३॥

इति पञ्चमोऽध्यायः ॥

अथ षष्ठोऽध्यायः

ऋषिः—अगस्त्यः १ । शाकल्यः २ । दीर्घतमा ३, ६, ८, ९, १७—२३ । मेधातिथिः ४, ५, ७, १०—१६, २४—२८ । मधुच्छन्दाः २९—३६ । गौतमः ३७ ॥

देवता—सविता १, २, ३० । विष्णुः ३, ४, ५ । विद्वांसः ६, १२, १४, १५ । त्वष्टा ७, २० । बृहस्पतिः ८ । सविता, अश्विनौ, पूषा ९ । आपः १०, १३, १७, २७ । वातः ११ । द्यावापृथिव्यौ १६, ३५ । अग्निः १८, २९ । विश्वेदेवाः १९ । सेनापतिः २१ । वरुणः २२ । अप्-यज्ञ-सूर्याः २३ । लिङ्गोक्ताः २४ । सोमः २५, २६, ३३, ३६ । प्रजा २८ । प्रजासभ्यराजानः ३१ । सभापतीराजा ३२ । यज्ञः ३४ । इन्द्रः ३७ ॥

छन्दः—निचृत्पङ्क्तिः[उ], आसुर्युष्णिक्[क], भुरिगार्ष्युष्णिक्[र] १ । निचृद्गायत्री[क], स्वराट्पङ्क्तिः[र] २ । आर्च्युष्णिक्[उ], भुरिगार्च्युष्णिक्[क], निचृत्प्राजापत्याबृहती[र], आसुरीगायत्री[क], ३ । निचृदार्षीगायत्री ४ । आर्षी गायत्री ५ । आर्ष्युष्णिक्[क], भुरिक्साम्नीबृहती[र] ६ । निचृदार्षीबृहती ७ । प्राजापत्यानुष्टुप्[क], भुरिक्प्राजापत्या-बृहती[र] ८ । प्राजापत्याबृहती[क], पङ्क्तिः[र] याजुषीत्रिष्टुप्[उ], ९ । प्राजापत्याबृहती[क], विराडार्चीबृहती[र] १० । भुरिगार्च्युष्णिक्[क] भुरिगार्ष्युष्णिक्[र], स्वराडार्च्युष्णिक्[उ], ११ । भुरिक्प्राजापत्यानुष्टुप्[क], भुरिगासुर्यनुष्टुप्[र] १२ निचृदार्ष्यनुष्टुप् १३, २३, २८ । भुरिगार्षीजगती १४ । भुरिगार्चीत्रिष्टुप्[क], आर्षीपङ्क्तिः[र], १५ । ब्राह्म्युष्णिक्[क], [र]१६ । निचृद्ब्राह्म्यनुष्टुप् १७ । प्राजापत्यानुष्टुप्[क], दैवीपङ्क्तिः[र] आर्चीपङ्क्तिः[उ] १८ । ब्राह्म्यनुष्टुप् १९ । ब्राह्मीत्रिष्टुप् २० । साम्नी[क], ब्राह्मी[ख], भुरिगार्षी[र], आर्षी[उ] उष्णिक् २१ । स्वराड्ब्राह्म्युष्णिक्[क], त्रिपाद् विराड्गायत्री[र] २२ । आर्षीत्रिष्टुप्[क], त्रिपाद्गायत्री[र] २४ । विराडार्ष्यनुष्टुप् २५ । भुरिग्गायत्री[क], आर्षीत्रिष्टुप्[र] २६ । निचृदार्षीत्रिष्टुप् २७ । भुरिगार्षीगायत्री २९ । स्वराडार्षीपङ्क्तिः[क] निचृदार्ष्यनुष्टुप्[र] ३० । ब्राह्म्युष्णिक्[क], आर्ष्युष्णिक्[र] ३१ । पञ्चपान्मध्येज्योतिष्मतीजगती ३२ । भुरिगार्षीबृहती ३३ । स्वराडार्षी-बृहती ३४ । भुरिगार्ष्यनुष्टुप् ३५, ३७ । उष्णिक् ३६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वरः—पञ्चमः[उ], ऋषभः[क], [र]१ । षड्जः[क], पञ्चमः[र] २ । ऋषभः[उ], [क], मध्यमः[र] षड्जः[ख] ३ । षड्जः ४, ५, २९ । ऋषभः[क] मध्यमः[र] ६ । मध्यमः ७, १०, ३३, ३४ । गान्धारः[क], मध्यमः[र] ८ । मध्यमः[क] पञ्चमः[र], धैवतः[उ], ९ । ऋषभः ११ [क], [र], १६, २१, ३१, ३६ । गान्धारः १२, १३, १७, १९, २३, २५, २८, ३५, ३७ । निषादः १४, ३२ । धैवतः[क] पञ्चमः[र], १५, गान्धारः[क], पञ्चमः[र], [उ] १८ । धैवतः २०, २७ । ऋषभः[क], षड्जः[र] २२ । धैवतः[क], षड्जः[र] २४ । षड्जः[क], धैवतः[र] २६ । पञ्चमः[क], गान्धारः[र] ३० ॥

॥१॥ [उ]देवस्य त्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम् । आददे नार्य्य-
सीदमहꣳ रक्षसाङ्ग्रीवाऽअपि कृन्तामि । [क]यवोसि यवयास्मद्द्वेषो यवयारातीर्द्दिवे
त्वान्तरिक्षाय त्वा पृथिव्व्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥१॥
[क]अग्ग्रेणीरसि स्वावेशऽउन्नेतृणामेतस्य वित्तादधि त्वा स्थास्यति [र]देवस्त्वा सविता
मद्ध्वानक्तु सुपिप्पलाब्भ्यस्त्वौषधीब्भ्यः । द्यामग्ग्रेणास्पृक्षऽआन्तरिक्षम्मद्ध्येना-
प्प्राः पृथिवीमुपरेणादृꣳहीः ॥२॥
[उ]या ते धामान्युश्मसि गमद्ध्यै यत्र गावो भूरिशृङ्गाऽअयासः । [क]अत्राह तदुरुगायस्य
विष्णोः परमम्पदमव भारि भूरि । [र]ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि पर्य्यू-
हामि । [ख]ब्रह्म दृꣳह क्षत्रन्दृꣳहायुर्दृꣳह प्प्रजान्दृꣳह ॥३॥
विष्णोः कर्म्माणि पश्श्यत यतो व्व्रतानि पस्पशे । इन्द्रस्य युज्ज्यः सखा ॥४॥
तद्विष्णोः परमम्पदꣳ सदा पश्श्यन्ति सूरयः । दिवीव चक्षुराततम् ॥५॥
[क]परिवीरसि परि त्वा दैवीर्विशो व्व्ययन्ताम्परीमँय्यजमानꣳ रायो मनुष्याणाम् ।
[र]दिवः सूनुरस्येष ते पृथिव्व्याँल्लोकऽआरण्ण्यस्ते पशुः ॥६॥

॥२॥ उपावीरस्युप देवान्दैवीर्विशः प्प्रागुरुशिजो वह्नितमान् ।
देव त्वष्टर्व्वसु रम हव्व्या ते स्वदन्ताम् ॥७॥
[क]रेवती रमद्ध्वम्बृहस्पते धारया वसूनि ।
[र]ऋतस्य त्वा देवहविः पाशेन प्प्रतिमुञ्चामि धर्षा मानुषः ॥८॥
[क]देवस्य त्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्याम् । [र]अग्नीषोमा-
ब्भ्याञ्जुष्टन्नियुनज्मि । अद्भ्यस्त्वौषधीब्भ्योनु त्वा माता मन्न्यतामनु पितानु-
ब्भ्राता सगब्भ्र्योनु सखा सयूथ्थ्यः । [उ]अग्नीषोमाब्भ्यान्त्वा जुष्टम्प्रोक्षामि ॥९॥
[क]अपाम्पेरुरस्यापो देवीः स्वदन्तु स्वात्तञ्चित्सद्देवहविः । [र]सन्ते प्प्राणो व्वातेन गच्छताꣳ
समङ्गानि यजत्रैः सँय्यज्ञपतिराशिषा ॥१०॥
[क]घृतेनाक्तौ पशूँस्त्रायेथाꣳ रेवति यजमाने प्प्रियन्धाऽआविश । [र]उरोरन्तरिक्षात्सजूर्द्दे-
वेन व्वातेनास्य हविषस्त्मना यज समस्य तन्न्वा भव । [उ]वर्षो वर्षीयसि यज्ञे यज्ञ-
पतिन्धाः स्वाहा देवेब्भ्यो देवेब्भ्यः स्वाहा ॥११॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

३॥ माहिर्भूर्म्मा पृदाकुर्न्नमस्तऽआतानानर्वा प्रेहि ।
घृतस्य कुल्याऽउपऽऋतस्य पत्थ्याऽअनु ॥१२॥
देवीरापः शुद्धा वोढ्वꣳ सुपरिविष्टा देवेषु सुपरिविष्टा वयम्परिवेष्टारो भूयास्म ॥१३॥
वाचन्ते शुन्धामि प्प्राणन्ते शुन्धामि चक्क्षुस्ते शुन्धामि श्श्रोत्रन्ते शुन्धामि नाभिन्ते
शुन्धामि मेढ्रन्ते शुन्धामि पायुन्ते शुन्धामि चरित्राँस्ते शुन्धामि ॥१४॥
मनस्तऽआप्प्यायताँवाक्तऽआप्प्यायताम्प्राणस्तऽआप्प्यायताञ्चक्क्षुस्तऽआप्प्याय-
ताꣳ श्श्रोत्रन्तऽआप्प्यायताम् । यत्ते क्क्रूरँय्यदास्थितन्तत्तऽआप्प्यायतान्निष्ट्यायताम्-
यतान्तत्ते शुद्ध्यतु शमहोब्भ्यः । ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः ॥१५॥
रक्क्षसाम्भागोसि निरस्तꣳ रक्क्षऽइदमहꣳ रक्क्षोभि तिष्ठामीदमहꣳ रक्क्षोवबाध
ऽइदमहꣳ रक्क्षोधमन्तमो नयामि । घृतेन द्यावापृथिवी प्प्रोर्ण्णुवाथाँवायो वे स्तोका-
नामग्निराज्ज्यस्य वेतु स्वाहा स्वाहाकृतेऽऊर्द्ध्वनभसम्मारुतङ्गच्छतम् ॥१६॥
इदमापः प्प्रवहतावद्यञ्च मलञ्च यत् । यच्चाभिदुद्द्रोहानृतँय्यच्च शेपेऽअभीरुणम् ।
आपो मा तस्म्मादेनसः पवमानश्च मुञ्चतु ॥१७॥

४॥ सन्ते मनो मनसा सम्प्राणः प्प्राणेन गच्छताम् । रेडस्यग्निष्ट्वा श्श्रीणात्त्वापस्त्वा
समरिणन्वातस्य त्वा द्धाज्ज्यै पूष्णो रꣳह्याऽऊष्मणो व्यथिषत्प्रयुतन्द्वेषः ॥१८॥
घृतङ्घृतपावानः पिबत वसाँवसापावानः पिबतान्तरिक्क्षस्य हविरसि स्वाहा ।
दिशः प्प्रदिशऽआदिशो विदिशऽउद्दिशो दिग्ग्भ्यः स्वाहा ॥१९॥
ऐन्द्रः प्प्राणोऽअङ्गेऽअङ्गे निदीद्ध्यदैन्द्रऽउदानोऽअङ्गेऽअङ्गे निधीतः । देव त्वष्टर्भूरि
ते सꣳ समेतु सलक्ष्मा यद्विषुरूपम्भवाति । देवत्रा यन्तमवसे सखायोनु त्वा माता
पितरो मदन्तु ॥२०॥

५॥ समुद्द्रङ्गच्छ स्वाहान्तरिक्क्षङ्गच्छ स्वाहा देवꣳ सवितारङ्गच्छ स्वाहा मित्त्रावरुणौ
गच्छ स्वाहाहोरात्रे गच्छ स्वाहा च्छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ
स्वाहा यज्ञङ्गच्छ स्वाहा सोमङ्गच्छ स्वाहा दिव्यन्नभो गच्छ स्वाहाग्निँवैश्श्वानरङ्गच्छ
स्वाहा मनो मे हार्द्दि यच्छ दिवन्ते धूमो गच्छतु स्वर्ज्ज्योतिः पृथिवीम्भस्म्मनापृण
स्वाहा ॥२१॥
मापो मौषधीर्हिꣳसीर्द्धाम्नोधाम्नो राजँस्ततो वरुण नो मुञ्च । यदाहुरघ्न्याऽइति
वरुणेति शपामहे ततो वरुण नो मुञ्च । सुमित्त्रिया नऽआपऽओषधयः सन्तु दुर्म्मित्त्रि-
यास्तस्म्मै सन्तु योस्म्मान्द्वेष्टि यञ्च वयन्द्विष्म्मः ॥२२॥

॥६॥ हविष्मतीरिमाऽआपो हविष्म्माँ२॥ऽआविवासति ।
हविष्म्मान्देवोऽअद्ध्वरो हविष्म्माँ२॥ऽअस्तु सूर्य्यः ॥२३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अग्नेर्वोऽपन्नगृहस्य सदसि सादयामीन्द्राग्ग्न्योर्भागधेयी स्त्थ मित्रावरुणयोर्भागधेयी स्त्थ विश्श्वेषान्देवानाम्भागधेयी स्त्थ । अमूर्य्याऽउप सूर्य्ये याभिर्वा सूर्य्यः सह । ता नो हिन्वन्त्वद्ध्वरम् ॥२४॥

॥७॥ हृदे त्वा मनसे त्वा दिवे त्वा सूर्य्याय त्वा ।
ऊर्द्ध्वमिममद्ध्वरन्दिवि देवेषु होत्रा यच्छ ॥२५॥

सोम राजन्विश्श्वास्त्वम्प्रजाऽउपावरोह विश्श्वास्त्वाम्प्रजाऽउपावरोहन्तु । शृणोत्वग्निः समिधा हवम्मे शृण्वन्त्वापो धिषणाश्च देवीः । श्रोता ग्रावाणो विदुषो न यज्ञꣳ शृणोतु देवः सविता हवम्मे स्वाहा ॥२६॥

देवीरापोऽअपान्नपाद्यो वऽऊर्म्मिर्हविष्य्यऽइन्द्रियावान्मदिन्तमः ।
तन्देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषाम्भाग स्त्थ स्वाहा ॥२७॥

कार्षिरसि समुद्रस्य त्वा क्षित्त्याऽउन्नयामि ।
समापोऽअद्भिरग्ग्मत समोषधीभिरोषधीः ॥२८॥

यमग्ने पृत्सु मर्त्यमवा वाजेषु यञ्जुनाः । स यन्ता शश्वतीरिषः स्वाहा ॥२९॥

॥८॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । आददे रावासि गभीरमिममद्ध्वरङ्कृधीन्द्राय सुषूतमम् । उत्तमेन पविनोर्ज्जस्वन्तम्मधुमन्तम्पयस्वन्तन्निग्ग्राभ्या स्त्थ देवश्श्रुतस्तर्प्पयत मा ॥३०॥

मनो मे तर्प्पयत वाचम्मे तर्प्पयत प्राणम्मे तर्प्पयत चक्षुर्म्मे तर्प्पयत श्रोत्रम्मे तर्प्पयतात्त्मानम्मे तर्प्पयत प्रजाम्मे तर्प्पयत पशून्मे तर्प्पयत गणान्मे तर्प्पयत गणा मे मा वितृषन् ॥३१॥

इन्द्राय त्वा वसुमते रुद्रवतऽइन्द्राय त्वादित्यवतऽइन्द्राय त्वाभिमातिघ्ने ।
श्येनाय त्वा सोमभृतेऽग्नये त्वा रायस्पोषदे ॥३२॥

यत्ते सोम दिवि ज्योतिर्य्यत्पृथिव्याँय्यदुरावन्तरिक्षे ।
तेनास्मै यजमानायोरु राये कृद्ध्यधि दात्रे वोचः ॥३३॥

श्वात्रा स्त्थ वृत्रतुरो राधोगूर्त्ताऽअमृतस्य पत्नीः । ता देवीर्द्देवत्रेमँय्यज्ञन्नयतोपहूताः सोमस्य पिबत ॥३४॥

मा भेर्म्मा संविक्थाऽऊर्ज्जन्धत्स्व धिषणे वीड्वी सती वीडयेथामूर्ज्जन्दधाथाम् ।
पाप्मा हतो न सोमः ॥३५॥

प्रागपागुदगधराक्सर्वतस्त्वा दिशऽआधावन्तु । अम्ब निष्पर समरीर्विदाम् ॥३६॥

त्वमङ्ग प्रशꣳसिषो देवः शविष्ठ मर्त्त्यम् । न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥३७॥

इति षष्ठोऽध्यायः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ सप्तमोऽध्यायः

ऋषिः—गोतमः १—६। वसिष्ठः ७। मधुच्छन्दाः ८, ३३। गृत्समदः ९, ३४। त्रसदस्युः १० मेधातिथिः ११। वत्सारः काश्यपः १२—२३। भरद्वाजः २४, २५, ३९। देवश्रवाः २६—३० विश्वामित्रः ३१, ३५—३८। त्रिशोकः ३२। वत्सः ४०। प्रस्कण्वः ४१। कुत्सः ४२। आङ्गिरसः ४३—४८॥

देवता—प्राणः १। सोमः २, २१। विद्वांसः ३, ४६। मघवा ४। ईश्वरः ५। योगी ६। वायुः ७। इन्द्रवायू ८। मित्रावरुणौ ९, १०। अश्विनौ ११। विश्वेदेवाः १२—१७, १९, २२—२४, ३२—३४। प्रजापतिः १८, २९, ३०, ३५—३८, ४०, ४४, ४५। यज्ञः २०, २६। वैश्वानरः २५। यज्ञपतिः २७, २८। इन्द्राग्नी ३१। प्रजासेनापतिः ३९। सूर्य्यः ४१, ४२। अन्तर्य्यामी जगदीश्वरः ४३। वरुणः ४७। आत्मा ४८॥

छन्दः—निचृदार्ष्यनुष्टुप् १। निचृदार्षीपङ्क्तिः २। विराड्ब्राह्मीजगती ३। आर्ष्युष्णिक् ४, ४८। आर्षीपङ्क्तिः ५। भुरिक्त्रिष्टुप् ६। निचृज्जगती ७। आर्षीगायत्री[क], स्वराडार्षीगायत्री[र] ८, आर्षीगायत्री[क], आसुरीगायत्री[र] ९। ब्राह्मीबृहती १०। ब्राह्म्युष्णिक् ११। निचृदार्षीजगती[क], पङ्क्तिः[र] १२। निचृदार्षीत्रिष्टुप्[क], प्राजापत्यागायत्री[र] १३। विराड्जगती १४। निचृद्ब्राह्म्यनुष्टुप् १५। निचृदार्षीत्रिष्टुप्[क], साम्नीगायत्री १६। स्वराड्ब्राह्मीत्रिष्टुप् १७। निचृत्त्रिष्टुप्[क], प्राजापत्यागायत्री[र] १८। भुरिगार्षीपङ्क्तिः १९। निचृदार्षीजगती २०। स्वराड्ब्राह्मीत्रिष्टुप्[क], याजुषीजगती[र] २१। निचृदष्टिः २२। अनुष्टुप्[१], प्राजापत्यानुष्टुप्[२] स्वराट्साम्न्यनुष्टुप्[३] भुरिगार्चीगायत्री[४], भुरिक्साम्न्यनुष्टुप्[५] २३। आर्षीत्रिष्टुप् २४, ३१। याजुष्यनुष्टुप्[क], विराडार्षीबृहती[र], , २५। स्वराड्ब्राह्मीबृहती २६। आसुर्य्यनुष्टुप्[१], [२], [६], आसुर्य्युष्णिक् [३], [७], साम्नीगायत्री[४], आसुरीगायत्री[५] २७। ब्राह्मीबृहती २८। आर्चीपङ्क्तिः[क], भुरिक्साम्नीपङ्क्तिः[र] २९। साम्नीगायत्री [१], [३], [४], [५], [९], [११], आसुर्य्यनुष्टुप् [२], [६], [१०], [१२], याजुषीपङ्क्तिः [७], [८], आसुर्य्युष्णिक् [१३]. ३०। आर्षीगायत्री[क], आर्च्युष्णिक्[र] ३२। आर्षीगायत्री[क], आर्चीबृहती[र], ३३। आर्षीगायत्री[क], निचृदार्ष्युष्णिक्[र] ३४। आर्षीत्रिष्टुप्[क], आर्ष्युष्णिक्[र] ३५। विराडार्षीत्रिष्टुप्[१], आर्ष्युष्णिक्[२], साम्न्युष्णिक्[३] ३६। निचृदार्षीत्रिष्टुप्[क], प्राजापत्यात्रिष्टुप्[र] ३७, ३८। भुरिक्पङ्क्तिः[क], साम्नीत्रिष्टुप्[र] ३९। आर्षीगायत्री[क], विराडार्षीगायत्री[र] ४०। भुरिगार्षीगायत्री ४१। भुरिगार्षीत्रिष्टुप् ४२, ४३, ४४, ४६। विराड्जगती ४५। भुरिक्प्राजापत्याजगती[१], स्वराट्प्राजापत्याजगती[२], निचृदार्चीजगती[३], विराडार्चीजगती[४] ४७॥

स्वरः—गान्धारः १, १५। पञ्चमः २, ५, १९, २९। निषादः ३, ७, १४, २०, ४५, ४७। ऋषभः ४, ११, ४८। धैवतः ६, १७, २४, ३१, ३७, ३८, ४२—४४, ४६। षड्जः ८, ९, ४०, ४१। मध्यमः १०, २२, २६, २८, निषादः[क] पञ्चमः[र] १२। धैवतः[क], षड्जः[र] १३, १६, १८। धैवतः[क], निषादः[र] २१। गान्धारः [१], [२], [३], [५], षड्जः[४] २३। गान्धारः[क], मध्यमः[र] २५। गान्धारः[१], [२], [६], ऋषभः [३], [७], षड्जः [४], [५] २७। षड्जः [१], [३], [४], [५], [९], [११], गान्धारः [२], [६], [१०], [१२], पञ्चमः [७], [८], ऋषभः [१३], ३० षड्जः[क], ऋषभः[र] ३२, ३४। षड्जः[क], मध्यमः[र] ३३। धैवतः[क], ऋषभः[र], ३५, ३६। पञ्चमः[क], धैवतः[र] ३९॥

॥१॥ वाचस्पतये पवस्व वृष्णोऽअꣳशुभ्यां गभस्तिपूतः। देवो देवेभ्यः पवस्व
येषां भागोऽसि ॥१॥
मधुमतीर्न्नऽइषस्कृधि यत्ते सोमादाभ्यन्नाम जागृवि तस्मै ते सोम सोमाय
स्वाहा स्वाहोर्वन्तरिक्षमन्वेमि ॥२॥
स्वाङ्कृतोऽसि विश्वेभ्यऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा
त्वा सुभव सूर्य्याय देवेभ्यस्त्वा मरीचिपेभ्यो देवाꣳशो यस्मै त्वेडे तत्सत्यमु-
परिप्रुता भङ्गेन हतोऽसौ फट् प्राणाय त्वा व्यानाय त्वा ॥३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥२॥ उपयामगृहीतोस्यन्तर्य्यच्छ मघवन्पाहि सोमम् । उरुष्य रायऽएषो यजस्व ॥४॥
अन्तस्ते द्यावापृथिवी दधाम्म्यन्तर्दधाम्म्युर्व्वन्तरिक्षम् । सजूर्द्देवेभिरवरैः परैश्चा-
न्तर्य्यामे मघवन्मादयस्व ॥५॥
स्वाङ्कृतोसि विश्श्वेब्भ्यऽइन्द्रियेब्भ्यो दिव्येब्भ्यः पार्त्थिवेब्भ्यो मनस्त्वाष्टु स्वाहा त्वा
सुभव सूर्य्याय देवेब्भ्यस्त्वा मरीचिपेब्भ्यऽउदानाय त्वा ॥६॥
॥३॥ आ वायो भूष शुचिपाऽउप नः सहस्रन्ते नियुतो विश्श्ववार । उपो तेऽअन्धो मद्य-
मयामि यस्य देव दधिषे पूर्व्वपेयँ वायवे त्वा ॥७॥
इन्द्रवायूऽइमे सुताऽउप प्प्रयोभिरागतम् । इन्दवो वामुशन्ति हि । उपयामगृहीतोसि
वायवऽइन्द्रवायुब्भ्यान्त्वैष ते योनिः सजोषोब्भ्यान्त्वा ॥८॥
॥४॥ अयँ वाम्मित्रावरुणा सुतः सोमऽऋतावृधा । ममेदिह श्श्रुतँ हवम् । उपयामगृही-
तोसि मित्रावरुणाब्भ्यान्त्वा ॥९॥
राया वयँ ससवाँसो मदेम हव्येन देवा यवसेन गावः । तान्धेनुम्मित्रावरुणा
युवन्नो विश्श्वाहा धत्तमनपस्प्फुरन्तीमेष ते योनिर्ऋतायुब्भ्यान्त्वा ॥१०॥
॥५॥ या वाङ्कशा मधुमत्त्यश्श्विना सूनृतावती । तया यज्ञम्मिमिक्षतम् । उपयामगृही-
तोस्यश्श्विब्भ्यान्त्वैष ते योनिर्म्माद्ध्वीब्भ्यान्त्वा ॥११॥
॥६॥ तम्प्रत्क्नथा पूर्व्वथा विश्श्वथेमथा ज्येष्ठतातिम्बर्हिषदँ स्वर्व्विदम् । प्रतीचीनँ वृज-
नन्दोहसे धुनिमाशुञ्जयन्तमनु यासु वर्द्धसे । उपयामगृहीतोसि शण्डाय त्वैष ते योनि-
र्व्वीरताम्पाह्यपमृष्टः शण्डो देवास्त्वा शुक्क्रपाः प्प्रणयन्त्वनाधृष्टासि ॥१२॥
सुवीरो वीरान्प्रजनयन्परीह्यभि रायस्प्पोषेण यजमानम् । सञ्जग्ग्मानो दिवा पृथिव्या
शुक्क्रः शुक्क्रशोचिषा निरस्तः शण्डः शुक्क्रस्याधिष्ठानमसि ॥१३॥
अच्छिन्नस्य ते देव सोम सुवीर्य्यस्य रायस्प्पोषस्य ददितारः स्याम । सा प्प्रथमा
सँस्कृतिर्व्विश्श्ववारा स प्प्रथमो वरुणो मित्त्रोऽअग्ग्निः ॥१४॥
स प्प्रथमो बृहस्प्पतिश्चिकित्त्वाँस्तस्म्माऽइन्द्राय सुतमा जुहोत स्वाहा । तृम्पन्तु होत्रा
मद्ध्वो याः स्विष्टा याः सुप्प्रीताः सुहुता यत्स्वाहायाडग्ग्नीत् ॥१५॥
॥७॥ अयँ वेनश्चोदयत्पृश्श्निगर्ब्भा ज्योतिर्ज्जरायू रजसो विमाने । इममपाँ सङ्गमे सूर्य्यस्य
शिशुन्न विप्प्रा मतिभी रिहन्ति । उपयामगृहीतोसि मर्क्काय त्वा ॥१६॥
मनो न येषु हवनेषु तिग्ग्मँ विपः शच्च्या वनुथो द्रवन्ता । आ यः शर्य्याभिस्तुविनृम्म्णोऽअस्याश्श्रीणीतादिशङ्गभस्त्तावेष ते योनिः प्प्रजाः पाह्यपमृष्टो मर्क्को देवा-
स्त्वा मन्थिपाः प्प्रणयन्त्वनाधृष्टासि ॥१७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[क]सुप्प्रजाः प्प्रजाः प्प्रजनयन्परीह्यभि रायस्प्पोषेण यजमानम् । सञ्जग्ग्मानो दिवा पृथिव्या मन्थी मन्थिशोचिषा निरस्तो मर्क्को[र]मन्थिनोधिष्ठानमसि ॥१८॥

॥८॥ ये देवासो दिव्व्येकादश स्त्थ पृथिव्व्यामद्ध्येकादश स्त्थ । अप्सुक्षितो महिनैकादश स्त्थ ते देवासो यज्ञमिमञ्जुषद्ध्वम् ॥१९॥

उपयामगृहीतोस्याग्ग्रयणोसि स्वाग्ग्रयणः । पाहि यज्ञम्पाहि यज्ञपतिँविष्णुस्त्वा-मिन्द्रियेण पातु विष्णुन्त्वम्पाह्यभि सवनानि पाहि ॥२०॥

[क]सोमः पवते सोमः पवतेस्म्मै ब्रह्मणेस्म्मै क्षत्रायास्म्मै सुन्वते यजमानाय पवतऽइषऽऊर्ज्जे पवतेद्भ्यऽओषधीब्भ्यः पवते द्यावापृथिवीब्भ्याम्पवते सुभूताय पवते विश्श्वेब्भ्यस्त्वा देवेब्भ्यऽएष ते योनिर्विश्श्वेब्भ्यस्त्वा देवेब्भ्यः ॥२१॥

॥९॥ उपयामगृहीतोसीन्द्राय त्वा बृहद्वते वयस्वतऽउक्क्थाव्व्यङ्गृह्णामि । यत्तऽइन्द्र बृहद्वयस्तस्म्मै त्वा विष्ण्णवे त्वैष ते योनिरुक्क्थेब्भ्यस्त्वा देवेब्भ्यस्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामि ॥२२॥

[१]मित्रावरुणाब्भ्यान्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामीन्द्राय त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामीन्द्राग्निब्भ्यान्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामीन्द्रावरुणाब्भ्यान्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामीन्द्राबृहस्पतिब्भ्यान्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामीन्द्राविष्ण्णुब्भ्यान्त्वा देवाव्व्यँय्यज्ञस्यायुषे गृह्णामि ॥२३॥

॥१०॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्या वैश्श्वानरमृतऽआजातमग्निम् ।
कविँ सम्म्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः ॥२४॥

[क]उपयामगृहीतोसि[२]ध्रुवोसि ध्रुवक्षितिर्ध्रुवाणान्ध्रुवतमोच्च्युतानामच्च्युतक्षित्तमऽएष ते योनिर्वैश्श्वानराय त्वा ।[३]ध्रुवन्ध्रुवेण मनसा वाचा सोममवनयामि । अथा नऽइन्द्र ऽइद्विशोसपत्नाः समनसस्करत् ॥२५॥

॥११॥ यस्ते द्रप्प्स स्कन्दति यस्तेऽअँशुर्ग्रावच्च्युतो धिषणयोरुपस्त्थात् ।
अद्ध्वर्य्योर्वा परि वा यः पवित्रात्तन्ते जुहोमि मनसा वषट्कृतँ स्वाहा देवानामुत्क्क्रमणमसि ॥२६॥

॥१२॥ [१]प्राणाय मे वर्च्चोदा वर्च्चसे पवस्व[२]व्व्यानाय मे वर्च्चोदा वर्च्चसे पवस्वोदानाय मे वर्च्चोदा वर्च्चसे पवस्व वाचे मे वर्च्चोदा वर्च्चसे पवस्व क्क्रतूदक्षाब्भ्याम्मे वर्च्चोदा वर्च्चसे पवस्व [६]श्श्रोत्राय मे वर्च्चोदा वर्च्चसे पवस्व चक्क्षुर्ब्भ्याम्मे वर्च्चोदसौ वर्च्चसे पवेथाम् ॥२७॥

आत्म्मने मे वर्च्चोदा वर्च्चसे पवस्वौजसे मे वर्च्चोदा वर्च्चसे पवस्वायुषे मे वर्च्चोदा वर्च्चसे पवस्व विश्श्वाब्भ्यो मे प्प्रजाब्भ्यो वर्च्चोदसौ वर्च्चसे पवेथाम् ॥२८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कोसि कतुमोसि कस्यासि को नामासि । यस्य ते नामामन्महि यन्त्वा सोमेनातीतृपाम । भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याᳬं सुवीरो वीरैः सुपोषः पोषैः ॥२९॥

॥१३॥ उपयामगृहीतोसि मधवे त्वोपयामगृहीतोसि माधवाय त्वोपयामगृहीतोसि शुक्राय त्वोपयामगृहीतोसि शुचये त्वोपयामगृहीतोसि नभसे त्वोपयामगृहीतोसि नभस्याय त्वोपयामगृहीतोसीषे त्वोपयामगृहीतोस्यूर्जे त्वोपयामगृहीतोसि सहसे त्वोपयामगृहीतोसि सहस्याय त्वोपयामगृहीतोसि तपसे त्वोपयामगृहीतोसि तपस्याय त्वोपयामगृहीतोस्यᳪहसस्पतये त्वा ॥३०॥

॥१४॥ इन्द्राग्नीऽआगतᳪ सुतङ्गीर्भिर्नभो वरेण्यम् । अस्य पातन्धियेषिता । उपयामगृहीतोसीन्द्राग्निभ्यान्त्वैष ते योनिरिन्द्राग्निभ्यान्त्वा ॥३१॥

॥१५॥ आ घा येऽअग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा । उपयामगृहीतोस्यग्नीन्द्राभ्यान्त्वैष ते योनिरग्नीन्द्राभ्यान्त्वा ॥३२॥

॥१६॥ ओमासश्चर्षणीधृतो विश्वे देवासऽआगत । दाश्वाᳬंसो दाशुषः सुतम् । उपयामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥३३॥

॥१७॥ विश्वे देवासऽआगत शृणुता मऽइमᳪ हवम् । एदम्बर्हिर्निषीदत । उपयामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्यऽएष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥३४॥

॥१८॥ इन्द्र मरुत्वऽइह पाहि सोमँय्यथा शार्य्यातेऽअपिबः सुतस्य । तव प्रणीती तव शूर शर्म्मन्नाविवासन्ति कवयः सुयज्ञाः । उपयामगृहीतोसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥३५॥

॥१९॥ मरुत्वन्तँवृषभँवावृधानमकवारिन्दिव्यᳪ शासमिन्द्रम् । विश्वासाहमवसे नूतनायोग्रᳪ सहोदामिह तᳪ हुवेम । उपयामगृहीतोसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ।

॥२०॥ उपयामगृहीतोसि मरुतान्त्वौजसे ॥३६॥

॥२१॥ सजोषाऽइन्द्र सगणो मरुद्भिः सोमम्पिब वृत्रहा शूर विद्वान् । जहि शत्रूँ॥रप मृधो नुदस्वाथाभयङ्कृणुहि विश्वतो नः । उपयामगृहीतोसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥३७॥

॥२२॥ मरुत्वाँ२॥ऽइन्द्र वृषभो रणाय पिबा सोममनुष्वधम्मदाय । आसिञ्चस्व जठरे मध्वऽऊर्म्मिन्त्वᳪ राजासि प्रतिपत्सुतानाम् । उपयामगृहीतोसीन्द्राय त्वा मरुत्वतऽएष ते योनिरिन्द्राय त्वा मरुत्वते ॥३८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥२३॥ [क]मुहाँ२॥ऽइन्द्रो नृवदाचर्षणिप्प्राऽउत द्विबर्हाऽअमिनः सहोभिः। अस्म्मुद्र्यग्ग्वावृधे वीर्य्यायोरुः पृथुः सुकृतः कर्तृभिर्ब्भूत्। [२]उपयामगृहीतोसि महेन्द्राय त्त्वैष ते योनिर्म्महेन्द्राय त्त्वा ॥३९॥

॥२४॥ [क]मुहाँ२॥ऽइन्द्रो यऽओजसा पुर्ज्जन्यो वृष्टिमाँ२॥ऽइव। स्तोमैर्व्वत्सस्य वावृधे। [२]उपयामगृहीतोसि महेन्द्राय त्त्वैष ते योनिर्म्महेन्द्राय त्त्वा ॥४०॥

॥२५॥ उदु त्त्यञ्जातवेदसन्देवँवहन्ति केतवः। दृशे विश्श्वाय सूर्य्यँ स्वाहा ॥४१॥

चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य वरुणस्याग्ग्नेः।

आप्प्रा द्यावापृथिवीऽअन्तरिक्षँ सूर्य्यऽआत्त्मा जगतस्तस्थुषश्च स्वाहा ॥४२॥

अग्ग्ने नय सुपथा रायेऽअस्म्मान्विश्श्वानि देव वयुनानि विद्वान्।

युयोद्ध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिँविधेम स्वाहा ॥४३॥

अयन्नोऽअग्ग्निर्व्वरिवस्कृणोत्त्वयम्मृधः पुरऽएतु प्प्रभिन्दन्।

अयँवाजाञ्जयतु वाजसातावयँ शत्रूञ्जयतु जर्हृषाणः स्वाहा ॥४४॥

रूपेण वो रूपमब्भ्यागान्तुथो वो विश्श्ववेदा विभजतु।

ऋतस्य पथा प्प्रेत चन्द्रदक्षिणा विस्वः पश्श्य व्व्यन्तरिक्षँय्यतस्व सदस्यैः ॥४५॥

ब्राह्मणमद्य विदेयम्पितृमन्तम्पैतृमत्त्यमृषिमार्षेयँ सुधातुदक्षिणम्।

अस्म्मद्राता देवत्रा गच्छत प्प्रदातारमाविशत ॥४६॥

[१]अग्ग्नये त्त्वा मह्यँवरुणो ददातु सोमृतत्त्वमशीयायुर्द्दात्रऽएधि मयो मह्यम्प्रतिग्ग्रहीत्रे [२]रुद्राय त्त्वा मह्यँवरुणो ददातु सोमृतत्त्वमशीय प्प्राणो दात्रऽएधि वयो मह्यम्प्रतिग्ग्रहीत्रे [३]बृहस्प्पतये त्त्वा मह्यँवरुणो ददातु सोमृतत्त्वमशीय त्त्वग्ग्दात्रऽएधि मयो मह्यम्प्रतिग्ग्रहीत्रे [४]यमाय त्त्वा मह्यँवरुणो ददातु सोमृतत्त्वमशीय हयो दात्रऽएधि वयो मह्यम्प्रतिग्ग्रहीत्रे ॥४७॥

कोदात्कस्म्माऽअदात्कामोदात्कामायादात्।

कामो दाता कामः प्प्रतिग्ग्रहीता कामैतत्ते ॥४८॥

इति सप्तमोऽध्यायः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथाष्टमोऽध्यायः

अ॰ ८, अनु॰ १ , मन्त्रः १

ऋषिः—आङ्गिरसः १—३ । कुत्सः ४, ५ । भरद्वाजः ६—१४ । अत्रिः १५—२२, २४—३० । अत्रिः[उ], शुनःशेपः[क] २३ । गोतमः ३१, ३३, ३५ । मेधातिथिः ३२ । मधुच्छन्दाः ३४ । विवस्वान् ३६, ३७ । वैखानसः ३८, ३९ । प्रस्कण्वः ४०, ४१ । कुसुरुविन्दुः ४२, ४३ । शासः ४४—४७ । देवाः ४८—५३ । वसिष्ठः ५४—६२ । कश्यपः ६३ ॥

देवता—बृहस्पतिस्सोमः १ । गृहपतिर्मघवा २ । आदित्यो गृहपतिः ३, ४ । गृहपतयः ५, ६, १०—१२, १४—१६, १८, २०—२६, ३३—३५, ५३ । सविता गृहपतिः ७ । विश्वेदेवा गृहपतयः ८, १७, १९ । गृहपतयो विश्वेदेवाः ९, १३ । दम्पती २७—३२ । परमेश्वरः ३६ । सम्राड्माण्डलिकौ राजानौ ३७ । राजादयो गृहपतयः ३८, ४० । राजादयो गृहस्थाः ३९ । सूर्यः ४१ । पत्नी ४२, ४३ । इन्द्रः ४४ । ईश्वरसभेशौ राजानौ ४५ । विश्वकर्मेन्द्रः ४६, ४७ । प्रजापतयः ४८, ५० । विश्वेदेवाः प्रजापतयः ४९ । प्रजापतयो गृहस्थाः ५१ । प्रजापतिः ५२ । परमेष्ठी प्रजापतिः ५४ । इन्द्रादयः ५५ । विश्वेदेवाः गृहस्थाः ५६ । विश्वेदेवाः ५७—६१ । यज्ञः ६२, ६३ ॥

छन्दः—आर्चीपङ्क्तिः १ । भुरिगार्षीपङ्क्तिः २ । निचृदार्षीपङ्क्तिः ३ । निचृज्जगती ४ । प्राजापत्यानुष्टुप्[क], निचृदार्षीजगती[र] ५ । निचृदार्षीत्रिष्टुप् ६, १९ । विराड्ब्राह्म्यनुष्टुप् ७ । प्राजापत्यागायत्री[क], निचृदार्षीबृहती[र] ८ । प्राजापत्यागायत्री[उ], आर्ष्युष्णिक्[क], स्वराडार्षीपङ्क्तिः[र] ९ । विराड्ब्राह्मीबृहती १०, ४७ । भुरिगार्ष्यनुष्टुप् ११ । आर्षीपङ्क्तिः १२,४३,५५ । निचृत्साम्न्युष्णिक्[१], [३], [४] । साम्न्युष्णिक्[६], प्राजापत्योष्णिक्[५], निचृदार्ष्युष्णिक्[६], १३ । विराडार्षीत्रिष्टुप् १४, १६ । भुरिगार्षीत्रिष्टुप् १५, ३६ । स्वराडार्षीत्रिष्टुप् १७, २०, ६२ । आर्षीत्रिष्टुप् १८, २४ । स्वराडार्ष्युष्णिक् २१ । विराडार्च्युष्णिक्[क], विराडार्चीबृहती[र] २२ । याजुष्युष्णिक्[उ], निचृदार्षीत्रिष्टुप्[क], आसुरीगायत्री[र] २३ । भुरिगार्षीपङ्क्तिः २५ । स्वराडार्षीबृहती २६ । भुरिक्प्राजापत्यानुष्टुप्[क], स्वराडार्षीबृहती[र] २७ । भुरिक्साम्न्युष्णिक्[उ], प्राजापत्यानुष्टुप्[क], भुरिगासुर्युष्णिक्[र] २८ । भुरिगार्ष्यनुष्टुप् २९ । आर्षीजगती ३० । आर्षीगायत्री ३१,३२ । आर्ष्यनुष्टुप्[क] आर्ष्युष्णिक्[र] ३३ । विराडार्ष्यनुष्टुप्[क], आर्ष्युष्णिक्[र] ३४ । विराडार्ष्यनुष्टुप्[क], आर्ष्युष्णिक्[र] ३५ । साम्नीत्रिष्टुप्[क], विराडार्चीत्रिष्टुप्[र] ३७ । भुरिक्पादनिचृद्गायत्री[उ], स्वराडार्च्यनुष्टुप्[क], भुरिगार्च्यनुष्टुप्[र] ३८ । आर्षीगायत्री[उ], [क], आर्च्युष्णिक्[र] ३९ । आर्षीगायत्री[उ], [र], स्वराडार्षीगायत्री ४० । निचृदार्षीगायत्री[क], स्वराडार्षीगायत्री[र] ४१ । स्वराड्ब्राह्म्युष्णिक् ४२ । निचृदनुष्टुप्[क], स्वराडार्षीगायत्री[र] ४४ । भुरिगार्षीत्रिष्टुप्[क], विराडार्ष्यनुष्टुप्[र] ४५ । निचृदार्षीत्रिष्टुप्[क], विराडार्ष्यनुष्टुप्[र] ४६ । आसुरीत्रिष्टुप्[१], याजुषीजगती[२], [४], [५], याजुषीत्रिष्टुप्[३], साम्नीबृहती[६] ४८ । विराट्प्राजापत्याजगती[क], निचृदार्ष्युष्णिक्[र] ४९ । भुरिगार्षीजगती ५०, ५१ । निचृदार्षीबृहती ५२ । आर्ष्यनुष्टुप्[१], आसुर्युष्णिक्[२], प्राजापत्याबृहती[३], विराट्प्राजापत्यापङ्क्तिः[४] ५३ । निचृद्ब्राह्म्युष्णिक् ५४ । आर्षीबृहती ५६ । निचृद्ब्राह्मीबृहती ५७ । निचृदार्षीजगती ५८ । निचृदार्षीजगती[क], विराडार्षीगायत्री[र] ५९ । स्वराड्ब्राह्मीत्रिष्टुप् ६० । ब्राह्म्युष्णिक् ६१ । स्वराडार्षीगायत्री ६३ ॥

स्वरः—पञ्चमः १—३, १२, २५, ४३, ५५ । निषादः ४, ३०, ५०, ५१, ५८ । गान्धारः[क], निषादः[र] ५ धैवतः ६, १४—२०, २४, ३६, ३७, ६०, ६२ । गान्धारः ७, ११, २९, ३५ । षड्जः[क], मध्यमः[र] ८ । षड्जः[उ], ऋषभः[क], पञ्चमः[र] ९ । मध्यमः १०, २६, ४७, ५२, ५६, ५७ । ऋषभः १३, २१, ४२, ५४, ६१ । ऋषभः[क], मध्यमः[र] २२ । ऋषभः[उ], धैवतः[क], षड्जः[र] २३ । गान्धारः[क], मध्यमः[र], २७ । ऋषभः[उ], [र], गान्धारः[क] २८ । षड्जः ३१, ३२, ४०, ४१, ६३ । गान्धारः[क], ऋषभः[र] ३३, ३४, ३५ । षड्जः[क], गान्धारः[र] ३८ । षड्जः[उ], [क], ऋषभः[र] ३९ । गान्धारः[क], षड्जः[र] ४४ । धैवतः[क], गान्धारः[र] ४५, ४६ । धैवतः[१], [३], निषादः[२], [४], [५], मध्यमः[६] ४८ । निषादः[क], ऋषभः[र] ४९ । गान्धारः[१], ऋषभः[२], मध्यमः[३], पञ्चमः[४] ५३ । निषादः[क], षड्जः[र] ५९ ॥

॥१॥ उपयामगृहीतोस्यादित्येभ्यस्त्वा ।
विष्णंऽउरुगायैष ते सोमस्तꣳ रक्षस्व मा त्वा दभन् ॥१॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कुदा चुन स्तुरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवुन्भूयऽइन्नु ते दानन्देवस्य पृच्यतऽआदित्त्येब्भ्यस्त्वा ॥२॥
कुदा चुन प्प्रयुच्छस्युभे निपासि जन्मनी ।
तुरीयादित्त्यु सवनन्तऽइन्द्रियमातस्त्थावुमृतन्दिव्व्यादित्त्येब्भ्यस्त्वा ॥३॥
युज्ञो देवानाम्प्रत्त्येति सुम्नमादित्त्यासो भवता मृडयन्तः ।
आ वोर्वाची सुमतिर्ववृत्त्यादꣳहोश्चिद्या वरिवोवित्तरासदादित्त्येब्भ्यस्त्वा ॥४॥
[क]विवस्वन्नादित्त्यैष ते सोमपीथस्तस्मिन्मत्स्व ।[ख]श्रदस्मै नरो वचसे दधातन यदाशीर्दा दम्पती वाममश्नुतः । पुमान्पुत्रो जायते विन्दते वस्वधा विश्वाहारपऽएधते गृहे ॥५॥

॥२॥ वाममुद्य सवितर्वाममु श्वो दिवेदिवे वाममुस्मब्भ्यꣳ सावीः ।
वामस्यु हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥६॥
उपयामगृहीतोसि सावित्रोसि चनोधाश्चनोधाऽअसि चनो मयि धेहि ।
जिन्व युज्ञञ्जिन्व युज्ञपतिम्भगाय देवाय त्वा सवित्रे ॥७॥

॥३॥ [क]उपयामगृहीतोसि[ख]सुशर्म्मासि सुप्प्रतिष्ठानो बृहदुक्क्षाय नमः ।
विश्वेब्भ्यस्त्वा देवेब्भ्यऽएष ते योनिर्विश्वेब्भ्यस्त्वा देवेब्भ्यः ॥८॥

॥४॥ [उ]उपयामगृहीतोसि[क]बृहस्पतिसुतस्य देव सोम तऽइन्दोरिन्द्रियावतः पत्नीवतो ग्रहाꣳ॥ऽऋद्ध्यासम् ।[ख]अहम्पुरस्तादहमवस्ताद्यदन्तरिक्क्षन्तदु मे पिताभूत् । अहꣳ सूर्य्यमुभयतो ददर्शाहन्देवानाम्परमङ्गुहा यत् ॥९॥
अग्ना३॥ऽइ पत्नीवन्त्सजूर्देवेन त्वष्ट्रा सोमम्पिब स्वाहा । प्रजापतिर्वृषासि रेतोधा रेतो मयि धेहि प्रजापतेस्ते वृष्णो रेतोधसो रेतोधामशीय ॥१०॥

॥५॥ उपयामगृहीतोसि हरिरसि हारियोजनो हरिब्भ्यान्त्वा ।
हर्य्योर्द्धाना स्त्थ सहसोमाऽइन्द्राय ॥११॥
यस्तेऽअश्वसनिर्भक्षो यो गोसनिस्तस्य तऽइष्टयजुषस्तुतस्तोमस्य शस्तोक्थस्योपहूतस्योपहूतो भक्षयामि ॥१२॥

देवकृतस्यैनसोवयजनमसि[२]मनुष्यकृतस्यैनसोवयजनमसि[३]पितृकृतस्यैनसोवयजनमस्यात्मकृतस्यैनसोवयजनमस्यैनसऽएनसोवयजनमसि ।[४]यच्चाहमेनो विद्वाꣳश्चकार यच्चाविद्वाꣳस्तस्य सर्वस्यैनसोवयजनमसि ॥१३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सँव्वर्च्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टम् ॥१४॥

॥६॥ समिन्द्र णो मनसा नेषि गोभिः सꣳ सूरिभिर्म्मघवन्त्सꣳ स्वस्त्या ।
सम्ब्रह्मणा देवकृतँय्यदस्ति सन्देवानाꣳ सुमतौ यज्ञियानाꣳ स्वाहा ॥१५॥
सँव्वर्च्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टम् ॥१६॥
धाता रातिः सवितेदञ्जुषन्ताम्प्रजापतिर्न्निधिपा देवोऽअग्निः ।
त्वष्टा विष्णुः प्रजया सꣳरराणा यजमानाय द्रविणन्दधातु स्वाहा ॥१७॥
सुगा वो देवाः सदनाऽअकर्म्म यऽआजग्मेदꣳ सवनञ्जुषाणाः ।
भरमाणा वहमाना हवीꣳष्यस्मे धत्त वसवो वसूनि स्वाहा ॥१८॥
याँ२॥ऽआवहऽउशतो देव देवाँस्तान्प्रेरय स्वेऽअग्ने सधस्थे ।
जक्षिवाꣳसः पपिवाꣳसश्च विश्वेसुघर्म्मꣳ स्वरातिष्ठतानु स्वाहा ॥१९॥
वयꣳ हि त्वा प्रयति यज्ञेऽअस्मिन्नग्ने होतारमवृणीमहीह ।
ऋधगयाऽऋधगुताशमिष्ठाः प्रजानन्यज्ञमुपयाहि विद्वान्त्स्वाहा ॥२०॥
देवा गातुविदो गातुँव्वित्त्वा गातुमित ।
मनसस्पतऽइमन्देव यज्ञꣳ स्वाहा वाते धाः ॥२१॥
[क]यज्ञ यज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वाँय्योनिङ्गच्छ स्वाहा ।
[र]एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्व्ववीरस्तञ्जुषस्व स्वाहा ॥२२॥

॥७॥ [उ]माहिर्भूर्म्मा पृदाकुः । [क]उरुꣳ हि राजा वरुणश्चकार सूर्य्याय पन्थामन्वेतवाऽउ ।
अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयाविधश्चित् ।
[र]नमो वरुणायाभिष्ठितो वरुणस्य पाशः ॥२३॥
अग्नेरनीकमपऽआविवेशापान्नपात्प्रतिरक्षन्नसुर्य्यम् ।
दमेदमे समिधँय्यक्ष्यग्ने प्रति ते जिह्वा घृतमुच्चरण्यत्स्वाहा ॥२४॥
समुद्रे ते हृदयमप्स्वन्तः सन्त्वा विशन्त्वोषधीरुतापः ।
यज्ञस्य त्वा यज्ञपते सूक्तोक्तौ नमोवाके विधेम यत्स्वाहा ॥२५॥
देवीरापऽएष वो गर्ब्भस्तꣳ सुप्रीतꣳ सुभृतम्बिभृत ।
देव सोमैष ते लोकस्तस्मिञ्छञ्च वक्ष्व परि च वक्ष्व ॥२६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः। र अव देवैर्देवकृतमेनोयासिषमव मर्त्त्यैर्-
र्म्मर्त्त्यकृतम्पुरुराव्णो देव रिषस्पाहि। देवानाᳬं समिदसि ॥२७॥
॥८॥ उ एजतु दशमास्यो गर्ब्भो जरायुणा सह। क यथायँ वायुरेजति यथा समुद्रऽएजति।
र एवायन्दशमास्योऽअस्रज्जरायुणा सह ॥२८॥
यस्यै ते यज्ञियो गर्ब्भो यस्यै योनिर्हिरण्ययी। अङ्गान्यह्रुता यस्य तम्मात्रा
समजीगमᳬं स्वाहा ॥२९॥
पुरुदस्मो विषुरूपऽइन्दुरन्तर्म्महिमानमानञ्ज धीरः। एकपदीन्द्विपदीन्त्रिपदीञ्च-
तुष्पदीमष्टापदीम्भुवनानु प्प्रथन्ताᳬं स्वाहा ॥३०॥
मरुतो यस्य हि क्षये पाथा दिवो विमहसः। स सुगोपातमो जनः ॥३१॥
मही द्यौः पृथिवी च नऽइमँय्यज्ञम्मिमिक्षताम्। पिपृतान्नो भरीमभिः ॥३२॥
॥९॥ क आतिष्ठ वृत्रहन्रथँय्युक्ता ते ब्रह्मणा हरी। अर्वाचीनᳬं सु ते मनो ग्रावा कृणोतु
वग्नुना। र उपयामगृहीतोसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा
षोडशिने ॥३३॥
॥१०॥ क युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा। अथा नऽइन्द्र सोमपा गिरामुप-
श्श्रुतिञ्चर। र उपयामगृहीतोसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा
षोडशिने ॥३४॥
॥११॥ क इन्द्रमिद्धरी वहतोप्प्रतिधृष्टशवसम्। ऋषीणाञ्च स्तुतीरुप यज्ञञ्च मानुषाणाम्।
र उपयामगृहीतोसीन्द्राय त्वा षोडशिनऽएष ते योनिरिन्द्राय त्वा षोडशिने ॥३५॥
॥१२॥ यस्मान्न जातः परोऽअन्योऽअस्ति यऽआविवेश भुवनानि विश्वा। प्रजापतिः
प्प्रजया सᳬंरराणस्त्रीणि ज्योतीᳬंषि सचते स षोडशी ॥३६॥
क इन्द्रश्च सम्राड्वरुणश्च राजा तौ ते भक्षञ्चक्रतुरग्ग्रऽएतम्। र तयोरहमनु भक्षम्भ-
क्षयामि वाग्देवी जुषाणा सोमस्य तृप्यतु सह प्प्राणेन स्वाहा ॥३७॥
॥१३॥ उ अग्ने पवस्व स्वपाऽअस्मे वर्च्चः सुवीर्य्यम्। दधद्रयिम्मयि पोषम्। क उपयाम-
गृहीतोस्यग्नये त्वा वर्च्चसऽएष ते योनिरग्नये त्वा वर्च्चसे। र अग्ने वर्च्चस्विन्व-
र्च्चस्वाँस्त्वन्देवेष्वसि वर्च्चस्वानहम्मनुष्येषु भूयासम् ॥३८॥
॥१४॥ उ उत्तिष्ठन्नोजसा सह पीत्वी शिप्रेऽअवेपयः। सोममिन्द्र चमूसुतम्। क उपयाम-
गृहीतोसीन्द्राय त्वौजसऽएष ते योनिरिन्द्राय त्वौजसे। र इन्द्रौजिष्ठौजिष्ठस्त्वन्दे-
वेष्वस्योजिष्ठोहम्मनुष्येषु भूयासम् ॥३९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥१५॥ अदृश्रमस्य केतवो वि रश्मयो जनाँ२ ।ऽअनु । भ्राजन्तोऽअग्नयो यथा ।
उपयामगृहीतोसि सूर्य्याय त्वा भ्राजायैष ते योनिः सूर्य्याय त्वा भ्राजाय ।
सूर्य्य भ्राजिष्ठ भ्राजिष्ठस्त्वन्देवेष्ष्वसि भ्राजिष्ठोहम्मनुष्ष्येषु भूयासम् ॥४०॥
॥१६॥ उदु त्यञ्जातवेदसन्देवँव्वहन्ति केतवः । दृशे विश्श्वाय सूर्य्यम् । उपयामगृहीतोसि
सूर्य्याय त्वा भ्राजायैष ते योनिः सूर्य्याय त्वा भ्राजाय ॥४१॥
॥१७॥ आजिघ्र कलशम्मह्या त्वा विशन्त्विन्दवः । पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्र-
न्धुक्ष्वोरुधारा पयस्वती पुनर्म्माविशताद्रयिः ॥४२॥
इडे रन्ते हव्ये काम्म्ये चन्द्रे ज्योतेदिति सरस्वति महि विश्श्रुति ।
एता तेऽअघ्न्ये नामानि देवेब्भ्यो मा सुकृतम्ब्रूतात् ॥४३॥
॥१८॥ वि नऽइन्द्र मृधो जहि नीचा यच्छ पृतन्न्यतः । योऽअस्म्माँ२ ।ऽअभिदासत्यध-
रङ्गमया तमः । उपयामगृहीतोसीन्द्राय त्वा विमृधऽएष ते योनिरिन्द्राय त्वा
विमृधे ॥४४॥
॥१९॥ वाचस्प्पतिँव्विश्श्वकर्म्माणमूतये मनोजुवँव्वाजेऽअद्या हुवेम । स नो विश्श्वानि हवनानि
जोषद्विश्श्वशम्भूरवसे साधुकर्म्मा । उपयामगृहीतोसीन्द्राय त्वा विश्श्वकर्म्मणऽएष
ते योनिरिन्द्राय त्वा विश्श्वकर्म्मणे ॥४५॥
॥२०॥ विश्श्वकर्म्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम् । तस्म्मै विशः समनमन्त
पूर्व्वीरयमुग्ग्रो विहव्यो यथासत् । उपयामगृहीतोसीन्द्राय त्वा विश्श्वकर्म्मणऽएष ते
योनिरिन्द्राय त्वा विश्श्वकर्म्मणे ॥४६॥
॥२१॥ उपयामगृहीतोस्यग्नये त्वा गायत्रच्छन्दसङ्गृह्णामीन्द्राय त्वा त्रिष्टुप्प्छन्दसङ्गृह्णामि
विश्श्वेब्भ्यस्त्वा देवेब्भ्यो जगच्छन्दसङ्गृह्णाम्म्यनुष्टुप्तेभिगरः ॥४७॥
व्रेशीनान्त्वा पत्म्मन्नाधूनोमि कुकूननानान्त्वा पत्म्मन्नाधूनोमि भन्दनानान्त्वा
पत्म्मन्नाधूनोमि मदिन्तमानान्त्वा पत्म्मन्नाधूनोमि मधुन्तमानान्त्वा पत्म्मन्ना-
धूनोमि शुक्रन्त्वा शुक्रऽआधूनोम्म्यह्नो रूपे सूर्य्यस्य रश्मिषु ॥४८॥
ककुभँ रूपँव्वृषभस्य रोचते बृहच्छुक्रः शुक्रस्य पुरोगाः सोमः सोमस्य पुरोगाः ।
यत्ते सोमादाब्भ्यन्नाम जागृवि तस्म्मै त्वा गृह्णामि तस्म्मै ते सोम सोमाय
स्वाहा ॥४९॥
उशिक्त्वन्देव सोमाग्नेः प्प्रियम्पाथोपीहि वशी त्वन्देव सोमेन्द्रस्य प्प्रियम्पाथोपी-
ह्यस्म्मत्सखा त्वन्देव सोम विश्श्वेषान्देवानाम्प्प्रियम्पाथोपीहि ॥५०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥२२॥ इह रतिरिह रमद्ध्वमिह धृतिरिह स्वधृतिः स्वाहा । उपसृजन्धरुणम्मात्रे धरुणो
मातरन्धयन् । रायस्पोषमस्मासु दीधरत्स्वाहा ॥५१॥

सत्रस्यऽऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम । दिवम्पृथिव्याऽअद्ध्यारुहामाविदाम
देवान्त्स्वज्योतिः ॥५२॥

[1]युवन्तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तन्तमिद्धतँवज्रेण तन्तमिद्धतम् ।
[2]दूरे चत्ताय च्छन्त्सद्गहनँय्यदिनक्षत् । [3]अस्माकꣳ शत्रून्परि शूर विश्वतो दर्म्मा
दर्षीष्ट विश्वतः । [4]भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्याम सुवीरा वीरैः
सुपोषाः पोषैः ॥५३॥

॥२३॥ परमेष्ठ्यभिधीतः प्रजापतिर्वाचि व्याहृतायामन्धोऽअच्छेतः ।
सविता सन्याँविश्वकर्म्मा दीक्षायाम्पूषा सोमक्रयण्याम् ॥५४॥

इन्द्रश्च मरुतश्च क्रयायोपोत्थितोसुरः पण्यमानो मित्रः क्रीतो विष्णुः शिपि-
विष्टऽऊरावासन्नो विष्णुर्न्नरन्धिषः ॥५५॥

प्रोह्यमाणः सोमऽआगतो वरुणऽआसन्द्यामासन्नोग्निराग्नीध्रऽइन्द्रो हविर्द्धानेथर्वो-
पावह्रियमाणः ॥५६॥

विश्वे देवाऽअꣳशुषु न्युप्तो विष्णुराप्रीतपाऽआप्प्याय्यमानो यमः सूयमानो
विष्णुः सम्भ्रियमाणो वायुः पूयमानः शुक्रः पूतः शुक्रः क्षीरश्रीर्म्मन्थी
सक्तुश्रीः ॥५७॥

विश्वे देवाश्चमसेषून्नीतोसुर्होमायोद्यतो रुद्रो हूयमानो वातोभ्यावृत्तो नृचक्षाः
प्रतिख्यातो भक्षो भक्षयमाणः पितरो नाराशꣳसाः ॥५८॥

[क]सन्नः सिन्धुरवभृथायोद्यतः समुद्रोभ्यवह्रियमाणः सलिलः प्रप्लुतो ययोरो-
जसा स्कभिता रजाꣳसि वीर्येभिर्वीरतमा शविष्ठा । [ख]या पत्येतेऽअप्रतीता सहोभि-
र्विष्णूऽअगन्वरुणा पूर्वहूतौ ॥५९॥

देवान्दिवमगन्यज्ञस्ततो मा द्रविणमष्टु मनुष्यानन्तरिक्षमगन्यज्ञस्ततो मा द्रवि-
णमष्टु पितॄन्पृथिवीमगन्यज्ञस्ततो मा द्रविणमष्टु यङ्कञ्च लोकमगन्यज्ञस्ततो
मे भद्रमभूत् ॥६०॥

चतुस्त्रिꣳशत्तन्तवो ये वितत्निरे यऽइमँय्यज्ञꣳ स्वधया ददन्ते । तेषाञ्छिन्नꣳ
सम्वेतद्दधामि स्वाहा घर्म्मोऽअप्येतु देवान् ॥६१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यज्ञस्य दोहो वितंतः पुरुत्रा सोऽअंष्टधा दिवंमन्वातंतान। स यंज्ञ धुक्ष्व महिं मे प्रजायांᳬ रायस्पोषंविश्श्वमायुरशीय स्वाहा ॥६२॥

आपंवस्व हिरंण्यवदश्श्ववत्सोम वीरवंत्। वाजङ्गोमंन्तमाभंर स्वाहा ॥६३॥

इत्यष्टमोऽध्यायः ॥

अथ नवमोऽध्यायः

अ·९, अनु·१, मन्त्राः १-३

ऋषिः—इन्द्राबृहस्पती १। बृहस्पतिः २—१३। दधिक्रावा १४, १५। वसिष्ठः १६, १८—२५। नाभानेदिष्ठः १७। तापसः २६—३४। वरुणः ३५, ३६। देववातः ३७—४०॥

देवता—सविता १, ५, १३। इन्द्रः २, ३। राजधर्मराजादयः ४। अश्वः ६। सेनापतिः ७। प्रजापतिः ८, १९, २० २३—२५। वीरः ९। इन्द्राबृहस्पती १०—१२। बृहस्पतिः १४—१८। यज्ञः २१। दिशः २२। सोमाग्न्यादित्यविष्णुसूर्य्यबृहस्पतयः २६। अर्य्यमादिमन्त्रोक्ताः २७, २९। अग्निः २८, ३७। सम्राट् ३०। अग्न्यादयो मन्त्रोक्ताः ३१। पूषादयो मन्त्रोक्ताः ३२। मित्रादयो मन्त्रोक्ताः ३३। वस्वादयो मन्त्रोक्ताः ३४। विश्वेदेवाः ३५, ३६। रक्षोघ्नः ३८, ३९। यजमानः ४०॥

छन्दः—स्वराडार्षीत्रिष्टुप् १। आर्षीपङ्क्तिः[क], विकृतिः[र] २। निचृदतिशक्वरी ३ भुरिक्कृतिः ४। भुरिगष्टिः ५। भुरिग्जगती ६। भुरिगुष्णिक् ७। भुरिक्त्रिष्टुप् ८। धृतिः ९। विराडुत्कृतिः १०। जगती ११, १४, १५, १७, २४, ३०। स्वराडतिधृतिः १२। निचृदतिजगती १३। भुरिक्पङ्क्तिः १६। निचृत्त्रिष्टुप् १८। निचृद्धृतिः १९। भुरिक्कृतिः २०। अत्यष्टिः २१। निचृदत्यष्टिः २२। स्वराट्त्रिष्टुप् २३, २५। अनुष्टुप् २६। स्वराडनुष्टुप् २७। भुरिगनुष्टुप् २८। भुरिगार्षीगायत्री २९। स्वराडतिधृतिः ३१। कृतिः ३२, ३३। निचृज्जगती[क], निचृद्धृतिः[र] ३४। विराडुत्कृतिः ३५। विकृतिः ३६। निचृदनुष्टुप् ३७। भुरिग्ब्राह्मी-बृहती ३८। अतिजगती ३९। स्वराड्ब्राह्मीत्रिष्टुप् ४०॥

स्वरः—धैवतः १, ८, १८, २३, २५, ४०। पञ्चमः[क], मध्यमः[र] २। पञ्चमः ३, १६। निषादः ४, ६, ११, १३—१५, १७, २०, २४, ३०, ३२, ३३, ३९। मध्यमः ५, ३६, ३८। ऋषभः ७, ९, १९, षड्जः १०, १२, २६, ३१, ३५ गान्धारः २१, २२, २६—२८, ३७। निषादः[क], ऋषभः[र] ३४॥

॥१॥ देवं सवितुः प्प्रसुंव यज्ञम्प्रसुंव यज्ञपंतिम्भगाय। दिव्यो गंन्धर्वः केतपूः केतंन्नः पुनातु वाचस्पतिर्वाजंन्नः स्वदतु स्वाहा ॥१॥

[क]ध्रुवसदंन्त्वा नृषदंम्मनःसदंमुपयामगृहीतोसीन्द्राय त्वा जुष्टंङ्गृह्णाम्म्येष ते योनि-रिन्द्राय त्वा जुष्टंतमम्। [र]अप्प्सुषदंन्त्वा घृतसदंव्योमसदंमुपयामगृहीतोसीन्द्राय त्वा जुष्टंङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्वा जुष्टंतमम्। पृथिविसदंन्त्वान्तरिक्षस-दंन्दिविसदंन्देवसदंन्नाकसदंमुपयामगृहीतोसीन्द्राय त्वा जुष्टंङ्गृह्णाम्म्येष ते योनि-रिन्द्राय त्वा जुष्टंतमम् ॥२॥

अपाᳬ रसमुद्वंयसᳬ सूर्य्यें सन्तᳬ समाहितम्। अपाᳬ रसस्य यो रसस्तंवो गृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टंङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्वा जुष्टंतमम् ॥३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रहाऽऊर्ज्जाहुतयो व्यन्तो विप्प्राय मतिम्। तेषाँविशिप्प्रियाणाँवोहमिषमूर्ज्जँ समग्ग्र-
भमुपयामगृहीतोसीन्द्राय त्वा जुष्टङ्गृह्णाम्म्येष ते योनिरिन्द्राय त्वा जुष्टतमम्।
सम्पृचौ स्त्थः सम्मा भद्द्रेण पृङ्क्तँविपृचौ स्त्थो वि मा पाप्मना पृङ्क्तम् ॥४॥

॥२॥ इन्द्रस्य वज्ज्रोसि वाजसास्त्वयायँवाजँ सेत्। वाजस्य नु प्प्रसवे मातरम्महीमदिति-
न्नाम वचसा करामहे। यस्यामिदँविश्श्वम्भुवनमाविवेश तस्यान्नो देवः सविता धर्म्म
साविषत् ॥५॥

अप्प्स्वन्तरमृतमप्प्सु भेषजमपामुत प्प्रशस्तिष्ष्वश्श्वा भवत वाजिनः।
देवीरापो यो वऽऊर्म्मिः प्प्रतूर्त्तिः ककुन्मान्वाजसास्तेनायँवाजँ सेत् ॥६॥
वातो वा मनो वा गन्धर्व्वाः सप्तविँशतिः।
तेऽअग्ग्रेश्श्वमयुञ्जँस्तेऽअस्मिञ्जवमादधुः ॥७॥
वातरँहा भव वाजिन्नयुज्ज्यमानऽइन्द्रस्येव दक्षिणः श्श्रियैधि।
युञ्जन्तु त्वा मरुतो विश्श्ववेदसऽआ ते त्वष्टा पत्त्सु जवन्दधातु ॥८॥
जवो यस्ते वाजिन्निहितो गुहा यः श्येने परीत्तोऽअचरच्च वाते। तेन नो
वाजिन्बलवान्बलेन वाजजिच्च भव समने च पारयिष्ष्णुः। वाजिनो वाजजितो
वाजँ सरिष्ष्यन्तो बृहस्प्पतेर्ब्भागमवजिग्घ्रत ॥९॥

॥३॥ देवस्याहँ सवितुः सवे सत्त्यसवसो बृहस्प्पतेरुत्तमन्नाकँ रुहेयम्। देवस्याहँ सवितुः
सवे सत्यसवसऽइन्द्रस्योत्तमन्नाकँ रुहेयम्। देवस्याहँ सवितुः सवे सत्त्यप्प्रसवसो
बृहस्प्पतेरुत्तमन्नाकमरुहम्। देवस्याहँ सवितुः सवे सत्त्यप्प्रसवसऽइन्द्रस्योत्तमन्नाक-
मरुहम् ॥१०॥

बृहस्प्पते वाजञ्जय बृहस्प्पतये वाचँवदत बृहस्प्पतिँवाजञ्जापयत।
इन्द्र वाजञ्जयेन्द्राय वाचँवदतेन्द्रँवाजञ्जापयत ॥११॥
एषा वः सा सत्त्या सँवागभूद्यया बृहस्प्पतिँवाजमजीजपताजीजपत बृहस्प्पतिँवाजँव-
नस्प्पतयो विमुच्च्यद्ध्वम्। एषा वः सा सत्त्या सँवागभूद्ययेन्द्रँवाजमजीजपताजीज-
पतेन्द्रँवाजँवनस्प्पतयो विमुच्च्यद्ध्वम् ॥१२॥
देवस्याहँ सवितुः सवे सत्त्यप्प्रसवसो बृहस्प्पतेर्व्वाजजितो वाजञ्जेषम्।
वाजिनो वाजजितोद्ध्वन स्कब्भ्नुवन्तो योजना मिमानाः काष्ठाङ्गच्छत ॥१३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एष स्य वाजी क्षिपणिन्तुरण्यति ग्रीवायाम्बद्धोऽअपिकक्षऽआसनि ।
क्रतुन्दधिक्राऽअनु सꣳसनिष्ष्यदत्पथामङ्काꣳस्यन्वापनीफणत्स्वाहा ॥१४॥
उत स्मास्य द्रवतस्तुरण्यतः पर्णन्न वेरनुवाति प्रगर्द्धिनः ।
श्येनस्येव ध्रजतोऽअङ्कसम्परि दधिक्राव्णः सहोर्जा तरित्रतः स्वाहा ॥१५॥
शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्क्काः ।
जम्भयन्तोहिंवृकꣳ रक्षाꣳसि सनेम्म्यस्मद्युयवन्नमीवाः ॥१६॥
ते नोऽअर्वन्तो हवनश्रुतो हवँविश्वे शृण्ण्वन्तु वाजिनो मितद्रवः ।
सहस्रसा मेधसाता सनिष्ष्यवो महो ये धनꣳ समिथेषु जभ्रिरे ॥१७॥
वाजेवाजेवत वाजिनो नो धनेषु विप्प्राऽअमृताऽऋतज्ञाः ।
अस्य मद्ध्वः पिबत मादयद्ध्वन्तृप्ता यात पथिभिर्द्देवयानैः ॥१८॥
आ मा वाजस्य प्प्रसवो जगम्म्यादेमे द्यावापृथिवी विश्वरूपे । आ मा गन्तां पितरा
मातरा चा मा सोमोऽअमृतत्त्वेन गम्म्यात् । वाजिनो वाजजितो वाजꣳ ससृवाꣳसो
बृहस्प्पतेर्ब्भागमवजिघ्रत निमृजानाः ॥१९॥

॥४॥ आपये स्वाहा स्वापये स्वाहापिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहाहर्प्पतये
स्वाहाह्ने मुग्धाय स्वाहा मुग्धाय वैनꣳशिनाय स्वाहा विनꣳशिनऽआन्त्यायनाय
स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा ॥२०॥
आयुर्य्यज्ञेन कल्प्पताम्प्राणो यज्ञेन कल्प्पताञ्चक्षुर्य्यज्ञेन कल्प्पताꣳ श्रोत्रँ-
य्यज्ञेन कल्प्पताम्पृष्ठँय्यज्ञेन कल्प्पताँय्यज्ञो यज्ञेन कल्प्पताम् ।
प्रजापतेः प्प्रजाऽअभूम स्वर्द्देवाऽअगन्मामृताऽअभूम ॥२१॥
अस्म्मे वोऽअस्त्विन्द्रियमस्म्मे नृम्म्णमुत क्रतुरस्म्मे वर्च्चाꣳसि सन्तु वः । नमो मात्रे
पृथिव्यै नमो मात्रे पृथिव्याऽइयन्ते राड्यन्तासि यमनो ध्रुवोसि धरुणः । कृष्ष्यै त्वा
क्षेमाय त्वा रय्यै त्वा पोषाय त्वा ॥२२॥

॥५॥ वाजस्येमम्प्रसवः सुषुवेग्ग्रे सोमꣳ राजानमोषधीष्ष्वप्प्सु ।
ताऽअस्म्मभ्यम्मधुमतीर्ब्भवन्तु वयꣳ राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥२३॥
वाजस्येमाम्प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्म्राट् ।
अदित्त्सन्तन्दापयति प्प्रजानन्त्स नो रयिꣳ सर्व्ववीरन्नियच्छतु स्वाहा ॥२४॥
वाजस्य नु प्प्रसवऽआबभूवेमा च विश्वा भुवनानि सर्व्वतः ।
सनेमि राजा परियाति विद्वान्प्रजाम्पुष्टिं वर्द्धयमानोऽअस्म्मे स्वाहा ॥२५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सोमꣳ राजानमवसेग्निमन्वारभामहे ।
आदित्यान्विष्णुꣳ सूर्यम्ब्रह्माणञ्च बृहस्पतिꣳ स्वाहा ॥२६॥
अर्य्यमणम्बृहस्पतिमिन्द्रन्दानाय चोदय ।
वाचँविष्णुꣳ सरस्वतीꣳ सवितारञ्च वाजिनꣳ स्वाहा ॥२७॥
अग्नेऽअच्छा वदेह नः प्रति नः सुमना भव ।
प्र नो यच्छ सहस्रजित्त्वꣳ हि धनदाऽअसि स्वाहा ॥२८॥
प्र नो यच्छत्वर्य्यमा प्र पूषा प्र बृहस्पतिः ।
प्र वाग्देवी ददातु नः स्वाहा ॥२९॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । सरस्वत्यै वाचो यन्तुर्य्यन्त्रियै दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ॥३०॥

॥६॥ अग्निरेकाक्षरेण प्राणमुदजयत्तमुज्जेषमश्विनौ द्व्यक्षरेण द्विपदो मनुष्यानुदजयन्तान्तानुज्जेषँविष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्तानुज्जेषꣳ सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्तानुज्जेषम् ॥३१॥
पूषा पञ्चाक्षरेण पञ्च दिशऽउदजयत्ताऽउज्जेषꣳ सविता षडक्षरेण षडृतूनुदजयत्तानुज्जेषम्मरुतः सप्ताक्षरेण सप्त ग्राम्यान्पशूनुदजयँस्तानुज्जेषम्बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयत्तामुज्जेषम् ॥३२॥
मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयत्तमुज्जेषँवरुणो दशाक्षरेण विराजमुदजयत्तामुज्जेषमिन्द्रऽएकादशाक्षरेण त्रिष्टुभमुदजयत्तामुज्जेषँविश्वे देवा द्वादशाक्षरेण जगतीमुदजयँस्तामुज्जेषम् ॥३३॥
वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयँस्तमुज्जेषꣳ रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजयँस्तमुज्जेषमादित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुदजयँस्तमुज्जेषमदितिः षोडशाक्षरेण षोडशꣳ स्तोममुदजयत्तमुज्जेषम्प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत्तमुज्जेषम् ॥३४॥

॥७॥ एष ते निर्ऋते भागस्तञ्जुषस्व स्वाहाग्निनेत्रेभ्यो देवेभ्यः पुरःसद्भ्यः स्वाहा यमनेत्रेभ्यो देवेभ्यो दक्षिणासद्भ्यः स्वाहा विश्वदेवनेत्रेभ्यो देवेभ्यः पश्चात्सद्भ्यः स्वाहा मित्रावरुणनेत्रेभ्यो वा मरुन्नेत्रेभ्यो वा देवेभ्यऽउत्तरासद्भ्यः स्वाहा सोमनेत्रेभ्यो देवेभ्यऽउपरिसद्भ्यो दुवस्वद्भ्यः स्वाहा ॥३५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ये देवाऽअग्निनेत्राः पुरःसदस्तेभ्यः स्वाहा ये देवा यमनेत्रा दक्षिणासदस्ते-
भ्यः स्वाहा ये देवा विश्वदेवनेत्राः पश्चात्सदस्तेभ्यः स्वाहा ये देवा मित्रावरुण-
नेत्रा वा मरुन्नेत्रा वोत्तरासदस्तेभ्यः स्वाहा ये देवाः सोमनेत्राऽउपरिसदो दुवस्वन्त-
स्तेभ्यः स्वाहा ॥३६॥

अग्ने सहस्व पृतनाऽअभिमातीरपास्य । दुष्टरस्तरन्नरातीर्वर्चो धा यज्ञवाहसि ॥३७॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । उपांशोर्वीर्येण
जुहोमि हतꣳ रक्षः स्वाहा रक्षसान्त्वा वधायावधिष्म रक्षोऽवधिष्मामुमसौ
हतः ॥३८॥

॥८॥ सविता त्वा सवानांꣳ सुवतामग्निर्गृहपतीनांꣳ सोमो वनस्पतीनाम् । बृहस्पति-
र्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् ॥३९॥
इमन्देवाऽअसपत्नꣳ सुवध्वम्महते क्षत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्रस्ये-
न्द्रियाय । इमममुष्य पुत्रममुष्यै पुत्रमस्यै विशऽएष वोऽमी राजा सोमोऽस्माकं
ब्राह्मणानांꣳ राजा ॥४०॥

इति नवमोऽध्यायः ॥

अ० १०, अनु० १, मन्त्रः १

अथ दशमोऽध्यायः

ऋषिः—वरुणः १—१७ । देवव्रातः १८—२३ । वामदेवः २४—२६ । शुनःशेपः २७—३४ ॥

देवता—आपः १, ६ । वृषा २ । अपांपतिः ३ । सूर्य्यादयो मन्त्रोक्ताः ४ । अग्न्यादयो मन्त्रोक्ताः ५, २३ । वरुणः ७, २७ । यजमानः ८, १०—१४, १८, १९, २८ । प्रजापतिः ९, २० । परमात्मा १५ । मित्रावरुणौ १६ । क्षत्रपतिः १७, २१, ३१, ३२ । इन्द्रः २२ । सूर्य्यः २४, २५ । आसन्दी राजपत्नी २६ । अग्निः २९ । सवित्रादिमन्त्रोक्ताः ३० । अश्विनौ ३३, ३४ ॥

छन्दः—निचृदार्षीत्रिष्टुप् १, २२ । स्वराड्ब्राह्मीपङ्क्तिः २ । अभिकृतिः[क], निचृज्जगती[ख] ३ । जगती[१], स्वराट्पङ्क्तिः[२], स्वराड्ब्राह्मीबृहती[३], [४], आर्चीपङ्क्तिः[५], भुरिक्त्रिष्टुप्[६], [७], ४ । स्वराड्धृतिः ५ । स्वराड्ब्राह्मीबृहती ६ । विराडार्षीत्रिष्टुप् ७, २२ । कृतिः ८ । भुरिगष्टिः ९ । विराडार्षीपङ्क्तिः १० आर्चीपङ्क्तिः ११, १३ । निचृदार्ष्यनुष्टुप् १२, ३३ । भुरिग्जगती १४, २४ । विराडार्चीपङ्क्तिः १५ । स्वराडार्षीजगती १६, २९ । आर्षीपङ्क्तिः १७ स्वराड्ब्राह्मीत्रिष्टुप् १८ । विराड्ब्राह्मीत्रिष्टुप् १९ । भुरिगतिधृतिः २० । भुरिग्ब्राह्मीबृहती २१ । जगती २३, २५ । भुरिगनुष्टुप् २६ । पिपीलिकामध्याप्रतिष्ठागायत्री २७ । विराड्धृतिः २८ । भुरिग्ब्राह्मीत्रिष्टुप् ३० । आर्षीत्रिष्टुप् ३१ । निचृद्ब्राह्म्यनुष्टुप् ३२ । भुरिक्पङ्क्तिः ३४ ॥

स्वरः—धैवतः १, ७, १८, १९, २२, ३०—३४ । पञ्चमः २, १०, ११, १३, १५, १७, ३४ । ऋषभः[क], निषादः[ख] ३ । निषादः [१], पञ्चमः [२], [५], मध्यमः[३], [४], धैवतः [६], [७], ४ । ऋषभः ५, २८ । मध्यमः ६, ९, २१ । निषादः ८, १४, १६, २३—२५, २६ । गान्धारः १२, २६, ३३ । षड्जः २०, २७ ॥

॥१॥ अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः ।
याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥१॥

Kirtikant Sharma Collection, Najafgarh

वृष्ण्णऽऊर्म्मिरसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा वृष्ण्णऽऊर्म्मिरसि राष्ट्रदा राष्ट्रमु-
मुष्म्मै देहि वृषसेनोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा वृषसेनोसि राष्ट्रदा राष्ट्रम-
मुष्म्मै देहि ॥२॥

[1]अर्थेत स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहार्थेत स्थ राष्ट्रदा राष्ट्रममुष्म्मै दत्तौजस्वती
स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहौजस्वती स्थ राष्ट्रदा राष्ट्रममुष्म्मै दत्तापः परि-
वाहिणी स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहापः परिवाहिणी स्थ राष्ट्रदा राष्ट्रममुष्म्मै
दत्तापाम्पतिरसि राष्ट्रदा राष्ट्रम्मे[2] देहि स्वाहापाम्पतिरसि राष्ट्रदा राष्ट्रममुष्म्मै
देह्यपाङ्गर्भोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहापाङ्गर्भोसि राष्ट्रदा राष्ट्रममुष्म्मै
देहि ॥३॥

[1]सूर्य्यत्त्वचस स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा सूर्य्यत्त्वचस स्थ राष्ट्रदा राष्ट्रममुष्म्मै
दत्त सूर्य्यवर्चस स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा [2]सूर्य्यवर्चस स्थ राष्ट्रदा
राष्ट्रममुष्म्मै दत्त मान्दा स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा मान्दा स्थ राष्ट्रदा
राष्ट्रममुष्म्मै दत्त [3]व्रजक्षित स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा व्रजक्षित स्थ
राष्ट्रदा राष्ट्रममुष्म्मै दत्त वाशा स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा वाशा स्थ
राष्ट्रदा राष्ट्रममुष्म्मै दत्त [4]शविष्ठा स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा शविष्ठा
स्थ राष्ट्रदा राष्ट्रममुष्म्मै दत्त शक्करी स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा शक्करी
स्थ राष्ट्रदा राष्ट्रममुष्म्मै दत्त [5]जनभृत स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा जनभृत
स्थ राष्ट्रदा राष्ट्रममुष्म्मै दत्त [6]विश्वभृत स्थ राष्ट्रदा राष्ट्रम्मे दत्त स्वाहा
विश्वभृत स्थ राष्ट्रदा राष्ट्रममुष्म्मै दत्तापः स्वराज स्थ राष्ट्रदा राष्ट्रममुष्म्मै
दत्त । [7]मधुमतीर्म्मधुमतीभिः पृच्यन्ताम्महि क्षत्रङ्क्षत्रियाय वन्वानाऽअनाधृष्टाः
सीदत सहौजसो महि क्षत्रङ्क्षत्रियाय दधतीः ॥४॥

॥२॥ सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात् । अग्नये स्वाहा सोमाय स्वाहा सवित्रे
स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा
श्लोकाय स्वाहाꣳशाय स्वाहा भगाय स्वाहार्य्यम्णे स्वाहा ॥५॥

पवित्रे स्थो वैष्णव्यौ सवितुर्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्य्यस्य
रश्मिभिः । अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि स्वाहा
राजस्वः ॥६॥

सधमादो द्युम्निनीराप एताऽअनाधृष्टाऽअपस्यो वसानाः ।
पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुर्म्मातृतमास्वन्तः ॥७॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षुत्रस्योल्बमसि क्षुत्रस्य जुरायुव्वसि क्षुत्रस्यु योनिरसि क्षुत्रस्यु नाभिरसीन्द्रस्यु वार्त्रघ्नमसि मित्रस्यासि वरुणस्यासि त्वयायँवृत्रँवधेत् । दुवासि रुजासि क्षुमासि । पातैनुम्प्राञ्चम्पातैनम्प्रत्यञ्चम्पातैनन्तिर्य्यञ्चन्दिग्भ्यः पात ॥८॥

आविर्म्मर्य्याऽआवित्तोऽअुग्निर्गृहपतिरावित्तुऽइन्द्रो वृद्धश्रवाऽआवित्तौ मित्रावरुणौ धृतव्रतावावित्तः पूषा विश्ववेदाऽआवित्ते द्यावापृथिवी विश्वशम्भुवावावित्तादिति-रुरुशर्म्मा ॥९॥

॥३॥ अवेष्टा दन्दशूकाः प्राचीमारोह गायत्री त्वावतु रथन्तरꣳ साम त्रिवृत्स्तोमो वसन्तऽऋुतुर्ब्रह्म द्रविणम् ॥१०॥

दक्षिणामारोह त्रिष्टुप्त्वावतु बृहत्साम पञ्चदश स्तोमो ग्रीष्मऽऋुतुः क्षुत्रन्द्र-विणम् ॥११॥

प्रतीचीमारोह जगती त्वावतु वैरूपꣳ साम सप्तदश स्तोमो वुर्षाऽऋुतुर्विड्द्रविणम् ॥१२॥

उदीचीमारोहानुष्टुप्त्वावतु वैराजꣳ सामैकविꣳश स्तोमः शरदृतुः फलन्द्रविणम् ॥१३॥

ऊर्ध्वामारोह पुङ्क्तिस्त्वावतु शाक्वररैवते सामनी त्रिणवत्रयस्त्रिꣳशौ स्तोमौ हेमन्त-शिशिरावृतू वर्चो द्रविणम्प्रत्यस्तन्नमुचेः शिरः ॥१४॥

सोमस्यु त्विषिरसि तवेव मे त्विषिर्भूयात् ।
मृत्योः पाह्योजोसि सहोस्यमृतमसि ॥१५॥

हिरण्यरूपाऽउषसो विरोकऽउभाविन्द्राऽउदिथः सूर्य्यश्च ।
आरोहतँवरुण मित्र गर्त्तन्ततश्चक्षाथामदितिन्दितिञ्च मित्रोसि वरुणोसि ॥१६॥

॥४॥ सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्म्यग्नेर्भ्राजसा सूर्य्यस्य वर्चसेन्द्रस्येन्द्रियेण ।
क्षत्राणाङ्क्षत्रपतिरेध्यति दिद्यून्पाहि ॥१७॥

इमन्देवाऽअसपत्नꣳ सुवद्ध्वम्महते क्षुत्राय महते ज्यैष्ठ्याय महते जानराज्यायेन्द्र-स्येन्द्रियाय । इममुमुष्य पुत्रममुष्यै पुत्रमुस्यै विशऽएष वोमी राजा सोमोस्माकं-म्ब्राह्मणानाꣳ राजा ॥१८॥

प्र पर्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिचऽइयानाः । ताऽआववृत्रन्नधरागुदक्ता ऽअहिम्बुध्न्यमनु रीयमाणाः । विष्णोर्विक्रमणमसि विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥१९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो
ऽअस्त्वयममुष्य पितासावस्य पिता वयꣳ स्याम पतयो रयीणाꣳ स्वाहा । रुद्र
यत्ते क्रिवि परन्नाम तस्मिन्हुतमस्यमेष्टमसि स्वाहा ॥२०॥

॥५॥ इन्द्रस्य वज्रोसि मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि । अव्यथायै त्वा
स्वधायै त्वारिष्टोऽअर्जुनो मरुतांप्रसवेन जयापाम मनसा समिन्द्रियेण ॥२१॥
मा तऽइन्द्र ते वयन्तुराषाडयुक्तासोऽअब्रह्मता विदसाम ।
तिष्ठा रथमधि यँवज्रहस्ता रश्मीन्देव यमसे स्वश्वान् ॥२२॥

अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहा मरुतामोजसे स्वाहेन्द्रस्येन्द्रियाय
स्वाहा । पृथिवि मातर्मा मा हिꣳसीर्मोऽअहन्त्वाम् ॥२३॥
हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योम-
सदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥२४॥
इयदस्यायुरस्यायुर्म्मयि धेहि युङ्ङसि वर्चोसि वर्चो मयि धेह्यूर्ग्गस्यूर्जम्मयि धेहि ।
इन्द्रस्य वाँवीर्य्यकृतो बाहूऽअभ्युपावहरामि ॥२५॥

॥६॥ स्योनासि सुषदासि क्षत्रस्य योनिरसि ।
स्योनामासीद सुषदामासीद क्षत्रस्य योनिमासीद ॥२६॥
निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः ॥२७॥
अभिभूरस्येतास्ते पञ्च दिशः कल्पन्ताम्ब्रह्मँस्त्वम्ब्रह्मासि सवितासि सत्यप्रसवो
वरुणोसि सत्यौजाऽइन्द्रोसि विशौजा रुद्रोसि सुशेवः । बहुकार श्रेयस्कर भूयस्क-
रेन्द्रस्य वज्रोसि तेन मे रध्य ॥२८॥
अग्निः पृथुर्द्धर्म्मणस्पतिर्जुषाणोऽअग्निः पृथुर्द्धर्म्मणस्पतिराज्यस्य वेतु स्वाहा
स्वाहाकृताः सूर्यस्य रश्मिभिर्यतध्वꣳ सजातानाम्मध्यमेष्ठ्याय ॥२९॥

॥७॥ सवित्रा प्रसवित्रा सरस्वत्या वाचा त्वष्ट्रा रूपैः पूष्णा पशुभिरिन्द्रेणास्मे
बृहस्पतिना ब्रह्मणा वरुणेनौजसाग्निना तेजसा सोमेन राज्ञा विष्णुना दशम्या
देवतया प्रसूतः प्रसर्पामि ॥३०॥

॥८॥ अश्विभ्याम्पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व । वायुः पूतः पवित्रेण
प्रत्यङ्क्सोमोऽअतिस्रुतः । इन्द्रस्य युज्यः सखा ॥३१॥
कुविदङ्ग यवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वँवियूय । इहेहैषाङ्कृणुहि भोजनानि ये
बर्हिषो नमऽउक्तिँयजन्ति । उपयामगृहीतोस्यश्विभ्यान्त्वा सरस्वत्यै त्वेन्द्राय
त्वा सुत्राम्णे ॥३२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युवꣳ सुराममश्विना नमुचावासुरे सचा। विपिपाना शुभस्पतीऽइन्द्रङ्कर्म्मस्वा-
वतम् ॥३३॥
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः। यत्सुरामँव्यपिबः शचीभिः
सरस्वती त्त्वा मघवन्नभिष्णक् ॥३४॥

इति दशमोऽध्यायः ॥

अथैकादशोऽध्यायः

ऋषिः—प्रजापतिः १—११। नाभानेदिष्ठः १२। कुश्रिः १३। शुनःशेपः १४—१६। पुरोधाः १७। मयोभूः १८—२२। गृत्समदः २३, २४, २७—३१ ३६। सोमकः २५। पायुः २६। भरद्वाजः ३२—३४। देवश्रवो देववातः ३५। प्रस्कण्वः ३७। सिन्धुद्वीपः। ३८—४०, ५०—६१। विश्वमनाः ४१। कण्वः ४२। त्रितः ४३, ४४, ४६—४८। चित्रः ४५। उत्कीलः ४९। विश्वामित्रः ६२—६६। आत्रेयः ६७—६९। सोमाहुतिः ७०। [illegible]पः ७१। वारुणिः ७२। जमदग्निः ७३, ७४। नाभानेदिष्ठः ७५—८३॥

देवता—सविता १—११। ६३, ६७। वाजी १२, १३। क्षत्रपतिः १४, २०। गणपतिः १५। अग्निः १६—१९, २४—२९, ३२—३४, ३६, ३७, ४०—४९, ७०—७८। द्रविणोदाः २१, २२। प्रजापतिः२३। दम्पती ३०। जायापती ३१। होता ३५। आपः ३८, ५०—५२। वायुः ३९। मित्रः ५३, ६२। ६४। रुद्रः ५४। सिनीवाली ५५। अदितिः ५६, ५७, ५९। वसुरुद्रादित्यविश्वेदेवाः ५८। वस्वादयो मन्त्रोक्ताः ६०। आदित्यादयो लिङ्गोक्ताः ६१। वस्वादयो लिङ्गोक्ताः ६५। अग्न्यादयो मन्त्रोक्ताः ६६। अम्बा ६८, ६९। सेनापतिः ७९। अध्यापकोपदेशकौ ८०। पुरोहितयजमानौ। ८१। सभापतिर्यजमानः ८२। यजमानपुरोहितौ ८३॥

छन्दः—विराडार्ष्यनुष्टुप् १, ३०। शङ्कुमतीगायत्री २। निचृदनुष्टुप् ३, १८, १९, ३१, ७३, ७९। जगती ४। भुरिक्पङ्क्ति ५, ११, १६। निचृदार्षी जगती ६। आर्षीत्रिष्टुप् ७, २३, ३२, ३६, ४९, ५९, ६९। भुरिक्शक्वरी ८। भुरिगतिशक्वरी ९। भुरिगनुष्टुप् १०, ४०, ४१, ४८, ७७। आर्षीपङ्क्ति २१, २४, २७। आस्तारपङ्क्तिः १२। गायत्री १३, १४, ५०—५२, ६८। आर्षीजगती १५। निचृदार्षीत्रिष्टुप् १७, २२, ३५। निचृदार्षीबृहती २०, ३७। निचृद्गायत्री २५, ३३, ३४, ६२। अनुष्टुप् २६, ५४, ६४, ६७, ८०। प्रकृतिः २८। स्वराट्पङ्क्तिः २९। न्यङ्कुसारिणीबृहती ३८। विराट्त्रिष्टुप् ३९, ४३, ७५। उपरिष्टाद्बृहती ४२, ५३, ८३,। विराडनुष्टुप् ४४, ५५, ५६, ७४, ८२। विराट्पथ्याबृहती ४५। ब्राह्मीबृहती ४६। विराड्-ब्राह्मीत्रिष्टुप् ४७, ६६। भुरिग्बृहती ५७, ६३। स्वराट्सङ्कृति.[क], अभिकृतिः[र], ५८। स्वराट्संकृतिः ६०। भुरिक्कृतिः[क] निचृत्प्रकृतिः[र] ६१। भुरिग्धृतिः ६५। विराड्गायत्री ७०, ७१। भुरिगुष्णिक् ७२, ७८। स्वराडार्षीत्रिष्टुप् ७६। निचृदार्चीपङ्क्तिः ८१।

स्वरः—गान्धारः १, ३, १०, १८, १९, २६, ३०, ३१, ४०, ४१, ४४, ४८, ५४—५६, ६०, ६४, ६७, ७३, ७४, ७७, ७९, ८०, ८२। षड्जः २, १३, १४, २५, ३३, ३४, ५०—५२, ६२, ६८, ७०, ७१। निषादः ४, ६, १५। धैवतः ५, ७, ८, १७, २२, २३, २८, ३२, ३५, ३६, ३९, ४३, ४७, ४९, ५९, ६६, ६९, ७५, ७६,। पञ्चमः ९, ११, १२, १६, २१, २४, २७, २९, ८१। मध्यमः २०, ३७, ३८, ४२, ४५, ४६, ५३, ५७, ६३, ८३। गान्धारः[क], ऋषभः[र] ५८। निषादः[क], धैवतः[र] ६१। ऋषभः ६५, ७२, ७८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥१॥ युञ्जानः प्प्रथमम्मनस्तत्वाय सविता धियः । अग्नेर्ज्योतिर्न्निचाय्य पृथिव्याऽ
अद्ध्याभरत् ॥१॥
युक्तेन मनसा व्वयन्देवस्य सवितुः सवे । स्वर्ग्याय शक्त्या ॥२॥
युक्त्वाय सविता देवान्त्स्वर्य्यतो धिया दिवम् । बृहज्ज्योतिः करिष्ष्यतः सविता
प्प्रसुवाति तान् ॥३॥
युञ्जते मनऽउत युञ्जते धियो व्विप्प्रा व्विप्प्रस्य बृहतो व्विपश्चितः । वि होत्रा दधे
वयुनाविदेकऽइन्मही देवस्य सवितुः परिष्टुतिः ॥४॥
युजे वाम्ब्रह्म पूर्व्यन्नमोभिर्वि श्लोकऽएतु पत्थ्येव सूरेः । शृण्वन्तु व्विश्वेऽअमृतस्य
पुत्राऽआ ये धामानि दिव्यानि तस्थुः ॥५॥
यस्य प्प्रयाणमन्वन्यऽइद्ययुर्देवा देवस्य महिमानमोजसा । यः पार्थिवानि व्विममे
सऽएतशो रजाᳬसि देवः सविता महित्वना ॥६॥
देव सवितः प्प्रसुव यज्ञम्प्रसुव यज्ञपतिम्भगाय । दिव्यो गन्धर्वः केतपूः केतन्नः
पुनातु व्वाचस्प्पतिर्वाचन्नः स्वदतु ॥७॥
इमन्नो देव सवितर्य्यज्ञम्प्रणय देवाव्यᳮ सखिविदᳮ सत्राजितन्धनजितᳬ स्वर्जितम् ।
ऋचा स्तोमᳮ समर्द्धय गायत्रेण रथन्तरम्बृहद्गायत्रवर्त्तनि स्वाहा ॥८॥
देवस्य त्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्ष्णो हस्ताब्भ्याम् । आददे गायत्रेण
च्छन्दसाङ्गिरस्वत्पृथिव्याः सधस्त्थादग्निम्पुरीष्ष्यमङ्गिरस्वदाभर त्रैष्टुभेन च्छन्द-
साङ्गिरस्वत् ॥९॥
अब्भ्रिरसि नार्य्यसि त्वया व्वयमग्निᳮ शकेम खनितुᳮ सधस्त्थऽआ । जागतेन
च्छन्दसाङ्गिरस्वत् ॥१०॥
हस्तऽआधाय सविता बिब्भ्रदब्भ्रिᳮ हिरण्ण्ययीम् । अग्नेर्ज्योतिर्न्निचाय्य पृथिव्या
ऽअद्ध्याभरदानुष्टुभेन च्छन्दसाङ्गिरस्वत् ॥११॥
॥२॥ प्रतूर्त्तँव्वाजिन्नाद्द्रव व्वरिष्ठामनु सँव्वतम् । दिवि ते जन्म परममन्तरिक्षे तव नाभिः
पृथिव्यामधि योनिरित् ॥१२॥
युञ्जाथाᳬ रासभँय्युवमस्मिन्न्यामे वृषण्वसू ।
अग्निम्भरन्तमस्मयुम् ॥१३॥
योगेयोगे तव स्तरँव्वाजेवाजे हवामहे । सखायऽइन्द्रमूतये ॥१४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतूर्वन्नेह्यवक्रामन्नशस्ती रुद्रस्य गाणपत्यम्मयोभूरेहि । उर्वन्तरिक्षँवीहि स्वस्तिगव्यूतिरभयानि कृण्वन्पूष्णा सयुजा सह ॥१५॥

पृथिव्याः सधस्थादग्निम्पुरीष्यमङ्गिरस्वदाभराग्निम्पुरीष्यमङ्गिरस्वदच्छेमोग्निम्पुरीष्यमङ्गिरस्वद्भरिष्यामः ॥१६॥

अन्वग्निरुषसामग्रमक्ख्यदन्वहानि प्रथमो जातवेदाः ।
अनु सूर्य्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवीऽआततन्थ ॥१७॥

आगत्य वाज्यद्ध्वानꣳ सर्व्वा मृधो विधूनुते ।
अग्निꣳ सधस्थे महति चक्षुषा निचिकीषते ॥१८॥

आक्रम्य वाजिन्पृथिवीमग्निमिच्छ रुचा त्वम् ।
भूम्या वृत्वाय नो ब्रूहि यतः खनेम तँवयम् ॥१९॥

द्यौस्ते पृष्ठम्पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रो योनिः ।
विख्याय चक्षुषा त्वमभितिष्ठ पृतन्यतः ॥२०॥

उत्क्राम महते सौभगायास्मादास्थानाद्द्रविणोदा वाजिन् ।
वयꣳ स्याम सुमतौ पृथिव्याऽअग्निङ्खनन्तऽउपस्थेऽअस्याः ॥२१॥

उदक्रमीद्द्रविणोदा वाज्यर्वाकः सुलोकꣳ सुकृतम्पृथिव्याम् ।
ततः खनेम सुप्रतीकमग्निꣳ स्वो रुहाणाऽअधि नाकमुत्तमम् ॥२२॥

आ त्वा जिघर्म्मि मनसा घृतेन प्रतिक्षियन्तम्भुवनानि विश्वा ।
पृथुन्तिरश्चा वयसा बृहन्तँव्यचिष्ठमन्नै रभसन्दृशानम् ॥२३॥

आ विश्वतः प्रत्यञ्चञ्जिघर्म्म्यरक्षसा मनसा तज्जुषेत ।
मर्य्यश्री स्पृहयद्वर्णोऽअग्निर्नाभिमृशे तन्वा जर्भुराणः ॥२४॥

परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥२५॥

परि त्वाग्ने पुरँवयँविप्रꣳ सहस्य धीमहि ।
धृषद्वर्णन्दिवेदिवे हन्तारम्भङ्गुरावताम् ॥२६॥

त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ।
त्वँवनेभ्यस्त्वमोषधीभ्यस्त्वन्नृणान्नृपते जायसे शुचिः ॥२७॥

॥३॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् । पृथिव्याः सधस्थादग्निम्पुरीष्यमङ्गिरस्वत्खनामि । ज्योतिष्मन्तन्त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यतम् । शिवम्प्रजाभ्योहिꣳसन्तम्पृथिव्याः सधस्थादग्निम्पुरीष्यमङ्गिरस्वत्खनामः ॥२८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपाम्पृष्ठमसि योनिरुग्नेः समुद्रमभितः पिन्वमानम् ।
वर्द्धमानो महाँ२॥ऽआ च पुष्करे दिवो मात्रया वरिम्णा प्प्रथस्व ॥२९॥
शर्म्म च स्थो वर्म्म च स्थोच्छिद्रे बहुलेऽउभे ।
व्यचस्वती सँवसाथाम्भृतमग्निम्पुरीष्यम् ॥३०॥
सँवसाथाᳫं स्वर्विदा समीचीऽउरसा त्मना ।
अग्निमन्तर्ब्भरिष्यन्ती ज्योतिष्मन्तमजस्रमित् ॥३१॥
पुरीष्योसि विश्वभराऽअथर्वा त्वा प्प्रथमो निरमन्थदग्ने ।
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्द्धो विश्वस्य वाघतः ॥३२॥
तमु त्वा दध्यङ्ङृषिः पुत्रऽईधेऽअथर्वणः । वृत्रहणम्पुरन्दरम् ॥३३॥
तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम् । धनञ्जयᳫं रणेरणे ॥३४॥
सीद होतः स्वऽउ लोके चिकित्त्वान्त्सादया यज्ञᳫं सुकृतस्य योनौ ।
देवावीर्द्देवान्हविषा यजास्यग्ने बृहद्यजमाने वयो धाः ॥३५॥
नि होता होतृषदने विदानस्त्वेषो दीदिवाँ२॥ऽअसदत्सुदक्षः ।
अदब्धव्रतप्प्रमतिर्व्वसिष्ठः सहस्रम्भरः शुचिजिह्वोऽअग्निः ॥३६॥
सᳫंसीदस्व महाँ२॥ऽअसि शोचस्व देववीतमः ।
वि धूममग्नेऽअरुषम्मियेध्य सृज प्प्रशस्त दर्शतम् ॥३७॥

॥४॥ अपो देवीरुप सृज मधुमतीरयक्ष्माय प्प्रजाब्भ्यः ।
तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥३८॥
सन्ते वायुर्म्मातरिश्वा दधातूत्तानाया हृदयँय्यद्विकस्तम् ।
यो देवानाञ्चरसि प्प्राणथेन कस्मै देव वषडस्तु तुब्भ्यम् ॥३९॥
सुजातो ज्योतिषा सह शर्म्म वरूथमासदत्स्वः ।
वासोऽअग्ने विश्वरूपᳫं सँव्ययस्व विभावसो ॥४०॥
उदु तिष्ठ स्वध्वरावा नो देव्या धिया ।
दृशे च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः ॥४१॥
ऊर्द्ध्वऽऊ षु णऽऊतये तिष्ठा देवो न सविता ।
ऊर्द्ध्वो वाजस्य सनिता यदञ्जिभिर्व्वाघद्भिर्व्विह्वयामहे ॥४२॥
स जातो गर्ब्भोऽअसि रोदस्योरग्ने चारुर्व्विभृतऽओषधीषु ।
चित्रः शिशुः परि तमाᳫंस्यक्तून्प्रमातृब्भ्योऽअधि कनिक्रदद्गाः ॥४३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थिरो भव वीड्वङ्गऽआशुर्भव वाज्यर्वन् ।
पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहणः ॥४४॥
शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः ।
मा द्यावापृथिवीऽअभिशोचीर्मान्तरिक्षम्मा वनस्पतीन् ॥४५॥
प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा । भरन्नग्निम्पुरीष्यम्मा पाद्यायुषः पुरा ।
वृषाग्निं वृषणम्भरन्नपाङ्गर्भꣳ समुद्रियम् । अग्नऽआयाहि वीतये ॥४६॥
ऋतꣳ सत्यमृतꣳ सत्यमग्निम्पुरीष्यमङ्गिरस्वद्भरामः । ओषधयः प्रतिमोदध्वम-
ग्निमेतꣳ शिवमायन्तमभ्यत्र युष्माः । व्यस्यन्विश्वाऽअनिराऽअमीवा निषीदन्नो
ऽअप दुर्मतिञ्जहि ॥४७॥
ओषधयः प्रतिगृभ्णीत पुष्पवतीः सुपिप्पलाः ।
अयँवो गर्भऽऋत्वियः प्रत्नꣳ सधस्थमासदत् ॥४८॥
वि पाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसोऽअमीवाः ।
सुशर्मणो बृहतः शर्मणि स्यामग्नेरहꣳ सुहवस्य प्रणीतौ ॥४९॥

॥५॥ आपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन । महे रणाय चक्षसे ॥५०॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥५१॥
तस्माऽअरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥५२॥
मित्रः सꣳसृज्य पृथिवीम्भूमिञ्च ज्योतिषा सह ।
सुजातञ्जातवेदसमयक्ष्माय त्वा सꣳसृजामि प्रजाभ्यः ॥५३॥
रुद्राः सꣳसृज्य पृथिवीम्बृहज्ज्योतिः समीधिरे ।
तेषाम्भानुरजस्रऽइच्छुक्रो देवेषु रोचते ॥५४॥
सꣳसृष्टाँवसुभी रुद्रैर्धीरैः कर्मण्याम्मृदम् ।
हस्ताभ्याम्मृद्वीङ्कृत्वा सिनीवाली कृणोतु ताम् ॥५५॥
सिनीवाली सुकपर्दा सुकुरीरा स्वौपशा ।
सा तुभ्यमदिते मह्योखान्दधातु हस्तयोः ॥५६॥
उखाङ्कृणोतु शक्त्या बाहुभ्यामदितिर्धिया ।
माता पुत्रँय्यथोपस्थे साग्निम्बिभर्तु गर्भऽआ । मखस्य शिरोऽसि ॥५७॥
क वसवस्त्वा कृण्वन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्ध्रुवासि पृथिव्यसि धारया मयि प्रजाꣳ
रायस्पोषङ्गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानाय रुद्रास्त्वा कृण्वन्तु त्रैष्टुभेन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च्छन्दसाङ्गिरस्वद्ध्रुवास्यन्तरिक्क्षमसि धारया मयि प्प्रजाᳬं रायस्प्पोषङ्गौपत्त्यꣳ सुवीर्य्यꣳ सजातान्न्यजमानायादित्त्यास्त्वा कृण्ण्वन्तु जागतेन च्छन्दसाङ्गिरस्वद्ध्रुवासि द्यौरसि धारया मयि प्प्रजाᳬं रायस्प्पोषङ्गौपत्त्यꣳ सुवीर्य्यꣳ सजातान्न्यजमानाय विश्श्वे त्त्वा देवा वैश्श्वानराः कृण्ण्वन्त्वानुष्ष्टुभेन च्छन्दसाङ्गिरस्वद्ध्रुवासि दिशोसि धारया मयि प्प्रजाᳬं रायस्प्पोषङ्गौपत्त्यꣳ सुवीर्य्यꣳ सजातान्न्यजमानाय ॥५८॥

अदित्त्यै रास्न्नास्यदितिष्ट्टे बिलङ्गृब्भ्णातु। कृत्त्वाय सा महीमुखाम्मृन्मयीँय्योनिमग्ग्नये। पुत्रेब्भ्यः प्प्रायच्छददितिः श्रपयानिति ॥५९॥

वसवस्त्त्वा धूपयन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्रुद्द्रास्त्त्वा धूपयन्तु त्रैष्ट्टुभेन च्छन्दसाङ्गिरस्वदादित्त्यास्त्त्वा धूपयन्तु जागतेन च्छन्दसाङ्गिरस्वद्विश्श्वे त्त्वा देवा वैश्श्वानरा धूपयन्त्वानुष्ष्टुभेन च्छन्दसाङ्गिरस्वदिन्द्द्रस्त्त्वा धूपयतु वरुणस्त्त्वा धूपयतु विष्ण्णुस्त्त्वा धूपयतु ॥६०॥

॥६॥ अदितिष्ट्वा देवी विश्श्वदेव्यावती पृथिव्याः सधस्त्थेऽअङ्गिरस्वत्त्खनत्त्ववट देवानान्त्वा पत्क्नीर्द्देवीर्विश्श्वदेव्यावतीः पृथिव्याः सधस्त्थेऽअङ्गिरस्वद्दधतूखे धिषणास्त्त्वा देवीर्विश्श्वदेव्यावतीः पृथिव्याः सधस्त्थेऽअङ्गिरस्वदभीन्धतामुखे वरूत्रीष्ट्वा देवीर्विश्श्वदेव्यावतीः पृथिव्याः सधस्त्थेऽअङ्गिरस्वच्छ्रपयन्तूखे ग्ग्नास्त्त्वा देवीर्विश्श्वदेव्यावतीः पृथिव्याः सधस्त्थेऽअङ्गिरस्वत्त्पचन्तूखे जनयस्त्त्वाच्छिन्नपत्रा देवीर्विश्श्वदेव्यावतीः पृथिव्याः सधस्त्थेऽअङ्गिरस्वत्त्पचन्तूखे ॥६१॥

मित्रस्य चर्षणीधृतोवो देवस्य सानसि। द्द्युम्न्नञ्चित्रश्श्रवस्त्तमम् ॥६२॥

देवस्त्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्त्या।
अव्व्यथमाना पृथिव्यामाशा दिशऽआपृण ॥६३॥

उत्त्थाय बृहती भवोदु तिष्ठ ध्ध्रुवा त्त्वम्।
मित्रैतान्तऽउखाम्परिददाम्म्यभित्त्याऽएषा मा भेदि ॥६४॥

वसवस्त्त्वाच्छृन्दन्तु गायत्रेण च्छन्दसाङ्गिरस्वद्रुद्द्रास्त्त्वाच्छृन्दन्तु त्रैष्ट्टुभेन च्छन्दसाङ्गिरस्वदादित्त्यास्त्त्वाच्छृन्दन्तु जागतेन च्छन्दसाङ्गिरस्वद्विश्श्वे त्त्वा देवा वैश्श्वानराऽआच्छृन्दन्त्वानुष्ष्टुभेन च्छन्दसाङ्गिरस्वत् ॥६५॥

॥७॥ आकूतिमग्ग्निम्प्रयुजᳬं स्वाहा मनो मेधामग्ग्निम्प्रयुजᳬं स्वाहा चित्तँव्विज्ज्ञातमग्ग्निम्प्रयुजᳬं स्वाहा वाचो विधृतिमग्ग्निम्प्रयुजᳬं स्वाहा प्प्रजापतये मनवे स्वाहाग्ग्नये वैश्श्वानराय स्वाहा ॥६६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्वो देवस्य नेतुर्मर्त्तो वुरीत सुक्ख्यम् ।
विश्वो रायऽइषुद्ध्यति द्युम्नँवृणीत पुष्ष्यसे स्वाहा ॥६७॥
मा सु भित्त्था मा सु रिषोम्ब धृष्ष्णु वीरयस्व सु ।
अग्निश्चेदङ्करिष्ष्यथः ॥६८॥
दृꣳहस्व देवि पृथिवि स्वस्तयऽआसुरी माया स्वधया कृतासि । जुष्टन्देवेब्भ्यऽइदम-
स्तु हव्यमरिष्टा त्वमुदिहि यज्ञेऽअस्मिन् ॥६९॥
द्र्वन्नः सर्प्पिरासुतिः प्प्रत्नो होता वरेण्ण्यः । सहसस्पुत्रोऽअद्भुतः ॥७०॥
परस्याऽअधि सँवतोवराँ२॥ऽअब्भ्यातर । यत्राहमस्म्मि ताँ२॥ऽअव ॥७१॥
परमस्याः परावतो रोहिदश्श्वऽइहागहि ।
पुरीष्ष्यः पुरुप्प्रियोग्ने त्वन्तरा मृधः ॥७२॥
यदग्ने कानि कानि चिदा ते दारूणि दद्ध्मसि ।
सर्वन्तदस्तु ते घृतन्तज्जुषस्व यविष्ठ्य ॥७३॥
यदत्त्युपजिह्विका यद्वम्म्रोऽअतिसर्प्पति ।
सर्वन्तदस्तु ते घृतन्तज्जुषस्व यविष्ठ्य ॥७४॥
अहरहरप्प्रयावम्भरन्तोश्श्वायेव तिष्ठते घासमस्म्मै ।
रायस्प्पोषेण समिषा मदन्तोग्ने मा ते प्प्रतिवेशा रिषाम ॥७५॥
नाभा पृथिव्व्याः समिधानेऽअग्नौ रायस्प्पोषाय बृहते हवामहे ।
इरम्मदम्बृहदुक्थँय्यजत्रञ्जेतारमग्निम्पृतनासु सासहिम् ॥७६॥
याः सेनाऽअभीत्त्वरीराव्व्याधिनीरुगणाऽउत ।
ये स्तेना ये च तस्करास्ताँस्तेऽअग्नेपिदधाम्म्यास्ये ॥७७॥
दꣳष्ट्राब्भ्याम्मलिम्म्लूञ्जम्भ्यैस्तस्कराँ२॥ऽउत ।
हनुब्भ्याꣳ स्तेनान्भगवस्ताँस्त्वङ्खाद सुखादितान् ॥७८॥
ये जनेषु मलिम्म्लव स्तेनासस्तस्करा वने ।
ये कक्षेष्ष्वघायवस्ताँस्ते दधामि जम्भयोः ॥७९॥
योऽअस्म्मब्भ्यमरातीयाद्यश्च नो द्वेषते जनः ।
निन्दाद्योऽअस्म्मान्धिप्प्साच्च सर्वन्तम्मस्म्मसा कुरु ॥८०॥
सꣳशितम्मे ब्रह्म सꣳशितँवीर्य्यम्बलम् ।
सꣳशितङ्क्षत्रञ्जिष्ष्णु यस्याहमस्म्मि पुरोहितः ॥८१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उदे॑षाम्बा॒हूऽअति॑र॒मुद्वर्चो॒ऽअथो॒ बल॑म् ।
क्षि॒णोमि॒ ब्रह्म॑णा॒मित्रा॒नुन्न॑यामि॒ स्वाँ२॥ऽअ॒हम् ॥८२॥
अन्न॑पते॒ऽन्न॑स्य नो देह्यनमी॒वस्य॑ शु॒ष्मिण॑ः ।
प्रप्र॑ दा॒तार॑न्तारिष॒ऽऊर्ज॑न्नो धेहि द्वि॒पदे॒ चतु॑ष्पदे ॥८३॥

इत्येकादशोऽध्यायः

अथ द्वादशोऽध्यायः

ऋषिः—वत्सप्रीः १, ६—१०, १८—२९, ३३, ४०, ४१ । कुत्सः २ । श्यावाश्वः ३—५ । ध्रुवः ११ । शुनःशेपः १२ । त्रितः १३—१७ । विरूपाक्षः ३० । विरूपः ३६—३९, ११६ । तापसः ३१, ३२ । वसिष्ठः ३४, ३५ । दीर्घतमा ४२ । सोमाहुतिः ४३—४६ । विश्वामित्रः ४७—५४ । प्रियमेधाः ५५ । सुतजेतृमधुच्छन्दा ५६ । मधुच्छन्दा ५७—६५ । विश्वावसुः ६६—६८ । कुमारहारितः ६९—७४ । भिषग् ७५—९० । वरुणः ९१—१०१ हिरण्यगर्भः १०२—१०५ । पावकाग्निः १०६—१११ । गोतमः ११२—११४ । वत्सारः ११५ । प्रजापतिः ११७ ॥

देवता—अग्निः १, २, ६—११, १३, १५,—३४, ३६—४४, ४६—५४, ५७—५९, ६६, १०३, १०४, १०६, १०८, १०९, १११, ११५,—११७ । सविता ३ । गरुत्मान् ४ । विष्णुः ५ । वरुणः १२ । जीवेश्वरौ १४ । आपः ३५, ५५ । पितरः ४५ । इन्द्रः ५६ । दम्पती ६० । पत्नी ६१ । निर्ऋतिः ६२—६४ । यजमानः ६५ । कृषीवलाः कवयो वा ६७, ६८ । कृषीवलाः ६९—७१ । मित्रादयो लिङ्गोक्ताः ७२ । अघ्न्याः ७३ । अश्विनौ ७४ । वैद्यः ७५—७७, ७९, ८१, ८५,—८७ । चिकित्सुः ७८ । ओषधयः ८०, ८२ । वैद्याः ८३, ८४, ८८—९३, ९५, ९६, ९८, १०० । भिषजः ९४, १०१ । भिषग्वराः ९७ । ओषधिः ९९ । कः १०२ । विद्वान् १०५, १०७, ११० । सोमः ११२—११४ ॥

छन्दः—भुरिक्पङ्क्तिः १, २५ । आर्षीत्रिष्टुप् २, विराड्जगती ३ । भुरिग्धृतिः ४ । भुरिगुत्कृतिः ५ । निचृदार्षीत्रिष्टुप् ६, १८—२२, २४, ३३, ४५, ६२, १०२ । भुरिगार्ष्यनुष्टुप् ७ । आर्षीत्रिष्टुप् ८, ३४, ३५, ४७, ६१, ६४, ७० । निचृदार्षीगायत्री ९, ४०, निचृद्गायत्री १०, ३६, ४१ । आर्ष्यनुष्टुप् ११ । विराडार्षीत्रिष्टुप् १२. २६—२९, ४२, ६६, ६८ । भुरिगार्षीपङ्क्तिः १३, ४८, ४९, ५१, ६३, १०७, ११३ । भुरिग्जगती १४ । विराट्त्रिष्टुप् १५, १०५ । विराडनुष्टुप् १६, १७, ३१, ३२, ४३, ५०, ५४, ५५, ७२, ८२, ८४, ८७,-९०, ९४, ९५, ९९ । आर्षीत्रिष्टुप् २३ । गायत्री ३०, ६७, ११६, ११७ । भुरिगार्ष्युष्णिक् ३७ । निचृदार्ष्यनुष्टुप् ३८, ५२ । निचृदनुष्टुप् ३९, ५६, ७७, ८३, ८६, ९२, ९८, १०१ । स्वराडार्षीत्रिष्टुप् ४४ । भुरिगार्षीत्रिष्टुप् ४६ । स्वराडनुष्टुप् ५३ । भुरिगुष्णिक् ५७, ५९ । भुरिगुपरिष्टाद्बृहती ५८ । आर्षीपङ्क्तिः ६०, ११० । आर्षीजगती ६५, ७४ । त्रिष्टुप् ६९ । विराट्पङ्क्तिः ७१ । भुरिगार्षीगायत्री ७३ । निचृदनुष्टुप् ७५, ७६, ७८—८१, ८५, ९१, ९६, ९७ । विराडार्ष्यनुष्टुप् ८३ । विराड्बृहती १०० । निचृदुष्णिक् १०३ । भुरिग्गायत्री १०४ । निचृत्पङ्क्तिः १०६, १०८ । निचृदार्षीपङ्क्तिः १०९ । स्वराडार्षीपङ्क्तिः १११ । निचृद्गायत्री ११२, ११५ । आसुर्य्युष्णिक् ११४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अ॰ १२ अनु॰ १ , मन्त्राः १–११

स्वरः—पञ्चमः १, १३, २५, ४८, ४६—५१, ६०, ६३, ७१, १०६—१११, ११३ । धैवतः २, ६, ८, १२, १५, १८—२४, २६—२६, ३३—३५, ४२, ४४—४७, ६१, ६२, ६४, ६६, ६८—७०, १०२, १०५ । निषादः ३, १४, ६५, ७४ । ऋषभः ४, ३७, ५७, ५६, १०३, ११४ । षड्जः ५, ६, १०, ३०, ३६, ४०, ४१, ६७, ७३, १०४, ११२, ११५—११७ । गान्धारः ७, ११, १६, १७, ३१, ३२, ३८, ३६, ४३, ५०, ५२—५६, ७२, ७५—६६, १०१ । मध्यमः ५८, १०० ॥

॥१॥ दृशानो रुक्मऽउर्व्या व्यद्यौद्दुर्म्मर्षमायुः श्रिये रुचानः ।
अग्निरमृतोऽअभवद्वयोभिर्य्यदेनन्द्यौरजनयत्सुरेताः ॥१॥
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची ।
द्यावाक्षामा रुक्मोऽअन्तर्विभाति देवाऽअग्निन्धारयन्द्रविणोदाः ॥२॥
विश्श्वा रूपाणि प्प्रतिमुञ्चते कविः प्प्रासावीद्भद्रन्द्विपदे चतुष्प्पदे ।
वि नाकमक्ख्यत्त्सविता वरेण्ण्योनु प्प्रयाणमुषसो विराजति ॥३॥
सुपर्ण्णोसि गरुत्माँस्त्रिवृत्ते शिरो गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ । स्तोमऽआत्मा
च्छन्दाꣳस्यङ्गानि यजूꣳषि नाम । साम ते तनूर्वामदेव्यंय्यज्ञायज्ञियम्पुच्छ-
न्धिष्ण्ण्याः शफाः । सुपर्ण्णोसि गरुत्मान्दिवङ्गच्छ स्वः पत ॥४॥
विष्ण्णोः क्क्रमोसि सपत्नहा गायत्रञ्छन्दऽआरोह पृथिवीमनु विक्क्रमस्व विष्ण्णोः
क्क्रमोस्यभिमातिहा त्रैष्टुभञ्छन्दऽआरोहान्तरिक्षमनु विक्क्रमस्व विष्ण्णोः क्क्रमो-
स्यरातीयतो हन्ता जागतञ्छन्दऽआरोह दिवमनु विक्क्रमस्व विष्ण्णोः क्क्रमोसि शत्रूयतो
हन्तानुष्टुभञ्छन्दऽआरोह दिशोनु विक्क्रमस्व ॥५॥
अक्क्रन्ददग्नि स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धोऽअक्ख्यदा रोदसी भानुना भात्यन्तः ॥६॥
अग्नेऽभ्यावर्त्तिन्नभि मा निवर्त्तस्वायुषा वर्चसा प्प्रजया धनेन ।
सन्न्या मेधया रय्या पोषेण ॥७॥
अग्नेऽअङ्गिरः शतन्ते सन्त्वावृतः सहस्रन्तऽउपावृतः ।
अधा पोषस्य पोषेण पुनर्न्नो नष्टमाकृधि पुनर्न्नो रयिमाकृधि ॥८॥
पुनरूर्ज्जा निवर्त्तस्व पुनरग्नऽइषायुषा । पुनर्न्नः पाह्यꣳहसः ॥९॥
सह रय्या निवर्त्तस्वाग्ने पिन्वस्व धारया । विश्श्वप्स्न्या विश्श्वतस्प्परि ॥१०॥
आ त्वाहार्षमन्तरभूर्द्ध्रुवस्तिष्ठाविचाचलिः ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत् ॥११॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उदुत्तमँव्वरुण पाशमस्म्मदवाधमँव्वि मद्ध्यमꣳ श्रथाय ।
अथा व्वयमादित्त्य व्व्रते तवानागसोऽअदितये स्याम ॥१२॥
अग्ग्रे बृहन्नुषसामूर्द्ध्वोऽअस्त्थान्निर्ज्जगन्वान्तमसो ज्ज्योतिषागात् ।
अग्ग्निर्ब्भानुना रुशता स्वङ्गऽआ जातो व्विश्श्वा सद्मान्यप्प्राः ॥१३॥
हꣳसः शुचिषद्व्वसुरन्तरिक्षसद्धोता व्वेदिषदतिथिर्द्दुरोणसत् ।
नृषद्व्वरसदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥१४॥
सीद त्त्वम्मातुरस्याऽउपस्त्थे व्विश्श्वान्यग्ग्ने व्वयुनानि व्विद्वान् ।
मैनान्तपसा मार्च्चिषाभिशोचीरन्तरस्याꣳ शुक्क्रज्ज्योतिर्व्विभाहि ॥१५॥
अन्तरग्ग्ने रुचा त्त्वमुखायाः सदने स्वे । तस्यास्त्त्वꣳ हरसा तपञ्जातवेदः शिवो भव ॥१६॥
शिवो भूत्त्वा मह्यमग्ग्नेऽअथो सीद शिवस्त्त्वम् ।
शिवाः कृत्त्वा दिशः सर्व्वाः स्वँय्योनिमिहासदः ॥१७॥
॥२॥ दिवस्प्परि प्प्रथमञ्जज्ञेऽअग्ग्निरस्म्मद्द्वितीयम्परि जातवेदाः ।
तृतीयमप्प्सु नृमणाऽअजस्त्रमिन्धानऽएनञ्जरते स्वाधीः ॥१८॥
व्विद्मा तेऽअग्ग्ने त्त्रेधा त्त्रयाणि व्विद्मा ते धाम व्विभृता पुरुत्त्रा ।
व्विद्मा ते नाम परमङ्गुहा यद्व्विद्मा तमुत्त्सँय्यतऽआजगन्थ ॥१९॥
समुद्द्रे त्त्वा नृमणाऽअप्प्स्वन्तर्नृचक्क्षाऽईधे दिवोऽअग्ग्नऽऊधन् ।
तृतीये त्त्वा रजसि तस्त्थिवाꣳसमपामुपस्त्थे महिषाऽअवर्द्धन् ॥२०॥
अक्क्रन्ददग्ग्नि स्त्तनयन्निव द्यौः क्षामा रेरिहद्व्वीरुधः समञ्जन् ।
सद्यो जज्ज्ञानो व्वि हीमिद्धोऽअक्ख्यदा रोदसी भानुना भात्त्यन्तः ॥२१॥
श्रीणामुदारो धरुणो रयीणाम्मनीषाणाम्प्रार्प्पणः सोमगोपाः ।
व्वसुः सूनुः सहसोऽअप्प्सु राजा व्विभात्त्यग्ग्रऽउषसामिधानः ॥२२॥
व्विश्श्वस्य केतुर्ब्भुवनस्य गर्ब्भऽआ रोदसीऽअपृणाज्जायमानः ।
व्वीडुञ्चिदद्द्रिमभिनत्त्परायञ्जना यदग्ग्निमयजन्त पञ्च ॥२३॥
उशिक्क्पावकोऽअरतिः सुमेधा मर्त्त्येष्ष्वग्ग्निरमृतो निधायि ।
इयर्त्ति धूममरुषम्भरिब्भ्रदुच्छुक्क्रेण शोचिषा द्यामिनक्षन् ॥२४॥
दृशानो रुक्क्मऽउर्व्व्या व्व्यद्यौद्दुर्म्मर्षमायुः श्रिये रुचानः ।
अग्ग्निरमृतोऽअभवद्व्वयोभिर्य्यदेनन्द्यौरजनयत्त्सुरेताः ॥२५॥
यस्त्तेऽअद्य कृणवद्भद्द्रशोचेऽपूपन्देव घृतवन्तमग्ग्ने ।
प्र तन्नय प्प्रतरँव्वस्योऽअच्छाभि सुम्म्नन्देवभक्तँय्यविष्ठ ॥२६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आ तम्भज सौश्श्रवसेष्ष्वग्ग्नऽउक्क्थऽउक्क्थुऽआभज शुस्यमाने ।
प्प्रियः सूर्य्ये प्प्रियोऽअग्ग्ना भवात्त्युज्जातेन भिनदद्दुज्जनित्त्वैः ॥२७॥
त्वामग्ग्ने यजमानाऽअनु द्यून्विश्श्वा वसु दधिरे वार्य्याणि ।
त्वया सह द्रविणमिच्छमाना व्व्रजङ्गोमन्तमुशिजो विवव्व्रुः ॥२८॥
अस्त्ताव्यग्ग्निर्न्नुराᳬं सुशेवो वैश्श्वानुरऽऋषिभिः सोमगोपाः ।
अद्वेषे द्यावापृथिवी हुवेम देवा धुत्त रयिमुस्म्मे सुवीरम् ॥२९॥

॥३॥ सुमिधाग्ग्निन्दुवस्यत घृतैर्बोधयुतातिथिम् ।
आस्म्मिन्हव्व्या जुहोतन ॥३०॥
उदु त्त्वा विश्श्वे देवाऽअग्ग्ने भरन्तु चित्तिभिः ।
स नो भव शिवस्त्त्वᳬं सुप्प्रतीको विभावसुः ॥३१॥
प्रेदग्ग्ने ज्ज्योतिष्म्मान्याहि शिवेभिरर्च्चिभिष्ट्वम् ।
बृहद्भिर्भ्भानुभिर्भ्भासन्मा हिᳬंसीस्त्तन्न्वा प्प्रजाः ॥३२॥
अक्क्रन्ददुग्ग्नि स्त्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समुञ्जन् ।
सुद्यो जज्ज्ञानो वि हीमिद्धोऽअक्ख्युदा रोदसी भानुना भात्त्युन्तः ॥३३॥
प्रप्प्रायमुग्ग्निर्भ्भरतस्य शृण्ण्वे वि यत्त्सूर्य्यो न रोचते बृहद्भाः ।
अभि यः पूरुम्पृतनासु तुस्त्थौ दीदाय दैव्व्योऽअतिथिः शिवो नः ॥३४॥
आपो देवीः प्प्रतिगृब्भ्णीत भस्म्मैतत्त्स्योने कृणुद्ध्वᳬं सुरभाऽउ लोके ।
तस्म्मै नमन्ताञ्जनयः सुपत्क्नीर्म्मातेव पुत्रम्बिभृताप्प्स्वेनत् ॥३५॥
अप्प्स्वग्ग्ने सधिष्ट्टव सौषधीरनुरुद्ध्यसे । गर्ब्भे सञ्जायसे पुनः ॥३६॥
गर्ब्भोऽअस्योषधीनाङ्गर्ब्भो वनुस्प्पतीनाम् ।
गर्ब्भो विश्श्वस्य भूतस्याग्ग्ने गर्ब्भोऽअपामसि ॥३७॥
प्रसद्य भस्म्मना योनिमुपश्श्च पृथिवीमग्ग्ने ।
सᳬंसृज्ज्य मातृभिष्ट्वञ्ज्योतिष्म्मान्पुनरासदः ॥३८॥
पुनरासद्य सदनमुपश्श्च पृथिवीमग्ग्ने । शेषे मातुर्य्यथोपस्त्थेन्तरस्याᳬं शिवतमः ॥३९॥
पुनरूर्ज्जा निवर्त्तस्व पुनरग्ग्नऽइषायुषा । पुनर्न्नः पाह्यᳬंहसः ॥४०॥
सह रय्या निवर्त्तस्वाग्ग्ने पिन्वस्व धारया । विश्श्वप्प्स्न्या विश्श्वतस्प्परि ॥४१॥
बोधा मेऽअस्य वचसो यविष्ठ मᳬंहिष्ठस्य प्प्रभृतस्य स्वधावः ।
पीयति त्त्वोऽअनु त्त्वो गृणाति वन्दारुष्टे तन्न्वँवन्देऽअग्ग्ने ॥४२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स बोधि सूरिर्म्मघवा वसुपते वसुदावन् ।
युयोद्ध्यस्म्मद्द्वेषाꣳसि विश्वकर्म्मणे स्वाहा ॥४३॥
पुनस्त्वादित्या रुद्रा वसवः समिन्धताम्पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वन्तन्न्वँवर्द्धयस्व सत्त्याः सन्तु यजमानस्य कामाः ॥४४॥

॥४॥ अपेत वीत वि च सर्प्पतातो येत्र स्थ पुराणा ये च नूतनाः ।
अदाद्यमोवसानम्पृथिव्याऽअक्रन्निमम्पितरो लोकमस्म्मै ॥४५॥
सञ्ज्ञानमसि कामधरणम्मयि ते कामधरणम्भूयात् ।
अग्नेर्भस्म्मास्यग्नेः पुरीषमसि चित स्थ परिचितऽऊर्द्ध्वचितः श्रयद्ध्वम् ॥४६॥
अयꣳ सोऽअग्निर्य्यस्मिन्त्सोममिन्द्रः सुतन्दधे जठरे वावशानः ।
सहस्रियँवाजमत्त्यन्न सप्तिꣳ ससवान्त्सन्त्स्तूयसे जातवेदः ॥४७॥
अग्ने यत्ते दिवि वर्च्चः पृथिव्याँय्यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्व्वाततन्थ त्वेषः स भानुरर्ण्णवो नृचक्षाः ॥४८॥
अग्ने दिवोऽअर्ण्णमच्छा जिगास्यच्छा देवाँ२ऽऊचिषे धिष्ण्या ये ।
या रोचने परस्तात्सूर्य्यस्य याश्चावस्तादुपतिष्ठन्तऽआपः ॥४९॥
पुरीष्यासोऽअग्नयः प्प्रावणेभिः सजोषसः ।
जुषन्ताँय्यज्ञमद्रुहोनमीवाऽइषो महीः ॥५०॥
इडामग्ने पुरुदꣳसꣳ सनिङ्गोः शश्वत्तमꣳ हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्त्वस्म्मे ॥५१॥
अयन्ते योनिर्ऋत्वियो यतो जातोऽअरोचथाः ।
तञ्जानन्नग्नऽआरोहाथा नो वर्द्धया रयिम् ॥५२॥
चिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीद परिचिदसि तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥५३॥
लोकम्पृण च्छिद्रम्पृणाथो सीद ध्रुवा त्वम् ।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन् ॥५४॥
ताऽअस्य सूददोहसः सोमꣳ श्रीणन्ति पृश्नयः ।
जन्मन्देवानाँविशस्त्रिष्ष्वारोचने दिवः ॥५५॥
इन्द्रँविश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ।
रथीतमꣳ रथीनाँवाजानाꣳ सत्पतिम्पतिम् ॥५६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समितᳫं सङ्कल्पेथाᳬं सम्प्रियौ रोचिष्णू सुमनस्यमानौ ।
इषमूर्जमभि सँवसानौ ॥५७॥
सँवाम्मनाᳬंसि सँव्व्रता समु चित्तान्याकरम् ।
अग्ने पुरीष्याधिपा भव त्वन्नऽइषमूर्जँय्यजमानाय धेहि ॥५८॥
अग्ने त्वम्पुरीष्यो रयिमान्पुष्टिमाँ२॥ऽअसि ।
शिवाः कृत्वा दिशः सर्वाः स्वँय्योनिमिहासदः ॥५९॥
भवतन्नः समनसौ सचेतसावरेपसौ ।
मा यज्ञᳫं हिᳫंसिष्टम्मा यज्ञपतिञ्जातवेदसौ शिवौ भवतमद्य नः ॥६०॥
मातेव पुत्रम्पृथिवी पुरीष्यमग्निᳬं स्वे योनावभारुखा ।
ताँविश्वैर्देवैर्ऋतुभिः सँविदानः प्प्रजापतिर्विश्वकर्म्मा विमुञ्चतु ॥६१॥

॥५॥ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्यामन्विहि तस्करस्य ।
अन्यमस्मदिच्छ सा तऽइत्त्या नमो देवि निर्ऋते तुब्भ्यमस्तु ॥६२॥
नमः सु ते निर्ऋते तिग्मतेजोयस्मयँविचृता बन्धमेतम् ।
यमेन त्वँय्यम्म्या सँविदानोत्तमे नाकेऽअधिरोहयैनम् ॥६३॥
यस्यास्ते घोरऽआसञ्जुहोम्म्येषाम्बन्धानामवसर्ज्जनाय ।
यान्त्वा जनो भूमिरिति प्प्रमन्दते निर्ऋतिन्त्वाहम्परिवेद विश्वतः ॥६४॥
यन्ते देवी निर्ऋतिराबबन्ध पाशङ्ग्रीवास्वविचृत्त्यम् ।
तन्ते विष्याम्म्यायुषो न मद्ध्यादथैतम्पितुमद्धि प्प्रसूतः । नमो भूत्यै येदञ्चकार ॥६५॥
निवेशनः सङ्गमनो वसूनाँविश्वा रूपाभिचष्टे शचीभिः ।
देवऽइव सविता सत्त्यधर्म्मेन्द्रो न तस्थौ समरे पथीनाम् ॥६६॥
सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक् । धीरा देवेषु सुम्नया ॥६७॥
युनक्त सीरा वि युगा तनुद्ध्वङ्कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभराऽअसन्नो नेदीयऽइत्सृण्यः पक्वमेयात् ॥६८॥
शुनᳫं सुफाला विकृषन्तु भूमिᳫं शुनङ्कीनाशाऽअभियन्तु वाहैः ।
शुनासीरा हविषा तोशमाना सुपिप्पलाऽओषधीः कर्त्तनास्म्मे ॥६९॥
घृतेन सीता मधुना समज्यताँविश्वैर्देवैरनुमता मरुद्भिः ।
ऊर्ज्जस्वती पयसा पिन्वमानास्म्मान्त्सीते पयसाब्भ्याववृत्स्व ॥७०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लाङ्गलम्पवीरवत्सुशेवꣳ सोमपित्सरु ।
तदुद्वपति गामविम्प्रफर्व्यञ्च पीवरीम्प्रस्थावद्रथवाहणम् ॥७१॥
कामङ्कामदुघे धुक्ष्व मित्राय वरुणाय च ।
इन्द्रायाश्विभ्याम्पूष्णे प्प्रजाभ्यऽओषधीभ्यः ॥७२॥
विमुच्यध्वमघ्न्या देवयानाऽअगन्म तमसस्पारमस्य । ज्योतिरापाम ॥७३॥
सजूरब्दोऽअयवोभिः सजूरुषाऽअरुणीभिः । सजोषसावश्विना दꣳसोभिः सजूः
सूरऽएतशेन सजूर्वैश्वानरऽइडया घृतेन स्वाहा ॥७४॥

॥६॥ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा ।
मनै नु बभ्रूणामहꣳ शतन्धामानि सप्त च ॥७५॥
शतँवोऽअम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूयमिमम्मेऽअगदङ्कृत ॥७६॥
ओषधीः प्प्रतिमोदध्वम्पुष्पवतीः प्प्रसूवरीः ।
अश्वाऽइव सजित्त्वरीर्वीरुधः पारयिष्ण्वः ॥७७॥
ओषधीरिति मातरस्तद्वो देवीरुपब्रुवे ।
सनेयमश्वङ्गाँवासऽआत्मानन्तव पूरुष ॥७८॥
अश्वत्थे वो निषदनम्पर्णे वो वसतिष्कृता ।
गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥७९॥
यत्रौषधीः समग्मत राजानः समिताविव ।
विप्प्रः सऽउच्यते भिषग्रक्षोहामीवचातनः ॥८०॥
अश्वावतीꣳ सोमावतीमूर्जयन्तीमुदोजसम् ।
आवित्सि सर्वाऽओषधीरस्माऽअरिष्टतातये ॥८१॥
उच्छुष्माऽओषधीनाङ्गावो गोष्ठादिवेरते ।
धनꣳ सनिष्यन्तीनामात्मानन्तव पूरुष ॥८२॥
इष्कृतिर्नाम वो माताथो यूयꣳ स्थ निष्कृतीः ।
सीराः पतत्रिणी स्थन यदामयति निष्कृथ ॥८३॥
अति विश्वाः परिष्ठा स्तेनऽइव व्रजमक्रमुः ।
ओषधीः प्प्राचुच्यवुर्यत्किञ्च तन्वो रपः ॥८४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदिमा वाजयन्नहमोषधीर्हस्तऽआदधे ।
आत्क्मा यक्ष्मस्य नश्श्यति पुरा जीवगृभो यथा ॥८५॥
यस्यौषधीः प्प्रसर्प्पथाङ्गमङ्गम्परुष्प्परुः ।
ततो यक्ष्मँव्विबाधद्ध्वऽउग्रो मद्ध्यमशीरिव ॥८६॥
साकँय्यक्ष्म प्प्रपत चाषेण किकिदीविना ।
साकँव्वातस्य ध्राज्ज्या साकन्नश्श्य निहाकया ॥८७॥
अन्या वोऽअन्यामवत्त्वन्यान्यस्याऽउपावत ।
ताः सर्वाः सँव्विदानाऽइदम्मे प्प्रावता व्वचः ॥८८॥
याः फलिनीर्य्याऽअफलाऽअपुष्प्पा याश्च पुष्प्पिणीः ।
बृहस्प्पतिप्प्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥८९॥
मुञ्चन्तु मा शपथ्थ्यादथो वरुण्ण्यादुत ।
अथो यमस्य पड्वीशात्सर्वस्म्माद्देवकिल्ब्बिषात् ॥९०॥
अवपतन्तीरवदन्दिवऽओषधयस्प्परि ।
यञ्जीवमश्नवामहै न स रिष्ष्याति पूरुषः ॥९१॥
याऽओषधीः सोमराज्ञीर्ब्बह्वीः शतविचक्षणाः ।
तासामसि त्वमुत्तमारङ्कामाय शꣳ हृदे ॥९२॥
याऽओषधीः सोमराज्ञीर्व्विष्ठिताः पृथिवीमनु ।
बृहस्प्पतिप्प्रसूताऽअस्यै सन्दत्त वीर्य्यम् ॥९३॥
याश्चेदमुपशृण्ण्वन्ति याश्च दूरम्परागताः ।
सर्वाः सङ्गत्त्य वीरुधोस्यै सन्दत्त वीर्य्यम् ॥९४॥
मा वो रिषत्खनिता यस्म्मै चाहङ्खनामि वः ।
द्विपाच्चतुष्प्पादस्म्माकꣳ सर्वमस्त्वनातुरम् ॥९५॥
ओषधयः समवदन्त सोमेन सह राज्ञा ।
यस्म्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि ॥९६॥
नाशयित्री बलासस्यार्शसऽउपचितामसि ।
अथो शतस्य यक्ष्माणाम्पाकरोरसि नाशनी ॥९७॥
त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्प्पतिः ।
त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥९८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सह॑स्व मेऽअरा॑तीः॒ सह॑स्व पृतनाय॒तः ।
सह॑स्व॒ सर्व्व॑म्पा॒प्मान॒ꣳ सह॑मानास्योषधे ॥९९॥
दी॒र्घायु॑स्त्तऽओषधे खनि॒ता यस्म्मै॑ च त्वा॒ खना॑म्य॒हम् ।
अथो॒ त्वन्दी॒र्घायु॑र्भू॒त्त्वा श॒तव॑ल्शा॒ वि॒रो॑हतात् ॥१००॥
त्वमु॑त्त॒मास्यो॑षधे॒ तव॑ वृ॒क्षाऽउप॑स्त्तयः ।
उप॑स्त्ति॒रस्त्तु॒ सो॒ऽस्म्माकँ॒य्यो॒ऽअ॒स्म्माँ॥ऽअ॑भि॒दास॑ति ॥१०१॥

॥७॥ मा मा॑ हि॒ꣳसीज्ज॑नि॒ता यः॒ पृ॑थि॒व्या यो वा॒ दिव॒ꣳ स॒त्यध॑र्म्मा॒ व्यान॑ट् ।
यश्चा॒पश्च॒न्द्राः प्र॑थ॒मो ज॒जान॒ कस्म्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥१०२॥
अ॒भ्याव॑र्त्तस्व पृथिवि य॒ज्ञेन॒ पय॑सा स॒ह । व॒पान्ते॑ऽअ॒ग्निरि॑षि॒तोऽअ॑रोहत् ॥१०३॥
अग्ने॒ यत्ते॑ शु॒क्रँय्यच्च॒न्द्रँय्यत्पू॒तँय्यच्च॑ य॒ज्ञिय॑म् । तद्दे॒वेभ्यो॑ भरामसि ॥१०४॥
इ॒षमू॒र्जम॒हमि॒तऽआद॑मृ॒तस्य॒ योनि॑म्म॒हि॒षस्य॒ धारा॑म् ।
आ मा॒ गोषु॒ वि॒शत्त्वा त॒नूषु॒ जहा॑मि से॒दिमनि॑रा॒ममी॑वाम् ॥१०५॥
अग्ने॒ तव॒ श्रवो॒ वयो॒ महि॑ भ्राज॒न्तेऽअ॒र्चयो॑ विभावसो ।
बृह॑द्भानो॒ शव॑सा॒ वाज॑मु॒क्थ्य॒न्दधा॑सि दा॒शुषे॑ कवे ॥१०६॥
पा॒व॒कव॑र्चाः शु॒क्रव॑र्चा॒ऽअनू॑नवर्चा॒ऽउदि॑यर्षि भा॒नुना॑ ।
पु॒त्रो मा॒तरा॑ वि॒चर॒न्नुपा॑वसि पृ॒णक्षि॒ रोद॑सीऽउ॒भे ॥१०७॥
ऊर्जो॑नपाज्जातवेदः सुश॒स्त्तिभि॒र्म्मन्द॑स्व धी॒तिभि॑र्हि॒तः ।
त्वेऽइषः॒ सन्द॑धु॒र्भूरि॑वर्प्पसश्चि॒त्रोत॑यो वा॒मजा॑ताः ॥१०८॥
इ॒र॒ज्य॒न्न॑ग्ने प्रथयस्व ज॒न्तुभि॑र॒स्म्मे रायो॑ऽअमर्त्त्य ।
स द॑र्श॒तस्य॒ वपु॑षो॒ वि रा॑जसि पृ॒णक्षि॑ सानु॒सिं क्रतु॑म् ॥१०९॥
इ॒ष्क॒र्त्तार॑मध्व॒रस्य॒ प्रचे॑तस॒ङ्क्षय॑न्त॒ꣳ राध॑सो म॒हः ।
रा॒तिँवा॒मस्य॑ सु॒भगा॑म्म॒हीमि॒षन्दधा॑सि सान॒सिꣳ र॒यिम् ॥११०॥
ऋ॒तावा॑नम्महि॒षँवि॒श्वद॑र्शतम॒ग्निꣳ सु॒म्नाय॑ दधिरे पु॒रो जनाः॑ ।
श्रुत्क॑र्णꣳ स॒प्रथ॑स्तत्तमन्त्वा गि॒रा दैव्य॒म्मानु॑षा यु॒गा ॥१११॥
आप्प्या॑यस्व॒ समे॑तु ते वि॒श्वत॑ः सोम॒ वृष्ण्य॑म् । भवा॒ वाज॑स्य सङ्ग॒थे ॥११२॥
सन्ते॒ पया॑ꣳसि॒ सम्॑ यन्तु॒ वाजाः॒ सँवृष्ण्या॑न्यभिमाति॒षाह॑ः ।
आ॒प्प्याय॑मानो॒ऽअ॒मृता॑य सोम दि॒वि श्रवा॑ꣳस्युत्त॒मानि॑ धिष्व ॥११३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आप्प्यायस्व मदिन्तम् सोम् विश्श्वेभिरꣳशुभिः ।
भवा नः सुप्प्रथस्तमः सखा वृधे ॥११४॥
आ ते वृत्सो मनो यमत्परमाच्चित्सुधस्त्थात् । अग्ग्ने त्वाङ्कामया गिरा ॥११५॥
तुब्भ्युन्ताऽअङ्गिरस्तम् विश्श्वाः सुक्षितयः पृथक् । अग्ग्ने कामाय येमिरे ॥११६॥
अग्निः प्प्रियेषु धामसु कामो भूतस्य भव्यस्य । सम्म्राडेको विराजति ॥११७॥

इति द्वादशोऽध्यायः

अथ त्रयोदशोऽध्यायः

अ॰१३,अनु॰१,मन्त्राः१–३

ऋषिः—वत्सारः १—३ । हिरण्यगर्भः ४—८ । वामदेवः ९—१४ । त्रिशिराः १५—१९ । अग्निः २०, २१ । इन्द्राग्नी २२—२५ । सविता २६ । गोतमः २७—३५ । भारद्वाजः ३६ । विरूपः ३७—५१ । उशनाः ५२—५८ ॥

देवता—अग्निः १, २, ९—१६, १८, १९, २२, ३६—४५, ४७—५२ । आदित्यः ३ । प्रजापतिः ४, १७, २४, ३०, ५५—५८ । ईश्वरः ५ । सूर्य्यः ८, ४६ । हिरण्यगर्भः ६, ७ । पत्नी २०, २१ । बृहस्पतिः २३ । ऋतवः २५ । क्षत्रपतिः २६ । विश्वेदेवाः २७—२९ । वरुणः ३१ । द्यावापृथिव्यौ ३२ । विष्णुः ३३ । जातवेदाः ३४, ३५ । आपः ५३ । प्राणाः ५४ ॥

छन्दः—आर्चीपङ्क्तिः १ विराट्त्रिष्टुप् २ । निचृत्त्रिष्टुप् ३, ५ । आर्षीत्रिष्टुप् विराडार्षीत्रिष्टुप् ५ । भुरिगुष्णिक् ६ । अनुष्टुप् ७, १७, २०, २३ । निचृदनुष्टुप् ८, २१, २६ । भुरिक्पङ्क्तिः ९,१० । निचृत्त्रिष्टुप् ११, ४२—४४, ४६ । भुरिगार्षीपङ्क्तिः १२ । निचृदतिजगती १३ । भुरिगनुष्टुप् १४, २२ । निचृदार्षीत्रिष्टुप् १५ । स्वराडार्ष्यनुष्टुप् १६ । प्रस्तारपङ्क्तिः १८ । भुरिगतिजगती १९ । निचृद्धृतिः २४ । भुरिगतिजगती[क], भुरिग्ब्राह्मीबृहती[र], २५ । निचृद्गायत्री २७, २९, ३३, ३६, ३७, ५२ । गायत्री २८, ३२ । आर्षीपङ्क्तिः ३० । त्रिष्टुप् ३१, ३८, ४१, ४५ । भुरिक्त्रिष्टुप् ३४ । निचृद्बृहती ३५, ३९ । निचृदुष्णिक् ४० । विराड्ब्राह्मीपङ्क्तिः ४७ । निचृद्ब्राह्मीपङ्क्तिः ४८ । कृतिः ४९ । भुरिक्कृतिः ५०, ५१ । भुरिग्ब्राह्मीपङ्क्तिः[ग], ब्राह्मीजगती[क], निचृद्ब्राह्मीपङ्क्तिः[र], ५३ । स्वराड्ब्राह्मीजगती ५४ । निचृदतिधृतिः ५५, ५६ । स्वराड्ब्राह्मीत्रिष्टुप् ५७ विराडाकृतिः ५८ ।

स्वरः—पञ्चमः १, ९, १०, १२, १८, ३०, ४७, ४८, ५८ । धैवतः २—५, ११, १५, ३१, ३४, ३८, ४१—४६, ५७ । गान्धारः ७, ८, १४, १६, १७, २०—२३, २६ । ऋषभः ६, २४, ४० । निषादः १३, १९, ४९—५१, ५४ । निषादः[क] मध्यमः[र] २५ । षड्जः २७—२९, ३२, ३३, ३६, ३७, ५२, ५५, ५६ । मध्यमः ३५, ३९ । पञ्चमः [ग], [र], निषादः ५३ ।

॥१॥ मयि गृह्णाम्म्यग्ग्रेऽअग्निꣳ रायस्प्पोषाय सुप्प्रजास्त्वाय सुवीर्य्याय ।
माम् देवताः सचन्ताम् ॥१॥
अपाम्पृष्ठमसि योनिरग्ग्नेः समुद्रमभितः पिन्वमानम् ।
वर्द्धमानो मुहाँ२॥ऽआ च पुष्करे दिवो मात्रया वरिम्णा प्प्रथस्व ॥२॥
ब्रह्म जज्ञानम्प्रथमम्पुरस्ताद्वि सीमतः सुरुचो वेनऽआवः ।
स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥४॥
द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमञ्च योनिमनु यश्च पूर्व्वः ।
समानँय्योनिमनु सञ्चरन्तन्द्रप्सञ्जुहोम्म्यनु सप्त होत्राः ॥५॥
नमोस्तु सर्प्पेब्भ्यो ये के च पृथिवीमनु ।
येऽअन्तरिक्षे ये दिवि तेब्भ्यः सर्प्पेब्भ्यो नमः ॥६॥
याऽइषवो यातुधानानाँय्ये वा वनस्प्पतीँ१॥रनु ।
ये वावटेषु शेरते तेब्भ्यः सर्प्पेब्भ्यो नमः ॥७॥
ये वामी रोचने दिवो ये वा सूर्य्यस्य रश्मिषु ।
येषामप्प्सु सदस्कृतन्तेब्भ्यः सर्प्पेब्भ्यो नमः ॥८॥
कृणुष्व पाजः प्प्रसितिन्न पृथ्वीँय्याहि राजेवामवाँ२॥ऽइभेन ।
तृष्वीमनु प्प्रसितिन्द्रूणानोस्तासि विद्ध्य रक्षसस्तपिष्ठैः ॥९॥
तव भ्भ्रमासऽआशुया पतन्त्यनुस्पृश धृषता शोशुचानः ।
तपूँ᳘ष्यग्ग्ने जुह्वा पतङ्गानसन्दितो विसृज विष्ष्वगुल्काः ॥१०॥
प्रति स्प्पशो विसृज तूर्णितमो भवा पायुर्व्विशोऽअस्याऽअदब्धः ।
यो नो दूरेऽअघशँ᳘सो योऽअन्त्यग्ग्ने मा किष्टे व्यथिरादधर्षीत् ॥११॥
उदग्ग्ने तिष्ठ प्प्रत्त्यातनुष्व न्यमित्राँ२॥ऽओषतात्तिग्ग्महेते ।
यो नोऽअरातिँ᳘ समिधान चक्रे नीचा तन्धक्ष्यतसन्न शुष्क्कम् ॥१२॥
ऊर्द्ध्वो भव प्प्रतिविद्ध्याद्ध्यस्म्मदाविष्कृणुष्व दैव्यान्न्यग्ग्ने ।
अव स्त्थिरा तनुहि यातुजूनाञ्जामिमजामिम्प्रमृणीहि शत्रून् ।
अग्ग्नेष्ट्वा तेजसा सादयामि ॥१३॥
अग्ग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्व्याऽअयम् ।
अपाँ᳘ रेताँ᳘सि जिन्वति । इन्द्रस्य त्वौजसा सादयामि ॥१४॥
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्द्धानन्दधिषे स्वर्षाञ्जिह्वामग्ग्ने चकृषे हव्यवाहम् ॥१५॥

॥२॥ ध्रुवासि धरुणास्तृता विश्श्वकर्म्मणा ।
मा त्वा समुद्रऽउद्वधीन्मा सुपर्णोऽव्यथमाना पृथिवीन्दृँ᳘ह ॥१६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रजापतिष्ट्वा सादयत्त्वपाम्पृष्ठे समुद्रस्येमन् ।
व्यचस्वतीम्प्रथस्वतीम्प्रथस्व पृथिव्यसि ॥१७॥
भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ।
पृथिवीँय्यच्छ पृथिवीन्दृᳬह पृथिवीम्मा हिᳬसीः ॥१८॥
विश्वस्मै प्प्राणायापानाय व्यानायोदानाय प्प्रतिष्ठायै चरित्राय ।
अग्निष्ट्वाभिपातु मह्या स्वस्त्या च्छर्दिषा शन्तमेन तया
देवतयाङ्गिरस्वद्ध्रुवा सीद ॥१९॥
काण्डात्त्काण्डात्प्ररोहन्ती परुषःपरुषस्प्परि ।
एवा नो दूर्वे प्प्रतनु सहस्रेण शतेन च ॥२०॥
या शतेन प्प्रतनोषि सहस्रेण विरोहसि ।
तस्यास्ते देवीष्टके विधेम हविषा वयम् ॥२१॥
यास्तेऽअग्ने सूर्य्ये रुचो दिवमातन्वन्ति रश्मिभिः ।
ताभिर्न्नोऽअद्य सर्वाभी रुचे जनाय नस्कृधि ॥२२॥
या वो देवाः सूर्य्ये रुचो गोष्वश्वेषु या रुचः ।
इन्द्राग्नी ताभिः सर्वाभी रुचन्नो धत्त बृहस्पते ॥२३॥
विराड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् । प्रजापतिष्ट्वा सादयतु पृष्ठे पृथिव्या
ज्योतिष्मतीम् । विश्वस्मै प्प्राणायापानाय व्यानाय विश्वञ्ज्योतिर्य्यच्छ ।
अग्निष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥२४॥
क मधुश्च माधवश्च वासन्तिकावृतूऽअग्नेरन्तःश्लेषोऽसि कल्प्पेतान्द्यावापृथिवी
कल्प्पन्तामापऽओषधयः कल्प्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । र येऽ
अग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे । वासन्तिकावृतूऽअभिकल्प्पमानाऽइन्द्रमिव
देवाऽअभिसँविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥२५॥
अषाढासि सहमाना सहस्वारातीः सहस्व पृतनायतः ।
सहस्रवीर्य्यासि सा मा जिन्व ॥२६॥

॥३॥ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माद्ध्वीर्न्नः सन्त्वोषधीः ॥२७॥
मधु नक्तमुतोषसो मधुमत्पार्थिवᳬ रजः । मधु द्यौरस्तु नः पिता ॥२८॥
मधुमान्नो वनस्पतिर्म्मधुमाँ२॥ऽअस्तु सूर्य्यः । माद्ध्वीर्ग्गावो भवन्तु नः ॥२९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपाङ्गम्भन्त्सीद मा त्वा सूर्य्योऽभितांप्प्सीन्माग्निर्वैश्वानरः ।
अच्छिन्नपत्राः प्रजाऽअनुवीक्षस्वानु त्वा दिव्या वृष्टिः सचताम् ॥३०॥
त्रीन्त्समुद्रान्त्समसृपत्स्वर्ग्गानपाम्पतिर्वृषभऽइष्टकानाम् ।
पुरीषँवसानः सुकृतस्य लोके तत्र गच्छ यत्र पूर्वे परेताः ॥३१॥
मही द्यौः पृथिवी च नऽइमँय्यज्ञम्मिमिक्षताम् । पिपृतान्नो भरीमभिः ॥३२॥
विष्णोः कर्म्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥३३॥
ध्रुवासि धरुणेतो जज्ञे प्रथममेभ्यो योनिभ्योऽअधि जातवेदाः ।
स गायत्र्या त्रिष्टुभानुष्टुभा च देवेभ्यो हव्यँवहतु प्रजानन् ॥३४॥
इषे राये रमस्व सहसे द्युम्नऽऊर्जेऽअपत्याय ।
सम्म्राडसि स्वराडसि सारस्वतौ त्वोत्सौ प्रावताम् ॥३५॥
अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः । अरँवहन्ति मन्यवे ॥३६॥
युक्ष्वा हि देवहूतमाँ२ ॥ऽअश्वाँ२ ॥ऽअग्ने रथीरिव । नि होता पूर्व्यः सदः ॥३७॥
॥४॥ सम्यक्स्रवन्ति सरितो न धेनाऽअन्तर्हृदा मनसा पूयमानाः ।
घृतस्य धाराऽअभिचाकशीमि हिरण्ययो वेतसो मध्येऽअग्नेः ॥३८॥
ऋचे त्वा रुचे त्वा भासे त्वा ज्योतिषे त्वा ।
अभूदिदँविश्वस्य भुवनस्य वाजिनमग्नेर्वैश्वानरस्य च ॥३९॥
अग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा वर्चस्वान् ।
सहस्रदाऽअसि सहस्राय त्वा ॥४०॥
आदित्यङ्गर्भम्पयसा समङ्ग्धि सहस्रस्य प्रतिमाँविश्वरूपम् ।
परिवृङ्ग्धि हरसा माभिमँस्थाः शतायुषङ्कृणुहि चीयमानः ॥४१॥
वातस्य जूतिँवरुणस्य नाभिमश्वञ्जज्ञानँ सरिरस्य मध्ये ।
शिशुन्नदीनाँ हरिमद्रिबुध्नमग्ने मा हिँसीः परमे व्योमन् ॥४२॥
अजस्रमिन्दुमरुषम्भुरण्युमग्निमीडे पूर्वचित्तिन्नमोभिः ।
स पर्वभिर्ऋतुशः कल्पमानो गाम्मा हिँसीरदितिँविराजम् ॥४३॥
वरूत्रीन्त्वष्टुर्वरुणस्य नाभिमविञ्जज्ञानाँ रजसः परस्मात् ।
महीँ साहस्रीमसुरस्य मायामग्ने मा हिँसीः परमे व्योमन् ॥४४॥
योऽअग्निरग्नेरध्यजायत शोकात्पृथिव्याऽउत वा दिवस्परि ।
येन प्रजा विश्वकर्म्मा जजान तमग्ने हेडः परि ते वृणक्तु ॥४५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अ॰१३, अनु॰४-७, मन्त्राः ४६-५४

चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य वरुणस्याग्नेः ।
आप्प्रा द्यावापृथिवीऽअन्तरिक्क्षꣳ सूर्य्यऽआत्म्मा जगतस्त्तस्थुषश्च ॥४६॥
॥५॥ इमम्मा हिꣳसीर्द्विपादम्पशुꣳ सहस्राक्षो मेधाय चीयमानः ।
मयुम्पशुम्मेधमग्ने जुषस्व तेन चिन्वानस्तन्वो निषीद ।
मयुन्ते शुगृच्छतु यन्द्विष्म्मस्त्तन्ते शुगृच्छतु ॥४७॥
इमम्मा हिꣳसीरेकशफम्पशुङ्कनिक्रदँवाजिनँवाजिनेषु ।
गौरमारण्ण्यमनु ते दिशामि तेन चिन्वानस्तन्वो निषीद ।
गौरन्ते शुगृच्छतु यन्द्विष्म्मस्त्तन्ते शुगृच्छतु ॥४८॥
इमꣳ साहस्रꣳ शतधारमुत्सँव्व्यच्यमानꣳ सरिरस्य मद्ध्ये । घृतन्दुहानामदितिञ्ज-
नायाग्ने मा हिꣳसीः परमे व्व्योमन् । गवयमारण्ण्यमनु ते दिशामि तेन चिन्वा-
नस्तन्वो निषीद । गवयन्ते शुगृच्छतु यन्द्विष्म्मस्त्तन्ते शुगृच्छतु ॥४९॥
इममूर्ण्णायुँवरुणस्य नाभिन्त्वचम्पशूनान्द्विपदाञ्चतुष्प्पदाम् । त्वष्टुः प्प्रजानाम्प्रथम-
ञ्जनित्रमग्ने मा हिꣳसीः परमे व्व्योमन् । उष्ट्रमारण्ण्यमनु ते दिशामि तेन
चिन्वानस्तन्वो निषीद । उष्ट्रन्ते शुगृच्छतु यन्द्विष्म्मस्त्तन्ते शुगृच्छतु ॥५०॥
अजो ह्यग्नेरजनिष्ट शोकात्सोऽअपश्यज्जनितारमग्ग्रे । तेन देवा देवतामग्ग्रमायँ-
स्तेन रोहमायन्नुप मेद्ध्यासः । शरभमारण्ण्यमनु ते दिशामि तेन चिन्वानस्तन्वो
निषीद । शरभन्ते शुगृच्छतु यन्द्विष्म्मस्त्तन्ते शुगृच्छतु ॥५१॥
त्वँय्यविष्ठ दाशुषो नॄँः पाहि श्रृणुधी गिरः । रक्षा तोकमुत त्त्मना ॥५२॥
॥६॥ उ अपान्त्वेमन्त्सादयाम्म्युपान्त्वोद्मन्त्सादयाम्म्युपान्त्वा भस्म्मन्त्सादयाम्म्युपान्त्वा ज्ज्यो-
तिषि सादयाम्म्युपान्त्वायने सादयाम्म्यर्ण्णवे त्त्वा सदने सादयामि समुद्रे त्त्वा
सदने सादयामि सरिरे त्त्वा सदने सादयाम्म्युपान्त्वा क्षये सादयाम्म्युपान्त्वा सधिषि
सादयाम्म्युपान्त्वा सदने सादयाम्म्युपान्त्वा सधस्थे सादयाम्म्युपान्त्वा योनौ
सादयाम्म्युपान्त्वा पुरीषे सादयाम्म्युपान्त्वा पाथसि सादयामि गायत्रेण त्त्वा च्छन्दसा
सादयामि त्रैष्टुभेन त्त्वा च्छन्दसा सादयामि जागतेन त्त्वा च्छन्दसा सादयाम्म्या-
नुष्टुभेन त्त्वा च्छन्दसा सादयामि पाङ्क्तेन त्त्वा च्छन्दसा सादयामि ॥५३॥
॥७॥ अयम्पुरो भुवस्तस्य प्प्राणो भौवायनो वसन्तः प्प्राणायनो गायत्री वासन्ती गायत्र्यै
गायत्रङ्गायत्रादुपाꣳशुरुपाꣳशोस्त्रिवृत्त्रिवृतो रथन्तरँवसिष्ठऽऋषिः प्प्रजापति-
गृहीतया त्त्वया प्प्राणङ्गृह्णामि प्प्रजाब्भ्यः ॥५४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अयन्दक्षिणा विश्वकर्म्मा तस्य मनो वैश्वकर्म्मणङ्ग्रीष्म्मो मानसस्त्रिष्टुब्ग्रैष्म्मी त्रिष्टुभः स्वारꣳ स्वारादन्तर्य्यामोन्तर्य्यामात्पञ्चदशः पञ्चदशाद्बृहद्भरद्वाजऽऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाब्भ्यः ॥५५॥

अयम्पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसँवर्षाश्चाक्षुष्य्यो जगती वार्षी जगत्त्याऽऋक्समम्मृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशाद्वैरूपञ्जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाब्भ्यः ॥५६॥

इदमुत्तरात्स्वस्तस्य श्श्रोत्रꣳ सौवꣳ शरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभऽऐडमैडान्मन्थी मन्थिनऽएकविꣳशऽएकविꣳशाद्वैराजँविश्वामित्रऽऋषिः प्रजापतिगृहीतया त्वया श्श्रोत्रङ्गृह्णामि प्रजाब्भ्यः ॥५७॥

इयमुपरि मतिस्तस्यै वाङ्मात्त्या हैमन्तो वाच्यः पङ्क्तिर्हैमन्ती पङ्क्त्यै निधनवन्निधनवतऽआग्रयणऽआग्रयणात्त्रिणवत्रयस्त्रिꣳशौ त्रिणवत्रयस्त्रिꣳशाब्भ्याꣳ शाक्वररैवते विश्वकर्म्मऽऋषिः प्रजापतिगृहीतया त्वया वाचङ्गृह्णामि प्रजाब्भ्यः ॥५८॥

इति त्रयोदशोऽध्यायः

अथ चतुर्दशोऽध्यायः

ऋषिः—उशनाः १—६ । विश्वेदेवाः ७, ९, ११, १४, १६, १७ । विश्वदेवः ८, १०, १३, १५, १८—३१ । विश्वकर्मा १२ ॥

देवता—अश्विनौ १—५ । ग्रीष्मर्तुः ६ । वस्वादयो मन्त्रोक्ताः ७ । दम्पती ८ । प्रजापत्यादयः ९ । विद्वांसः १० । इन्द्राग्नी ११ । वायुः १२, १४ । दिशः १३ । ऋतवः १५—१७, २७ । छन्दांसि १८ । पृथिव्यादयः १९ । अग्न्यादयः २० । विदुषी २१, २२ । यज्ञः २३ । मेधाविनः २४ । वस्वादयो लिङ्गोक्ताः २५ । ऋभवः २६ । ईश्वरः २८, २९ । जगदीश्वरः ३० । प्रजापतिः ३१ ॥

छन्दः—त्रिष्टुप् १ । निचृद् ब्राह्मीबृहती २ । विराड्ब्राह्मीबृहती ३ । भुरिग्ब्राह्मीबृहती ४ । भुरिक्शक्वरी ५ । निचृदुत्कृतिः ६ । भुरिक्प्रकृतिः[उ], स्वराट्पङ्क्ति[क], निचृदाकृतिः[र] ७ । भुरिग्जगती ८ । निचृद्ब्राह्मीपङ्क्तिः[क], शक्वरी[र] ९ । निचृदष्टिः १० । भुरिगनुष्टुप् ११ । भुरिक्विकृतिः १२ । विराट्पङ्क्तिः १३ । स्वराड्ब्राह्मीबृहती १४ । स्वराडुत्कृतिः १५ । उत्कृतिः १६ । स्वराड्ब्राह्म्यनुष्टुप् १७ । भुरिगतिजगती १८ । आर्षीजगती १९ । भुरिग्ब्राह्मीत्रिष्टुप् २० । निचृदनुष्टुप् २१ । निचृदुष्णिक् २२ । भुरिग्ब्राह्मीपङ्क्तिः[क], भुरिगतिजगती[र] २३ । भुरिग्विकृतिः २४ । निचृदभिकृतिः २५ । निचृदतिजगती २६ । भुरिगतिजगती, भुरिग्ब्राह्मीबृहती[र], २७ । निचृद्विकृतिः २८ । आर्षीत्रिष्टुप्[क], ब्राह्मीजगती[र] २९ । स्वराड्ब्राह्मीजगती[क], ब्राह्मीपङ्क्तिः[र] ३० । निचृदतिधृतिः ३१ ॥

स्वरः—धैवतः १, ५, २० । मध्यमः २—४, १०, १२, १४, २४, २८ । षड्जः ६, १५, १६, ३१ । धैवतः[उ], पञ्चमः[क], [र] ७ । निषादः ८, १८, १९, २६ । पञ्चमः[क] धैवतः[र] ९ । गान्धारः ११, १७, २१ । पञ्चमः १३ । ऋषभः २२, २५ । पञ्चमः[क], निषादः[र] २३ । निषादः[क], मध्यमः[र] २७ । धैवतः[क], निषादः[र], २९ । निषादः[क] पञ्चमः[र], ३० ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥१॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवँय्योनिमासीद साधुया ।
उख्यस्य केतुम्प्रथमञ्जुषाणाश्विनाध्वर्य्यू सादयतामिह त्वा ॥१॥
कुलायिनी घृतवती पुरन्धिः स्योने सीद सदने पृथिव्याः । अभि त्वा रुद्रा वसवो
गृणन्त्विमा ब्रह्म पीपिहि सौभगायाश्विनाध्वर्य्यू सादयतामिह त्वा ॥२॥
स्वैर्दक्षैर्दक्षपितेह सीद देवानाᳫं सुम्ने बृहते रणाय । पितेवैधि सूनवऽआ सुशेवा
स्वावेशा तन्वा सँविशस्वाश्विनाध्वर्य्यू सादयतामिह त्वा ॥३॥
पृथिव्याः पुरीषमस्यप्सो नाम तान्त्वा विश्वेऽअभिगृणन्तु देवाः । स्तोमपृष्ठा
घृतवतीह सीद प्रजावदस्म्मे द्रविणायजस्वाश्विनाध्वर्य्यू सादयतामिह त्वा ॥४॥
अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीँविष्टम्भनीन्दिशामधिपत्नीम्भुवना-
नाम् । ऊर्म्मिर्द्रप्सोऽअपामसि विश्वकर्म्मा तऽऋषिरश्विनाध्वर्य्यू सादयतामिह त्वा ।५।
शुक्रश्च शुचिश्च ग्रैष्म्मावृतूऽअग्नेरन्तःश्लेषोसि कल्पेतान्द्यावापृथिवी कल्पन्ता-
मापऽओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । येऽअग्नयः
समनसोन्तरा द्यावापृथिवीऽइमे । ग्रैष्म्मावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभि-
सँविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥६॥
॥२॥ [उ]सजूरृतुभिः सजूर्विधाभिः सजूर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्वि-
नाध्वर्य्यू सादयतामिह त्वा सजूरृतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूर्देवैर्व-
योनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्य्यू सादयतामिह त्वा [क]सजूरृतुभिः सजूर्वि-
धाभिः सजू रुद्रैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्य्यू सादयतामिह
त्वा सजूरृतुभिः सजूर्विधाभिः सजूरादित्यैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वा-
नरायाश्विनाध्वर्य्यू सादयतामिह [र]त्वा सजूरृतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः
सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानरायाश्विनाध्वर्य्यू सादयतामिह त्वा ॥७॥
प्राणम्मे पाह्यपानम्मे पाहि व्यानम्मे पाहि चक्षुर्म्मऽउर्व्या विभाहि श्रोत्रम्मे श्लो-
कय । अपः पिन्वौषधीर्जिन्व द्विपादव चतुष्पात्पाहि दिवो वृष्टिमेरय ॥८॥
॥३॥ [क]मूर्द्धा वयः प्रजापतिश्छन्दः क्षत्रँवयो मयन्दञ्छन्दो विष्टम्भो वयोधिपतिश्छन्दो
विश्वकर्म्मा वयः परमेष्ठी छन्दो बस्तो वयो विबलञ्छन्दो वृष्णिर्वयो विशालञ्छ-
न्दः [र]पुरुषो वयस्तन्द्रञ्छन्दो व्याघ्रो वयोनाधृष्टञ्छन्दः सिᳫंहो वयश्छदिश्छन्दः
पष्ठवाड्वयो बृहती छन्दऽउक्षा वयः ककुप्छन्दऽऋषभो वयः सतोबृहती छन्दः
॥९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनुड्वान्वयः पुङ्क्तिश्छन्दो धेनुर्वयो जगती च्छन्दस्त्र्यविर्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो विराट्छन्दः पञ्चाविर्वयो गायत्री च्छन्दस्त्रिवत्सो वयऽउष्णिक्छन्दस्तुर्य्यवाड्वयोऽनुष्टुप्छन्दः ॥१०॥

॥४॥ इन्द्राग्नीऽअव्यथमानामिष्टकान्दृंहतँयुवम् ।
पृष्ठेन द्यावापृथिवीऽअन्तरिक्षञ्च विबाधसे ॥११॥

विश्वकर्म्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे व्यचस्वतीम्प्रथस्वतीमन्तरिक्षँयच्छान्तरिक्षन्दृंहान्तरिक्षम्मा हिंसीः । विश्वस्मै प्प्राणायापानाय व्यानायोदानाय प्प्रतिष्ठायै चरित्राय । वायुष्ट्वाभिपातु मह्या स्वस्त्या च्छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥१२॥

राज्ञ्यसि प्प्राची दिग्विराडसि दक्षिणा दिक्सम्म्राडसि प्प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिक् ॥१३॥

विश्वकर्म्मा त्वा सादयत्वन्तरिक्षस्य पृष्ठे ज्योतिष्मतीम् । विश्वस्मै प्प्राणायापानाय व्यानाय विश्वञ्ज्योतिर्य्यच्छ । वायुष्टेऽधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥१४॥

नभश्च नभस्यश्च वार्षिकावृतूऽअग्नेरन्तःश्लेषोऽसि कल्पेतान्द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । येऽअग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे । वार्षिकावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसँविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥१५॥

इषश्चोर्जश्च शारदावृतूऽअग्नेरन्तःश्लेषोऽसि कल्पेतान्द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । येऽअग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे । शारदावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसँविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥१६॥

॥५॥ आयुर्म्मे पाहि प्प्राणम्मे पाह्यपानम्मे पाहि व्यानम्मे पाहि चक्षुर्म्मे पाहि श्श्रोत्रम्मे पाहि वाचम्मे पिन्व मनो मे जिन्वात्मानम्मे पाहि ज्योतिर्म्मे यच्छ ॥१७॥

मा च्छन्दः प्प्रमा च्छन्दः प्प्रतिमा च्छन्दोऽअस्रीवयश्छन्दः पुङ्क्तिश्छन्दऽउष्णिक्छन्दो बृहती च्छन्दोऽनुष्टुप्छन्दो विराट्छन्दो गायत्री च्छन्दस्त्रिष्टुप्छन्दो जगती च्छन्दः ॥१८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अ·१४, अनु·५-७, मन्त्राः १९-२७

पृथिवी च्छन्दोन्तरिक्षञ्छन्दो द्यौश्च्छन्दः समाश्च्छन्दो नक्षत्राणि च्छन्दो वाक्छन्दो मनश्च्छन्दः कृषिश्च्छन्दो हिरण्ण्यञ्छन्दो गौश्च्छन्दोजा च्छन्दोश्वश्च्छन्दः ॥१९॥

अग्निर्देवता वातो देवता सूर्य्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादित्त्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥२०॥

मूर्द्धासि राड्ध्रुवासि धरुणा धर्त्र्यसि धरणी ।
आयुषे त्वा वर्चसे त्वा कृष्ष्यै त्वा क्षेमाय त्वा ॥२१॥

यन्त्री राड्यन्त्र्यसि यमनी ध्रुवासि धरित्री ।
इषे त्वोर्ज्जे त्वा रय्यै त्वा पोषाय त्वा ॥२२॥

॥६॥ आशुस्त्रिवृद्भान्तः पञ्चदशो व्योमा सप्तदशो धरुणऽएकविꣳशः प्रतूर्त्तिरष्टादशस्तपो नवदशोभीवर्त्तः सविꣳशो वर्चो द्वाविꣳशः सम्भरणस्त्रयोविꣳशो योनिश्चतुर्विꣳशो गर्ब्भाः पञ्चविꣳशऽओजस्त्रिणवः क्रतुरेकत्रिꣳशः प्प्रतिष्ठा त्रयस्त्रिꣳशो ब्रध्नस्य विष्टपञ्चतुस्त्रिꣳशो नाकः षट्त्रिꣳशो विवर्त्तोष्टाचत्त्वारिꣳशो धर्त्रञ्चतुष्टोमः ॥२३॥

॥७॥ अग्नेर्ब्भागोसि दीक्षायाऽआधिपत्त्यम्ब्रह्म स्पृतन्त्रिवृत्स्तोमऽइन्द्रस्य भागोसि विष्णोराधिपत्त्यङ्क्षत्रꣳ स्पृतम्पञ्चदश स्तोमो नृचक्षसाम्भागोसि धातुराधिपत्त्यञ्जनित्रꣳ स्पृतꣳ सप्तदश स्तोमो मित्रस्य भागोसि वरुणस्याधिपत्त्यन्दिवो वृष्टिर्व्वात स्पृतऽएकविꣳश स्तोमः ॥२४॥

वसूनाम्भागोसि रुद्राणामाधिपत्त्यञ्चतुष्पात्स्पृतञ्चतुर्विꣳश स्तोमऽआदित्त्यानाम्भागोसि मरुतामाधिपत्त्यङ्गर्ब्भा स्पृताः पञ्चविꣳश स्तोमोदित्त्यै भागोसि पूष्णऽआधिपत्त्यमोज स्पृतन्त्रिणव स्तोमो देवस्य सवितुर्ब्भागोसि बृहस्पतेराधिपत्त्यꣳ समीचीर्दिश स्पृताश्चतुष्टोम स्तोमः ॥२५॥

यवानाम्भागोस्ययवानामाधिपत्त्यम्प्रजा स्पृताश्चतुश्चत्त्वारिꣳश स्तोमऽऋभूणाम्भागोसि विश्वेषान्देवानामाधिपत्त्यम्भूतꣳ स्पृतन्त्रयस्त्रिꣳश स्तोमः ॥२६॥

सहश्च सहस्यश्च हैमन्तिकावृतूऽअग्नेरन्तःश्लेषोसि कल्पेतान्द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । येऽअग्नयः समनसोन्तरा द्यावापृथिवीऽइमे । हैमन्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसँविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥२७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥८॥ एकयास्तुवत प्प्रजाऽअधीयन्त प्प्रजापतिरधिपतिरासीत्तिसृभिरस्तुवत ब्रह्मासृज्यत
ब्रह्मणस्प्पतिरधिपतिरासीत्पञ्चभिरस्तुवत भूतान्यसृज्यन्त भूतानाम्पतिरधिपति-
रासीत्सप्तभिरस्तुवत सप्तऽऋषयोसृज्यन्त धाताधिपतिरासीत् ॥२८॥

[क]नवभिरस्तुवत पितरोसृज्यन्तादितिरधिपत्न्यासीदेकादशभिरस्तुवतऽऋतवोसृज्य-
न्तार्त्तवाऽअधिपतयऽआसँस्त्रयोदशभिरस्तुवत मासाऽअसृज्यन्त सँवत्सरोधिपतिरा-
सीत्पञ्चदशभिरस्तुवत क्षत्रमसृज्यतेन्द्रोधिपतिरासीत्सप्तदशभिरस्तुवत ग्ग्राम्याः
पशवोसृज्यन्त बृहस्पतिरधिपतिरासीत् ॥२९॥

[क]नवदशभिरस्तुवत शूद्रार्य्यावसृज्येतामहोरात्रेऽअधिपत्नीऽआस्तामेकविꣳशत्यास्तु-
वतैकशफाः पशवोसृज्यन्त वरुणोधिपतिरासीत्त्रयोविꣳशत्यास्तुवत क्षुद्राः पशवो-
सृज्यन्त पूषाधिपतिरासीत्पञ्चविꣳशत्यास्तुवतारण्याः पशवोसृज्यन्त वायुरधिप-
तिरासीत्सप्तविꣳशत्यास्तुवत द्यावापृथिवी व्यैतांवसवो रुद्राऽआदित्याऽअनुव्या-
यँस्तऽएवाधिपतयऽआसन् ॥३०॥

नवविꣳशत्यास्तुवत वनस्पतयोसृज्यन्त सोमोधिपतिरासीदेकत्रिꣳशतास्तुवत
प्प्रजाऽअसृज्यन्त यवाश्चायवाश्चाधिपतयऽआसँस्त्रयस्त्रिꣳशतास्तुवत भूतान्यशा-
म्म्यन्प्रजापतिः परमेष्ठ्यधिपतिरासीत् ॥३१॥

॥ इति चतुर्दशोऽध्यायः ॥

अथ पञ्चदशोऽध्यायः

ऋषिः—परमेष्ठी १—५९ । प्रियमेधा ६० । मधुच्छन्दाः ६१, ६५ । वसिष्ठः ६२—६४ ।।

देवता—अग्निः १, २, २०—५६, ६२ । दम्पती ३ । विद्वांसः ४—७ । प्रजापतिः ८, ९ । वसवः १० । रुद्राः ११ । आदित्याः १२ । मरुतः १३ । विश्वेदेवाः १४ । वसन्तऋतुः १५ । ग्रीष्मर्तुः १६ । वर्षर्तुः १७ । शरदृतुः ५८ । हेमन्तर्तुः १९ । शिशिरर्त्तुः ५७ । विदुषी ५८, ६३ । इन्द्राग्नी ५९ । आपः ६० । इन्द्रः ६१ । परमात्मा ६४ । विद्वान् ६५ ।।

छन्दः—त्रिष्टुप् १ । भुरिक्त्रिष्टुप् २ । ब्राह्मीत्रिष्टुप् ३, ७ । भुरिगाकृतिः ४ । निचृदभिकृतिः ५ । विराडभिकृतिः ६ । भुरिगार्ष्यनुष्टुप् ८ । विराड्ब्राह्मीजगती ९ । विराड्ब्राह्मीत्रिष्टुप्[क], ब्राह्मीबृहती[र] १० । स्वराड्ब्राह्मीत्रिष्टुप्[क], ब्राह्मीबृहती[र], ११ । भुरिग्ब्राह्मीजगती[क], ब्राह्मीबृहती[र] १२ । भुरिगत्यष्टिः[क], ब्राह्मीबृहती[र], ब्राह्मीजगती[क], ब्राह्मीत्रिष्टुप्[र] १४ । विकृतिः १५ । निचृत्प्रकृतिः १६ । कृतिः १७ । भुरिगतिधृतिः १८ । निचृत्कृतिः १९ । निचृद्गायत्री २०—२२ । निचृदार्षीत्रिष्टुप् २३, ५२ । निचृत्त्रिष्टुप् २४, २५ । भुरिगार्षी-त्रिष्टुप् २६, ५० । निचृदार्षीजगती २७ । विराडार्षीजगती २८ । विराडनुष्टुप् २९—३१, ५९, ६०, ६५ । विराड्बृहती ३२ । निचृद्बृहती ३३ । आर्ष्यनुष्टुप् ३४ । उष्णिक् ३५, ३८ । निचृदुष्णिक् ३६, ३७, ३९, ४० । निचृत्पङ्क्तिः ४१, ४३ । आर्षीपंक्तिः ४२ । आर्षीगायत्री ४४ । भुरिगार्षीगायत्री ४५, ४६ । विराड्-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्राह्मीत्रिष्टुप् ४७ । स्वराड्ब्राह्मीबृहती ४८ । आर्षीत्रिष्टुप् ४९,५४ । स्वराडार्षीत्रिष्टुप् ५१। भुरिगार्षीपङ्क्तिः ५३ । निचृदनुष्टुप् ५५, ५६, ६१ । स्वराडुत्कृतिः ५७ । ब्राह्मीबृहती ५८ । विराट्त्रिष्टुप् ६२, ६३ । आकृतिः ६४ ।।

स्वरः— धैवतः १—३, ७, १६, २३—२६, ४७, ४९—५२, ५४, ६२, ६३ । पञ्चमः ४, ४१—४३, ५३, ६४ । ऋषभः ५, ६, ३५—४० । गान्धारः ८, २९—३१, ३४, ५५, ५६, ५९—६१, ६५ । निषादः ९, १७, १९, २७, २८ । धैवतः^क, मध्यमः^र १०, ११ । निषादः^क, मध्यमः^र १२ । गान्धारः^क मध्यमः^र १३। निषादः^क, धैवत^र १४ । मध्यमः १५, ३२, ३३, ४८, ५८ । षड्जः १८, २० २२, ४४—४६ ५७ ।।

॥१॥ अग्ने जातान्प्रणुदा नः सुपत्नान्प्रत्यजातान्नुद जातवेदः ।
अधि नो ब्रूहि सुमनाऽअहेडँस्तव स्याम शर्म्मँस्त्रिवरूथऽउद्भौ ॥१॥
सहसा जातान्प्रणुदा नः सुपत्नान्प्रत्यजाताञ्जातवेदो नुदस्व ।
अधि नो ब्रूहि सुमनस्यमानो वयᳬं स्याम प्रणुदा नः सुपत्नान् ॥२॥
षोडशी स्तोमऽओजो द्रविणञ्चतुश्चत्वारिᳬंश स्तोमो वर्चो द्रविणम् । अग्नेः पुरीषमस्यप्सो नाम तान्त्वा विश्वेऽअभिगृणन्तु देवाः । स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्व ॥३॥
एवश्छन्दो वरिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्दऽआच्छच्छन्दो मनश्छन्दो व्यचश्छन्दः सिन्धुश्छन्दः समुद्रश्छन्दः सरिरञ्छन्दः ककुप्छन्दस्त्रिककुप्छन्दः काव्यञ्छन्दोऽअङ्कुपञ्छन्दोक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छन्दो विष्टारपङ्क्तिश्छन्दः क्षुरो भ्रजश्छन्दः ॥४॥
आच्छच्छन्दः प्रच्छच्छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरञ्छन्दो निकायश्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सᳬंस्तुप्छन्दोनुष्टुप्छन्दऽएवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्द्धाश्छन्दो विशालञ्छन्दश्छदिश्छन्दो दूरोहणञ्छन्दस्तन्द्रञ्छन्दोऽअङ्काङ्कञ्छन्दः ॥५॥
॥२॥ रश्मिना सत्याय सत्यञ्जिन्व प्रेतिना धर्म्मणा धर्म्मञ्जिन्वान्वित्या दिवा दिवञ्जिन्व सन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्व प्रतिधिना पृथिव्या पृथिवीञ्जिन्व विष्टम्भेन वृष्ट्या वृष्टिञ्जिन्व प्रवयाह्नाहर्जिन्वानुया रात्र्या रात्रीञ्जिन्वोशिजा वसुभ्यो वसूञ्जिन्व प्रकेतेनादित्येभ्यऽआदित्याञ्जिन्व ॥६॥
तन्तुना रायस्पोषेण रायस्पोषञ्जिन्व सᳬंसर्पेण श्रुताय श्रुतञ्जिन्वैडेनौषधीभिरोषधीर्जिन्वोत्तमेन तनूभिस्तनूर्जिन्व वयोधसाधीतेनाधीतञ्जिन्वाभिजिता तेजसा तेजो जिन्व ॥७॥

Kirtikant Sharma Collection, Najafgarh

CC-0.1 Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतिपदसि प्प्रतिपदे त्वानुपदस्यनुपदे त्वा सम्पदसि सम्पदे त्वा तेजोसि तेजसे त्वा ॥८॥

त्रिवृदसि त्रिवृते त्वा प्प्रवृदसि प्प्रवृते त्वा विवृदसि विवृते त्वा सवृदसि सवृते त्वाक्क्रमोस्याक्क्रमाय त्वा सङ्क्रमोसि सङ्क्रमाय त्वोत्क्क्रमोस्युत्क्क्रमाय त्वोत्क्क्रान्तिरस्युत्क्क्रान्त्यै त्वाधिपतिनोर्ज्जोर्ज्जञ्जिन्न्व ॥९॥

॥३॥ क राज्ञ्यसि प्प्राची दिग्ग्वसवस्ते देवाऽअधिपतयोग्निर्हेतीनाम्प्रतिधर्त्ता त्रिवृत्त्वा स्तोमः पृथिव्याᳬं श्रयत्त्वाज्ज्यमुक्क्थमव्यथायै स्तब्भ्नातु रथन्तरᳪ साम प्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषयस्त्वा प्प्रथमजा देवेषु दिवो मात्त्रया वरिम्म्णा प्प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे सँविदाना नाकस्य पृष्ठे स्वर्ग्गे लोके यजमानञ्च सादयन्तु ॥१०॥

क विराडसि दक्क्षिणा दिग्ग्रुद्रास्ते देवाऽअधिपतयऽइन्द्रो हेतीनाम्प्रतिधर्त्ता पञ्चदशस्त्वा स्तोमः पृथिव्याᳬं श्रयतु प्प्रऽउगमुक्क्थमव्यथायै स्तब्भ्नातु बृहत्साम प्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषयस्त्वा प्प्रथमजा देवेषु दिवो मात्त्रया वरिम्म्णा प्प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे सँविदाना नाकस्य पृष्ठे स्वर्ग्गे लोके यजमानञ्च सादयन्तु ॥११॥

क सम्म्राडसि प्प्रतीची दिगादित्त्यास्ते देवाऽअधिपतयो वरुणो हेतीनाम्प्रतिधर्त्ता सप्तदशस्त्वा स्तोमः पृथिव्याᳬं श्रयतु मरुत्वतीयमुक्क्थमव्यथायै स्तब्भ्नातु वैरूपᳪ साम प्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषयस्त्वा प्प्रथमजा देवेषु दिवो मात्त्रया वरिम्म्णा प्प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे सँविदाना नाकस्य पृष्ठे स्वर्ग्गे लोके यजमानञ्च सादयन्तु ॥१२॥

क स्वराडस्युदीची दिङ्मरुतस्ते देवाऽअधिपतयः सोमो हेतीनाम्प्रतिधर्त्तैकविᳪशस्त्वा स्तोमः पृथिव्याᳬं श्रयतु निष्क्केवल्ल्यमुक्क्थमव्यथायै स्तब्भ्नातु वैराजᳪ साम प्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषयस्त्वा प्प्रथमजा देवेषु दिवो मात्त्रया वरिम्म्णा प्प्रथन्तु विधर्त्ता चायमधिपतिश्च ते त्वा सर्वे सँविदाना नाकस्य पृष्ठे स्वर्ग्गे लोके यजमानञ्च सादयन्तु ॥१३॥

क अधिपत्न्यसि बृहती दिग्ग्विश्श्वे ते देवाऽअधिपतयो बृहस्पतिर्हेतीनाम्प्रतिधर्त्ता त्रिणवत्रयस्त्रिᳪशौ त्वा स्तोमौ पृथिव्याᳬं श्रयतांवैश्श्वदेवाग्निमारुतेऽउक्क्थेऽअव्यथायै स्तब्भ्नीताᳬं शाक्क्वररैवते सामनी प्प्रतिष्ठित्त्याऽअन्तरिक्क्षऽऋषयस्त्वा प्प्रथ-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रजा देवेषु दिवो मात्रया वरिम्णा प्रथन्तु विधर्ता चायमधिपतिश्च ते त्वा
सर्वे संविदाना नाकस्य पृष्ठे स्वर्गे लोके यजमानञ्च सादयन्तु ॥१४॥

॥४॥ अयम्पुरो हरिकेशः सूर्य्यरश्मिस्तस्य रथगृत्सश्च रथौजाश्च सेनानीग्ग्रामण्यौ ।
पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ दङ्क्ष्णवः पशवो हेतिः पौरुषेयो वधः
प्रहेतिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि
तमेषाञ्जम्भे दध्मः ॥१५॥
अयन्दक्षिणा विश्वकर्म्मा तस्य रथस्वनश्च रथेचित्रश्च सेनानीग्ग्रामण्यौ । मेनका
च सहजन्या चाप्सरसौ यातुधाना हेती रक्षांसि प्रहेतिस्तेभ्यो नमोऽअस्तु
ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥१६॥
अयम्पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानीग्ग्रामण्यौ । प्रम्लो-
चन्ती चानुम्लोचन्ती चाप्सरसौ व्याघ्रा हेतिः सर्पाः प्रहेतिस्तेभ्यो नमोऽ
अस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे
दध्मः ॥१७॥
अयमुत्तरात्संय्यद्वसुस्तस्य तार्क्ष्यश्चारिष्टनेमिश्च सेनानीग्ग्रामण्यौ । विश्वाची
च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते
नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥१८॥
अयमुपर्य्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्ग्रामण्यौ । उर्वशी च पूर्वचि-
त्तिश्चाप्सरसाववस्फूर्जन्हेतिर्विद्युत्प्रहेतिस्तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो
मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥१९॥

॥५॥ अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम् । अपांरेतांसि जिन्वति ॥२०॥
अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः । मूर्द्धा कवी रयीणाम् ॥२१॥
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः ॥२२॥
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्द्धानन्दधिषे स्वर्षाञ्जिह्वामग्ने चकृषे हव्यवाहम् ॥२३॥
अबोध्यग्निः समिधा जनानाम्प्रति धेनुमिवायतीमुषासम् ।
यह्वाऽइव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ ॥२४॥
अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे ।
गविष्ठिरो नमसा स्तोममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत् ॥२५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अयमिह प्प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रंविभ्वंविशेविशे ॥२६॥
जनस्य गोपाऽअजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे ।
घृतप्प्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरतेभ्यः शुचिः ॥२७॥
त्वामग्नेऽअङ्गिरसो गुहा हितमन्ववविन्दञ्छिश्रियाणंवनेवने ।
स जायसे मथ्यमानः सहो महत्त्वामाहुः सहसस्पुत्रमङ्गिरः ॥२८॥
सखायः सँवः सम्यञ्चमिषंस्तोमञ्चाग्नये ।
वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥२९॥
सꣳसमिद्युवसे वृषन्नग्ने विश्वान्यर्य्यऽआ ।
इडस्पदे समिध्यसे स नो वसून्याभर ॥३०॥
त्वाञ्चित्रश्रवस्तम हवन्ते विक्षु जन्तवः ।
शोचिष्केशम्पुरुप्प्रियाग्ने हव्याय वोढवे ॥३१॥
एना वोऽअग्निन्नमसोर्जो नपातमाहुवे ।
प्रियञ्चेतिष्ठमरतिꣳस्वध्वरंविश्वस्य दूतममृतम् ॥३२॥
विश्वस्य दूतममृतंविश्वस्य दूतममृतम् ।
स योजतेऽअरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ॥३३॥
स दुद्रवत्स्वाहुतः स दुद्रवत्स्वाहुतः ।
सुब्रह्मा यज्ञः सुशमी वसूनान्देवꣳराधो जनानाम् ॥३४॥
अग्ने वाजस्य गोमतऽईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः ॥३५॥
सऽइधानो वसुष्कविरग्निरीडेन्यो गिरा । रेवदस्मभ्यम्पुर्वणीक दीदिहि ॥३६॥
क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्प्रति ॥३७॥
भद्रो नोऽअग्निराहुतो भद्रा रातिः सुभग भद्रोऽअध्वरः । भद्राऽउत प्रशस्तयः ॥३८॥
भद्राऽउत प्प्रशस्तयो भद्रम्मनः कृणुष्व वृत्रतूर्य्ये । येना समत्सु सासहः ॥३९॥
येना समत्सु सासहोव स्थिरा तनुहि भूरि शर्द्धताम् । वनेमा तेऽअभिष्टिभिः ॥४०॥
अग्निन्तम्मन्ये यो वसुरस्तंय्यंय्यन्ति धेनवः ।
अस्तमर्वन्तऽआशवोस्तन्नित्यासो वाजिनऽइषꣳस्तोतृभ्यऽआभर ॥४१॥
सोऽअग्निर्य्यो वसुर्गृणे सँय्यमायन्ति धेनवः ।
समर्वन्तो रघुद्रुवः सꣳसुजातासः सूरयऽइषꣳस्तोतृभ्यऽआभर ॥४२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उभे सुश्चन्द्र सुर्प्पिषो दर्वी श्रीणीषऽआसनि ।
उतो नुऽउत्त्पुपूर्य्याऽउुक्थेषु शवसस्प्पतुऽइषंᳬं स्तोतृब्भ्युऽआभ॑र ॥४३॥
अग्ने तमुद्याश्श्वन्न स्तोमैः क्रतुन्न भुद्रꣳ हृदिस्पृशम् । ऋुद्ध्यामा तुऽओहैः ॥४४॥
अधा ह्यग्ने क्रतोर्भुद्रस्यु दक्षस्य साधोः । रुथीर्ऋुतस्य॑ बृहतो बुभूर्थ ॥४५॥
एुभिर्न्नोऽअुर्क्कैर्भवा नोऽअुर्वाङ्क्स्वुर्ण्ण ज्योतिः ।
अग्ने विश्वेभिः सुमनाऽअनीकैः ॥४६॥
अुग्निꣳ होतारम्मन्न्ये दास्वन्तुँवसुꣳ सूनुꣳ सहसो जातवेदसुँविप्प्रन्न जातवेदसम् ।
यऽऊुर्द्ध्वया स्वद्ध्वुरो देवो देवाच्च्या कृपा । घृतस्यु विब्भ्राष्ट्टिमनुवष्ट्टि शोचिषा-
जुह्वानस्य सुर्प्पिषः ॥४७॥
अग्ने त्वन्नोऽअन्तमऽउुत त्राता शिवो भवा वरूथ्यः । वसुरुग्निर्व्वसुश्श्रवाऽअच्छा
नक्षि द्युमत्तमꣳ रुयिन्दाः । तन्त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे
सखिब्भ्यः ॥४८॥

॥६॥ येनुऽऋषयुस्तपसा सुत्रमायुन्निन्धानाऽअुग्निᳬं स्वराभरन्तः ।
तस्मिन्नुहन्निदधे नाकेऽअुग्निंय्यमाहुर्म्मनव स्त्तीर्ण्णबर्हिषम् ॥४९॥
तम्पत्नीभिरनुगच्छेम देवाः पुत्रैर्ब्भ्रातृभिरुत वा हिरण्ण्यैः ।
नाकंङ्गृब्भ्णानाः सुकृतस्य लोके तृतीये पृष्ठेऽअधि रोचने दिवः ॥५०॥
आ वाचो मद्ध्यमरुहद्भुरण्युरयमुग्निः सत्त्पतिश्चेकितानः ।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्प्पदङ्कृणुतांय्ये पृतन्न्यवः ॥५१॥
अयमुग्निर्व्वीरतमो वयोधाः सहस्रियो द्योततामप्प्रयुच्छन् ।
विब्भ्राजमानः सरिरस्यु मद्ध्युऽउपुप्प्रयाहि दिव्यानि धाम ॥५२॥
सम्प्रच्च्यवद्ध्वुमुप सम्प्रयाताग्ने पुथो देवयानान्कृणुद्ध्वम् ।
पुनः कृण्ण्वाना पितरा युवानाुन्वाताᳬंसीत्त्वयि तन्तुमेतम् ॥५३॥
उद्बुद्ध्यस्वाग्ने प्प्रतिजागृहि त्त्वमिष्टापूर्त्ते सꣳसृजेथामुयञ्च ।
अुस्मिन्त्सुधस्त्थेऽअद्ध्युत्तरस्मिुन्विश्वे देवा यजमानश्च सीदत ॥५४॥
येनु वहसि सुहस्रुँय्येनाग्ने सर्व्ववेदुसम् । तेनेमँय्युज्ञन्नो नय स्वर्द्देवेषु गन्तवे ॥५५॥
अयन्ते योनिर्ऋुत्वियो यतो जातोऽअरोचथाः ।
तञ्जानन्नग्नुऽआरोहाथा नो वर्द्धया रुयिम् ॥५६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥७॥ तपश्च तपस्यश्च शैशिरावृतूऽअग्नेरन्तःश्लेषोसि कल्पेतान्द्यावापृथिवी कल्पन्तामाप ऽओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः । येऽअग्नयः समनसोन्तरा द्यावापृथिवीऽइमे । शैशिरावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसँविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥५७॥

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम् । विश्वस्मै प्राणायापानाय व्यानाय विश्वञ्ज्योतिर्यच्छ । सूर्य्यस्तेधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥५८॥

लोकम्पृण च्छिद्रम्पृणाथो सीद ध्रुवा त्वम् ।
इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन् ॥५९॥

ताऽअस्य सूददोहसः सोमँ श्रीणन्ति पृश्नयः ।
जन्मन्देवानाँविशस्त्रिष्वा रोचने दिवः ॥६०॥

इन्द्रँविश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ।
रथीतमँ रथीनाँवाजानाँ सत्पतिम्पतिम् ॥६१॥

प्रोथदश्वो न यवसेविष्यन्यदा महः सँवरणाद्व्यस्थात् ।
आदस्य वातोऽअनुवाति शोचिरध स्म ते व्रजनङ्कृष्णमस्ति ॥६२॥

आयोष्ट्वा सदने सादयाम्यवतश्छायायाँ समुद्रस्य हृदये ।
रश्मीवतीम्भास्वतीमा या द्याम्भास्या पृथिवीमोर्वन्तरिक्षम् ॥६३॥

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे व्यचस्वतीम्प्रथस्वतीन्दिवँयच्छ दिवन्दृँह दिवम्मा हिँसीः । विश्वस्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय । सूर्यस्त्वाभिपातु मह्या स्वस्त्या च्छर्दिषा शन्तमेन तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥६४॥

सहस्रस्य प्रमासि सहस्रस्य प्रतिमासि सहस्रस्योन्मासि साहस्रोसि सहस्राय त्वा ॥६५॥

इति पञ्चदशोऽध्यायः

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ षोडशोऽध्यायः

ऋषिः—परमेष्ठी वा कुत्सः १—३ । परमेष्ठी ४ । बृहस्पतिः ५ । प्रजापतिः ६—१४, ३४ । कुत्सः १५—३३, ३५—३९ । परमेष्ठी प्रजापतिर्वा देवाः ४०—६६ ॥

देवता—रुद्रः १—४, ६—१७, १९, २९ । एकरुद्रः ५ । रुद्राः १८, २०—२८, ३०—५५, ५७—६६ । बहुरुद्राः ५६ ॥

छन्दः—आर्षीगायत्री १ । स्वराडार्ष्यनुष्टुप् २ । विराडार्ष्यनुष्टुप् ३, ५४, ६२ । निचृदार्ष्यनुष्टुप् ४, ८, १२, १३, ५३, ५६—५८, ६०, ६१ । भुरिगार्षीबृहती ५, ४७ । निचृदार्षीपङ्क्तिः ६ । विराडार्षीपङ्क्तिः ७ । भुरिगार्ष्युष्णिक् ९, १४, ५५ । भुरिगार्ष्यनुष्टुप् १०, ६३ । निचृदनुष्टुप् ११ । स्वराडार्ष्युष्णिक् १४ । निचृदार्षीजगती १५, १६ । निचृदतिधृतिः १७, २१ । निचृदष्टिः १८, २२ । विराडतिधृतिः १९ । अतिधृतिः २० । निचृदतिजगती २३ । शक्वरी २४ । भुरिक्शक्वरी २५ । भुरिगतिजगती २६, २९ । निचृच्छक्वरी २७ । आर्षीजगती २८, ४८ । विराडार्षीत्रिष्टुप् ३० । स्वराडार्षीपङ्क्तिः ३१, ३९ । स्वराडार्षीत्रिष्टुप् ३२, ३४—३६ । आर्षीत्रिष्टुप् ३३, ४४, ५० । निचृदार्षीत्रिष्टुप् ३७, ४२, ४५ । भुरिगार्षीपङ्क्तिः ३८ । अतिशक्वरी ४० । स्वराडार्षीबृहती ४१ । जगती ४३ । स्वराट्प्रकृतिः ४६ । आर्ष्यनुष्टुप् ४९, ५२, ५९ । निचृदार्षीयवमध्यात्रिष्टुप् ५१ । निचृद्धृतिः ६४ । धृतिः ६५, ६६ ॥

स्वरः—षड्जः १, १७, १९—२१ । गान्धारः २—४, ८, १०—१३, ४९, ५२—५४, ५६—६३ । मध्यमः ५, १८, २२, ४१, ४७ । पञ्चमः ६, ७, ३१, ३८—४० । ऋषभः ९, १४, ५५, ६४—६६ । निषादः १५, १६, २३, २६, २८, २९, ४३, ४८ । धैवतः २४, २५, २७, ३०, ३२—३७, ४२, ४४—४६, ५०, ५१ ॥

॥१॥ नमस्ते रुद्र मन्यवऽउतो तऽइषवे नमः । बाहुभ्यामुत ते नमः ॥१॥
या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥२॥
यामिषुङ्गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवाङ्गिरित्र ताङ्कुरु मा हिꣳसीः पुरुषञ्जगत् ॥३॥
शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मꣳ सुमनाऽअसत् ॥४॥
अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधराचीः परासुव ॥५॥
असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः ।
ये चैनꣳ रुद्राऽअभितो दिक्षु श्रिताः सहस्रशोवैषाꣳ हेडऽईमहे ॥६॥
असौ योवसर्प्पति नीलग्रीवो विलोहितः ।
उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्य्यः स दृष्टो मृडयाति नः ॥७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो येऽअस्य सत्त्वानोऽहन्तेभ्योऽकरन्नमः ॥८॥
प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् । याश्च ते हस्तऽइषवः परा ता भगवो वप ॥९॥
विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँ२॥ऽउत ।
अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥१०॥
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥११॥
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो यऽइषुधिस्तवारेऽअस्मन्निधेहि तम् ॥१२॥
अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य्य शल्यानाम्मुखा शिवो नः सुमना भव ॥१३॥
नमस्तऽआयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥१४॥
मा नो महान्तमुत मा नोऽअर्भकम्मा नऽउक्षन्तमुत मा नऽउक्षितम् ।
मा नो वधीः पितरम्मोत मातरम्मा नः प्रियास्तन्वो रुद्र रीरिषः ॥१५॥
मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नोऽअश्वेषु रीरिषः ।
मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥१६॥

॥२॥ नमो हिरण्यबाहवे सेनान्ये दिशाञ्च पतये नमो नमो वृक्षेभ्यो हरिकेशेभ्यः पशू-
नाम्पतये नमो नमः शष्पिञ्जराय त्विषीमते पथीनाम्पतये नमो नमो हरिकेशा-
योपवीतिने पुष्टानाम्पतये नमः ॥१७॥
नमो बभ्लुशाय व्याधिनेऽन्नानाम्पतये नमो नमो भवस्य हेत्यै जगताम्पतये नमो
नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमो नमः सूतायाहन्त्यै वनानाम्पतये नमः
॥१८॥
नमो रोहिताय स्थपतये वृक्षाणाम्पतये नमो नमो भुवन्तये वारिवस्कृतायौषधी-
नाम्पतये नमो नमो मन्त्रिणे वाणिजाय कक्षाणाम्पतये नमो नमऽउच्चैर्घोषाया-
क्रन्दयते पत्तीनाम्पतये नमः ॥१९॥
नमः कृत्स्नायतया धावते सत्त्वनाम्पतये नमो नमः सहमानाय निव्याधिनऽआव्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धिनीनाम्पतये नमो नमो निषङ्गिणे ककुभाय स्तेनानाम्पतये नमो नमो निचेरवे परिचरायारण्यानाम्पतये नमः ॥२०॥

नमो वञ्चते परिवञ्चते स्तायूनाम्पतये नमो नमो निषङ्गिणऽइषुधिमते तस्कराणाम्पतये नमो नमः सृकायिभ्यो जिघाᳬसद्भ्यो मुष्णताम्पतये नमो नमोसिमद्भ्यो नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः ॥२१॥

॥३॥ नमऽउष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमो नमऽइषुमद्भ्यो धन्वायिभ्यश्च वो नमो नमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो नमऽआयच्छद्भ्योस्यद्भ्यश्च वो नमः ॥२२॥

नमो विसृजद्भ्यो विध्यद्भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमः शयानेभ्यऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमः ॥२३॥

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमोश्वेभ्योश्वपतिभ्यश्च वो नमो नमऽआव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो नमऽउगणाभ्यस्तृᳬहतीभ्यश्च वो नमः ॥२४॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः ॥२५॥

नमः सेनाभ्यः सेनानिभ्यश्च वो नमो नमो रथिभ्योऽअरथेभ्यश्च वो नमो नमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च वो नमो नमो महद्भ्योऽअर्भकेभ्यश्च वो नमः ॥२६॥

॥४॥ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च वो नमो नमः श्वनिभ्यो मृगयुभ्यश्च वो नमः ॥२७॥

नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च ॥२८॥

नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च ॥२९॥

नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोग्र्याय च प्रथमाय च ॥३०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमऽआशवे चाजिराय च नमः शीघ्र्याय च शीभ्याय च नमऽऊर्म्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ॥३१॥

॥५॥ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ॥३२॥

नमः सोभ्याय च प्रतिसर्याय च नमो याम्म्याय च क्षेम्म्याय च नमः श्लोक्याय चावसान्याय च नमऽउर्वर्याय च खल्याय च ॥३३॥

नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नमऽआशुषेणाय चाशुरथाय च नमः शूराय चावभेदिने च ॥३४॥

नमो बिल्मिने च कवचिने च नमो वर्म्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चाहनन्याय च ॥३५॥

नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ॥३६॥

॥६॥ नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ॥३७॥

नमः कूप्याय चावट्याय च नमो वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ॥३८॥

नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ॥३९॥

नमः शङ्गवे च पशुपतये च नमऽउग्राय च भीमाय च नमोऽग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ॥४०॥

॥७॥ नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥४१॥

॥८॥ नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय च ॥४२॥

नमः सिकत्याय च प्रवाह्याय च नमः किꣳशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमऽइरिण्याय च प्रपथ्याय च ॥४३॥

नमो व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च ॥४४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमः शुष्क्याय च हरित्याय च नमः पाᳪसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नमऽऊर्व्याय च सूर्व्याय च ॥४५॥

नमः पर्णाय च पर्णशदाय च नमऽउद्गुरमाणाय चाभिघ्नते च नमऽआखिदते च प्रखिदते च नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानाᳪ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नमऽआनिर्हतेभ्यः ॥४६॥

द्रापेऽअन्धसस्पते दरिद्र नीललोहित ।
आसाम्प्रजानामेषाम्पशूनाम्मा भेर्म्मा रोङ्मो च नः किञ्चनाममत् ॥४७॥
इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वम्पुष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥४८॥
या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी ।
शिवा रुतस्य भेषजी तया नो मृड जीवसे ॥४९॥
परि नो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्म्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ॥५०॥
मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्षऽआयुधन्निधाय कृत्तिँवसानऽआचर पिनाकम्बिभ्रदागहि ॥५१॥
विकिरिद्र विलोहित नमस्तेऽअस्तु भगवः ।
यास्ते सहस्रᳪ हेतयोन्यमस्मन्निवपन्तु ताः ॥५२॥
सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥५३॥
असङ्ख्याता सहस्राणि ये रुद्राऽअधि भूम्याम् ।
तेषाᳪ सहस्रयोजनेव धन्वानि तन्मसि ॥५४॥
अस्मिन्महत्यर्णवेन्तरिक्षे भवाऽअधि ।
तेषाᳪ सहस्रयोजनेव धन्वानि तन्मसि ॥५५॥
नीलग्रीवाः शितिकण्ठा दिवᳪ रुद्राऽउपश्रिताः ।
तेषाᳪ सहस्रयोजनेव धन्वानि तन्मसि ॥५६॥
नीलग्रीवाः शितिकण्ठाः शर्वाऽअधः क्षमाचराः ।
तेषाᳪ सहस्रयोजनेव धन्वानि तन्मसि ॥५७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहिताः ।
तेषांꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥५८॥
ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषांꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥५९॥
ये पथाम्पथिरक्षयऽऐलबृदाऽआयुर्युधः ।
तेषांꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥६०॥
ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषांꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥६१॥
येऽन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषांꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥६२॥
यऽएतावन्तश्च भूयांꣳसश्च दिशो रुद्रा वितस्थिरे ।
तेषांꣳ सहस्रयोजनेऽव धन्वानि तन्मसि ॥६३॥

नमोऽस्तु रुद्रेभ्यो ये दिवि येषांवर्षमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥६४॥

नमोऽस्तु रुद्रेभ्यो येऽन्तरिक्षे येषांवातऽइषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥६५॥

नमोऽस्तु रुद्रेभ्यो ये पृथिव्यांयेषामन्नमिषवः । तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः । तेभ्यो नमोऽअस्तु ते नोऽवन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥६६॥

इति षोडशोऽध्यायः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ सप्तदशोऽध्यायः

ऋषिः—मेधातिथिः १—७, ९ । वसुयुः ८ । भारद्वाजः १०, १६ । लोपामुद्रा ११—१५ । भुवनपुत्रो विश्वकर्मा १७—३२ । अप्रतिरथः ३३—५८, ६० । विश्वावसुः ५९ । मधुच्छन्दाः सुतजेता ६१ । विधृतिः ६२—६९ । कुत्सः ७०—७३ । कण्वः ७४ । गृत्समदः ७५, ८८ । वसिष्ठः ७६, ७८ । परमेष्ठी ७७ । सप्त ऋषयः ७९—८७ । वामदेवः ८९—९९ ॥

देवता—मरुतः १, ४७, ८०—८४, ८६ । अग्निः २—१२, १५, १६, ५०, ५२, ५३, ५५, ५६, ५८, ६५—७३, ७५—७७, ७९, ८७—९० । प्राणः १३, १४ । विश्वकर्मा १७—३२, ७८ । इन्द्रः ३३—४४, ५१, ६१, ६३ । इषुः ४५ । योद्धा ४६ । इन्द्रबृहस्पत्यादयः ४८ । सोमवरुणदेवाः ४९ । दिग् ५४ । यज्ञः ५७, ६२ । आदित्याः ५९, ६० । इन्द्राग्नी ६४ । सविता ७४ । चातुर्मास्या मरुतः ८५ । यज्ञपुरुषः ९१—९९ ॥

छन्दः—भुरिगतिशक्वरी १ । निचृद्विकृतिः २ । विराडार्षीपङ्क्तिः ३, १५, ५६ । भुरिगार्षीगायत्री ४, ५ । आर्षीत्रिष्टुप् ६, २१, २५, २९, ३०, ३३, ३५—३७, ४१, ४९, ५८, ५९, ७०, ७३, ७५, ८७, ९२, ९५, ९८ । आर्षीबृहती ७ । आर्षीगायत्री ८, ७७, ८१, ८२ । निचृदार्षीगायत्री ९, १६ । निचृदार्षीजगती १०, १३, ८४ । भुरिगार्षीबृहती ११ । निचृद्गायत्री १२ । आर्षीजगती १४, ७९ । निचृदार्षीत्रिष्टुप् १७, २२, २४, २७, ३९, ४३, ४७, ६०, ६६, ७४, ८८, ८९, ९३, ९४, ९६, ९७ । भुरिगार्षीपङ्क्तिः १८, ३१, ५५, ६९, ७१ । भुरिगार्षीत्रिष्टुप् १९, २३, २६, २८, ३८ । स्वराडार्षीत्रिष्टुप् २०, ३४, ५४, ९९ । स्वराडार्षीपङ्क्तिः ३२ । विराडार्षीत्रिष्टुप् ४०, ४२, ४४, ९०, ९१ । आर्ष्यनुष्टुप् ४५, ५१, ६४ । विराडार्ष्यनुष्टुप् ४६, ५०, ५३, ६२, ६३, ६५ । पंक्तिः ४८ । निचृदार्ष्यनुष्टुप् ५२, ६१, ६८ । निचृदार्षीबृहती ५७ । पिपीलिकामध्याबृहती ६७ । निचृदार्षीपङ्क्तिः ७२ । आर्ष्युष्णिक् ७६, ८० । विराडतिजगती ७८ । भुरिगार्ष्युष्णिक् ८३ । स्वराडार्षीगायत्री ८५ । निचृच्छक्वरी ८६ ॥

स्वरः—पञ्चमः १, ३, १५, १८, ३१, ३२, ४८, ५५, ५६, ६९, ७१, ७२ । मध्यमः २, ७, ११, ५७, ६७ । षड्जः ४, ५, ८, ९, १२, १६ ७७, ८१, ८२, ८५ । धैवतः ६, १७, १९—३०, ३३—४४, ४७, ४९, ५४, ५८—६०, ६६, ७०, ७३—७५, ८६—९९ । निषादः १०, १३, १४, ७८, ७९, ८४ । गान्धारः ४५, ४६, ५०—५३, ६१—६५, ६८ । ऋषभः ७६, ८०, ८३ ॥

॥१॥ अश्म॑न्नू॒र्जम्पर्व॑ते शिश्रिया॒णाम॒द्भ्यऽओष॑धीभ्यो॒ वन॒स्पति॑भ्यो॒ऽअधि॒ सम्भृ॑त॒म्पय॑ः । तान्न॒ऽइष॒मूर्जं॑ धत्त मरुतः सꣳररा॒णाऽअश्मँ॑स्ते॒ क्षुन्मयि॑ त॒ऽऊर्ग्यन्द्वि॒ष्मस्तन्ते॒ शुगृ॑च्छतु ॥१॥

इ॒मा मे॑ऽअग्न॒ऽइष्ट॑का धे॒नव॑ः स॒न्त्वेका॑ च॒ दश॑ च॒ दश॑ च श॒तं च॑ श॒तं च॑ स॒हस्रं॑ च स॒हस्रं॑ चा॒युतं॑ चा॒युतं॑ च नि॒युतं॑ च नि॒युतं॑ च प्र॒युतं॑ चार्बु॑दं च॒ न्य॑र्बुदं च समु॒द्रश्च॒ मध्यं॑ चान्त॑श्च परा॒र्द्धश्चै॒ता मे॑ऽअग्न॒ऽइष्ट॑का धे॒नव॑ः सन्त्व॒मुत्रा॒मुष्मि॑ल्लोँ॒के ॥२॥

ऋ॒तव॑ स्थऽऋता॒वृध॑ऽऋतु॒ष्ठा स्थ॑ऽऋता॒वृध॑ः ।
घृ॒त॒श्चुतो॑ मधु॒श्चुतो॑ वि॒राजो॒ नाम॑ काम॒दुघा॒ऽअक्षी॑यमाणाः ॥३॥

स॒मु॒द्रस्य॑ त्वाव॑क॒याग्ने॒ परि॑ व्ययामसि । पा॒व॒कोऽअ॒स्मभ्य॑ꣳ शि॒वो भ॑व ॥४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावकोऽअस्मभ्यꣳ शिवो भव ॥५॥
उप ज्मन्नुप वेतसेऽवतर नदीष्वा । अग्ने पित्तमपामसि मण्डूकि ताभिरागहि सेमन्नो
यज्ञम्पावकवर्ण्णꣳ शिवङ्कृधि ॥६॥
अपामिदन्न्ययनꣳ समुद्रस्य निवेशनम् ।
अन्न्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥७॥
अग्ने पावक रोचिषा मन्द्रया देव जिह्वया । आ देवान्वक्षि यक्षि च ॥८॥
स नः पावक दीदिवोग्ने देवाँ२ऽइहावह । उप यज्ञꣳ हविश्च नः ॥९॥
पावकया यश्चितयन्त्या कृपा क्षामन्रुरुचऽउषसो न भानुना ।
तूर्वन्न यामन्नेतशस्य नू रणऽआ यो घृणे न ततृषाणोऽअजरः ॥१०॥

॥२॥ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे ।
अन्न्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥११॥
नृषदे वेडप्सुषदे वेड्बर्हिषदे वेड्वनसदे वेट्स्वर्विदे वेट् ॥१२॥
ये देवा देवानाँय्यज्ञिया यज्ञियानाꣳ सँवत्सरीणमुप भागमासते ।
अहुतादो हविषो यज्ञेऽअस्मिन्त्स्वयम्पिबन्तु मधुनो घृतस्य ॥१३॥
ये देवा देवेष्वधि देवत्वमायन्न्ये ब्रह्मणः पुरऽएतारोऽअस्य ।
येभ्यो नऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्याऽअधि स्नुषु ॥१४॥
प्राणदाऽअपानदा व्यानदा वर्चोदा वरिवोदाः ।
अन्न्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ शिवो भव ॥१५॥

॥३॥ अग्निस्तिग्मेन शोचिषा यासद्विश्वन्न्यत्रिणम् । अग्निर्नो वनते रयिम् ॥१६॥
यऽइमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत्पिता नः ।
सऽआशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ२ऽआविवेश ॥१७॥
किꣳ स्विदासीदधिष्ठानमारम्भणङ्कतमत्स्वित्कथासीत् ।
यतो भूमिञ्जनयन्विश्वकर्म्मा वि द्यामौर्णोन्महिना विश्वचक्षाः ॥१८॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ।
सम्बाहुभ्यान्धमति सम्पतत्रैर्द्यावाभूमी जनयन्देवऽएकः ॥१९॥
किꣳ स्विद्वनङ्कऽउ स वृक्षऽआस यतो द्यावापृथिवी निष्टतक्षुः ।
मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन् ॥२०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्म्मन्नुतेमा ।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयँय्यजस्व तन्वँवृधानः ॥२१॥
विश्वकर्म्मन्हविषा वावृधानः स्वयँय्यजस्व पृथिवीमुत द्याम् ।
मुह्यन्त्वन्येऽअभितः सपत्नाऽइहास्माकम्मघवा सूरिरस्तु ॥२२॥
वाचस्पतिँविश्वकर्म्माणमूतये मनोजुवँवाजेऽअद्या हुवेम ।
स नो विश्वानि हवनानि जोषद्विश्वशम्भूरवसे साधुकर्म्मा ॥२३॥
विश्वकर्म्मन्हविषा वर्द्धनेन त्रातारमिन्द्रमकृणोरवध्यम् ।
तस्मै विशः समनमन्त पूर्व्वीरयमुग्रो विहव्यो यथासत् ॥२४॥

॥४॥ चक्षुषः पिता मनसा हि धीरो घृतमेनेऽअजनन्नम्नमाने ।
यदेदन्ताऽअददृहन्त पूर्व्वऽआदिद्द्यावापृथिवीऽअप्रथेताम् ॥२५॥
विश्वकर्म्मा विमनाऽआद्विहाया धाता विधाता परमोत सन्दृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्तऽऋषीन्परऽएकमाहुः ॥२६॥
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानान्नामधाऽएकऽएव तँ सम्प्रश्नम्भुवना यन्त्यन्या ॥२७॥
तऽआयजन्त द्रविणँ समस्माऽऋषयः पूर्व्वे जरितारो न भूना ।
असूर्त्ते सूर्त्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ॥२८॥
परो दिवा परऽएना पृथिव्या परो देवेभिरसुरैर्य्यदस्ति ।
कँ स्विद्गर्भम्प्रथमन्दध्रऽआपो यत्र देवाः समपश्यन्त पूर्व्वे ॥२९॥
तमिद्गर्भम्प्रथमन्दध्रऽआपो यत्र देवाः समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्प्पितँय्यस्मिन्विश्वानि भुवनानि तस्थुः ॥३०॥
न तँविदाथ यऽइमा जजानान्यद्युष्माकमन्तरम्बभूव ।
नीहारेण प्रावृता जल्प्या चासुतृपऽउक्थशासश्चरन्ति ॥३१॥
विश्वकर्म्मा ह्यजनिष्ट देवऽआदिद्गन्धर्व्वोऽअभवद्द्वितीयः ।
तृतीयः पिता जनितौषधीनामपाङ्गर्भँव्यदधात्पुरुत्रा ॥३२॥
॥५॥ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
सङ्क्रन्दनोऽनिमिषऽएकवीरः शतँ सेनाऽअजयत्साकमिन्द्रः ॥३३॥
सङ्क्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत्सहद्ध्वँय्युधो नरऽइषुहस्तेन वृष्णा ॥३४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सऽइषुहस्तैः स निषुङ्गिभिर्वुशी सꣳस्स्रष्टा स युधुऽइन्द्रो गुणेन ।
सꣳसृष्टजित्सोमुपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ॥३५॥
बृहस्पते परिदीया रथेन रक्षोहा मित्राँ॥ऽअपबाधमानः ।
प्रभुञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ॥३६॥
बलविज्ञाय स्थविरः प्रवीरः सहस्वान्वाजी सहमानऽउग्ग्रः ।
अभिवीरोऽअभिसत्त्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित् ॥३७॥
गोत्रभिदङ्गोविदँवज्रबाहुञ्जयन्तमज्म प्रमृणन्तमोजसा ।
इमꣳ सजाताऽअनु वीरयध्वमिन्द्रꣳ सखायोऽअनु सꣳरभध्वम् ॥३८॥
अभि गोत्राणि सहसा गाहमानोदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाडयुध्योस्माकꣳ सेनाऽअवतु प्र युत्सु ॥३९॥
इन्द्रऽआसान्नेता बृहस्पतिर्दक्षिणा युज्ञः पुरऽएतु सोमः ।
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतो यन्त्वग्ग्रम् ॥४०॥
इन्द्रस्य वृष्णो वरुणस्य राज्ञऽआदित्यानाम्मरुताꣳ शर्द्धऽउग्ग्रम् ।
महामनसाम्भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुदस्थात् ॥४१॥
उद्धर्षय मघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्मनाꣳसि ।
उद्वृत्रहन्वाजिनाँवाजिनान्युद्रथानाञ्जयताँयन्तु घोषाः ॥४२॥
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकँया ऽइषवस्ता जयन्तु ।
अस्माकँवीराऽउत्तरे भवन्त्वस्माँ॥ऽउ देवाऽअवता हवेषु ॥४३॥
अमीषाञ्चित्तम्प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकैरन्धेनामित्रास्तमसा सचन्ताम् ॥४४॥
अवसृष्टा परापत शरव्ये ब्रह्मसꣳशिते ।
गच्छामित्रान्प्रपद्यस्व मामीषाङ्कञ्चनोच्छिषः ॥४५॥
प्रेता जयता नरऽइन्द्रो वः शर्म्म यच्छतु ।
उग्ग्रा वः सन्तु बाहवोनाधृष्या यथासथ ॥४६॥
असौ या सेना मरुतः परेषामभ्यैति नऽओजसा स्पर्द्धमाना ।
ताङ्गूहत तमसापव्रतेन यथामीऽअन्योऽअन्यन्न जानन् ॥४७॥
यत्र बाणाः सम्पतन्ति कुमारा विशिखाऽइव ।
तन्नऽइन्द्रो बृहस्पतिरदितिः शर्म्म यच्छतु विश्वाहा शर्म्म यच्छतु ॥४८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant 2

मर्म्माणि ते वर्म्मणा च्छादयामि सोमस्त्वा राजामृतेनानुवस्ताम् ।
उरोर्वरीयो वरुणस्ते कृणोतु जयन्तन्त्वानु देवा मदन्तु ॥४९॥

॥६॥ उदेनमुत्तरान्नयाग्ने घृतेनाहुत । रायस्पोषेण सꣳसृज प्प्रजया च बहुङ्कृधि ॥५०॥
इन्द्रेमम्प्रतरान्नय सजातानामसद्वशी ।
समेनं वर्चसा सृज देवानाम्भागदाऽअसत् ॥५१॥
यस्य कुर्म्मो गृहे हविस्तमग्ने वर्द्धया त्वम् ।
तस्मै देवाऽअधिब्ब्रुवन्नयञ्च ब्रह्मणस्पतिः ॥५२॥
उदु त्वा विश्वे देवाऽअग्ने भरन्तु चित्तिभिः ।
स नो भव शिवस्त्वꣳ सुप्रतीको विभावसुः ॥५३॥
पञ्च दिशो दैवीर्य्यज्ञमवन्तु देवीरपामतिन्दुर्म्मतिम्बाधमानाः ।
रायस्पोषे यज्ञपतिमाभजन्ती रायस्पोषेऽअधि यज्ञोऽअस्थात् ॥५४॥
समिद्धेऽअग्नावधि मामहानऽउक्थपत्त्रऽईड्यो गृभीतः ।
तप्तङ्घर्म्मम्परिगृह्यायजन्तोर्ज्जा यद्यज्ञमयजन्त देवाः ॥५५॥
दैव्याय धर्त्रे जोष्ट्रे देवश्रीः श्रीमनाः शतपयाः ।
परिगृह्य देवा यज्ञमायन्देवा देवेब्भ्योऽअध्वर्य्यन्तोऽअस्थुः ॥५६॥
वीतꣳ हविः शमितꣳ शमिता यजध्यै तुरीयो यज्ञो यत्र हव्यमेति ।
ततो वाकाऽआशिषो नो जुषन्ताम् ॥५७॥
सूर्य्यरश्मिर्हरिकेशः पुरस्तात्सविता ज्योतिरुदयाँ२॥ऽअजस्रम् ।
तस्य पूषा प्प्रसवे याति विद्वान्त्सम्पश्यन्विश्वा भुवनानि गोपाः ॥५८॥
विमानऽएष दिवो मध्यऽआस्तऽआपप्प्रिवान्रोदसीऽअन्तरिक्षम् ।
स विश्वाचीरभिचष्टे घृताचीरन्तरा पूर्वमपरञ्च केतुम् ॥५९॥
उक्षा समुद्रोऽअरुणः सुपर्ण्णः पूर्वस्य योनिम्पितुराविवेश ।
मध्ये दिवो निहितः पृश्निरश्मा विचक्रमे रजसस्पात्यन्तौ ॥६०॥
इन्द्रँ विश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ।
रथीतमꣳ रथीनाँ वाजानाꣳ सत्पतिम्पतिम् ॥६१॥
देवहूर्य्यज्ञऽआ च वक्षत्सुम्नहूर्य्यज्ञऽआ च वक्षत् ।
यक्षदग्निर्देवो देवाँ२॥ऽआ च वक्षत् ॥६२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाजस्य मा प्प्रसवऽउद्ग्ग्राभेणोदग्ग्रभीत् ।
अधा सुपत्क्नानिन्द्रो मे निग्ग्राभेणाधराँ२॥ऽअकः ॥६३॥
उद्ग्राभञ्च निग्ग्राभञ्च ब्रह्म देवाऽअवीवृधन् ।
अधा सुपत्क्नानिन्द्राग्ग्नी मे विषूचीनाव्व्यस्यताम् ॥६४॥

॥७॥ क्क्रमध्वमग्ग्निना नाकमुक्ख्यᳬ हस्तेषु बिब्भ्रतः ।
दिवस्पृष्ठᳬ स्वर्ग्गत्त्वा मिश्श्रा देवेभिराद्ध्वम् ॥६५॥
प्राचीमनु प्प्रदिशम्प्रेहि विद्वानग्ग्नेरग्ग्ने पुरोऽअग्ग्निर्ब्भवेह ।
विश्श्वाऽआशा दीद्यानो विभाह्यूर्जन्नो धेहि द्विपदे चतुष्प्पदे ॥६६॥
पृथिव्याऽअहमुदन्तरिक्क्षमारुहमन्तरिक्क्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात्स्वर्ज्ज्योतिरगामहम् ॥६७॥
स्वर्य्यन्तो नापेक्क्षन्तऽआ द्याᳬ रोहन्ति रोदसी ।
यज्ञँय्ये विश्श्वतोधारᳬ सुविद्वाᳬसो वितेनिरे ॥६८॥
अग्ग्ने प्प्रेहि प्प्रथमो देवयताञ्चक्क्षुर्द्देवानामुत मर्त्त्यानाम् ।
इयक्क्षमाणा भृगुभिः सजोषाः स्वर्य्यन्तु यजमानाः स्वस्ति ॥६९॥
नक्तोषासा समनसा विरूपे धापयेते शिशुमेकᳬ समीची ।
द्यावाक्क्षामा रुक्क्मोऽअन्तर्व्विभाति देवाऽअग्ग्निन्धारयन्द्रविणोदाः ॥७०॥
अग्ग्ने सहस्राक्क्ष शतमूर्द्धञ्छतन्ते प्प्राणाः सहस्रँव्व्यानाः ।
त्वᳬ साहस्रस्य रायऽईशिषे तस्म्मै ते विधेम वाजाय स्वाहा ॥७१॥
सुपर्ण्णोसि गरुत्म्मान्पृष्ठे पृथिव्याः सीद ।
भासान्तरिक्क्षमापृण ज्ज्योतिषा दिवमुत्तभान तेजसा दिशऽउद्दृᳬह ॥७२॥
आजुह्वानः सुप्प्रतीकः पुरस्तादग्ग्ने स्वँय्योनिमासीद साधुया ।
अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विश्श्वे देवा यजमानश्श्च सीदत ॥७३॥
ताᳬ सवितुर्व्वरेण्ण्यस्य चित्रामाहँवृणे सुमतिँव्विश्श्वजन्न्याम् ।
यामस्य कण्ण्वोऽअदुहत्प्रपीनाᳬ सहस्रधाराम्पयसा महीङ्गाम् ॥७४॥
विधेम ते परमे जन्म्मन्नग्ग्ने विधेम स्तोमैरवरे सधस्त्थे ।
यस्म्माद्योनेरुदारिथा यजे तम्प्र त्वे हवीᳬषि जुहुरे समिद्धे ॥७५॥
प्रेद्धोऽअग्ग्ने दीदिहि पुरो नोजस्रया सूर्म्म्या यविष्ठ ।
त्वाᳬ शश्श्वन्तऽउपयन्ति वाजाः ॥७६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अ॰१७, अनु॰७-९, मन्त्राः७७-९२

अग्ने तमद्याश्वन्न स्तोमैः क्रतुन्न भद्रꣳ हृदिस्पृशम्। ऋद्ध्यामा तऽओहैः ॥७७॥
चित्तिञ्जुहोमि मनसा घृतेन यथा देवाऽइहागमन्वीतिहोत्राऽऋतावृधः।
पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्म्मणे विश्वाहादाभ्यꣳ हविः ॥७८॥
सप्त तेऽअग्ने समिधः सप्त जिह्वाः सप्तऽऋषयः सप्त धाम प्प्रियाणि।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥७९॥

॥८॥ शुक्रज्ज्योतिश्च चित्रज्ज्योतिश्च सत्त्यज्ज्योतिश्च ज्योतिष्म्माँश्च।
शुक्रश्चऽऋतपाश्चात्त्यꣳहाः ॥८०॥
ईदृङ्चान्यादृङ्च सदृङ्च प्प्रतिसदृङ्। मितश्च सम्मितश्च सभराः ॥८१॥
ऋतश्च सत्त्यश्च ध्रुवश्च धरुणश्च। धर्त्ता च विधर्त्ता च विधारयः ॥८२॥
ऋतजिच्च सत्त्यजिच्च सेनजिच्च सुषेणश्च। अन्तिमित्रश्च दूरेऽअमित्रश्च गणः ॥८३॥
ईदृक्षासऽएतादृक्षासऽऊ षु णः सदृक्षासः प्प्रतिसदृक्षासऽएतन।
मितासश्च सम्मितासो नोऽअद्य सभरसो मरुतो यज्ञेऽअस्म्मिन् ॥८४॥
स्वतवाँश्च प्प्रघासी च सान्तपनश्च गृहमेधी च। क्रीडी च शाकी चोज्जेषी ॥८५॥
इन्द्रन्दैवीर्विशो मरुतोनुवर्त्मानोभवन्यथेन्द्रन्दैवीर्विशो मरुतोनुवर्त्मानोभवन्।
एवमिमँय्यजमानन्दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥८६॥

॥९॥ इमꣳ स्तनमूर्जस्वन्तन्धयापाम्प्रपीनमग्ने सरिरस्य मद्ध्ये।
उत्त्सञ्जुषस्व मधुमन्तमर्वन्त्समुद्रियꣳ सदनमाविशस्व ॥८७॥
घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम।
अनुष्ष्वधमावह मादयस्व स्वाहाकृतँवृषभ वक्षि हव्यम् ॥८८॥
समुद्रादूर्म्मिर्म्मधुमाँ२ऽउदारदुपाꣳशुना सममृतत्त्वमानट्।
घृतस्य नाम गुह्यँय्यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥८९॥
वयन्नाम प्प्रब्रवामा घृतस्यास्म्मिन्यज्ञे धारयामा नमोभिः।
उप ब्रह्मा शृणवच्छस्यमानञ्चतुःशृङ्गोवमीद्गौरऽएतत् ॥९०॥
चत्त्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्त्याँ२ऽआविवेश ॥९१॥
त्रिधा हितम्पणिभिर्ग्गुह्यमानङ्गवि देवासो घृतमन्वविन्दन्।
इन्द्रऽएकꣳ सूर्य्यऽएकञ्जजान वेनादेकꣳ स्वधया निष्टतक्षुः ॥९२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एताऽअर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।
घृतस्य धाराऽअभिचाकशीमि हिरण्ययो वेतसो मध्यऽआसाम् ॥९३॥
सम्यक्स्रवन्ति सरितो न धेनाऽअन्तर्हृदा मनसा पूयमानाः ।
एतेऽअर्षन्त्यूर्म्मयो घृतस्य मृगाऽइव क्षिपणोरीषमाणाः ॥९४॥
सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धाराऽअरुषो न वाजी काष्ठा भिन्दन्नूर्म्मिभिः पिन्वमानः ॥९५॥
अभिप्रवन्त समनेव योषाः कल्याण्यः स्मयमानासोऽअग्निम् ।
घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्य्यति जातवेदाः ॥९६॥
कन्याऽइव वहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽअभि तत्पवन्ते ॥९७॥
अभ्यर्षत सुष्टुतिङ्गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।
इमँय्यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥९८॥
धामन्ते विश्वम्भुवनमधिश्रितमन्तः समुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथे यऽआभृतस्तमश्याम मधुमन्तन्तऽऊर्म्मिम् ॥९९॥

इति सप्तदशोऽध्यायः

अथाष्टादशोऽध्यायः

ऋषिः—देवाः १—४४ । शुनःशेपः ४५—५३ । गालवः ५४—५७, ६१ । विश्वकर्मा ५८—६०, ६४, ६५ । देवश्रवदेववातौ ६२, ६६, ६७ । विश्वामित्रः ६३, ७२ । इन्द्रः ६८ । इन्द्रविश्वामित्रौ ६९ । शासः ७० । जयः ७१ । कुत्सः ७३ । भरद्वाजः ७४ । उत्कीलः ७५, ७६ । उशनाः ७७ ॥

देवता—अग्निः १, ४६, ५१, ५२, ५७, ५८, ६६, ६७, ७२—७५ । प्रजापतिः २—७, ४४, ४५, ५६, ५९—६१ । आत्मा ८—१० । श्रीमदात्मा ११ । धान्यदात्मा १२ । रत्नवान्धनवानात्मा १३ । अग्न्यावियुक्तात्मा १४ । धनावियुक्तात्मा १५ । अग्न्याविविद्याविदात्मा १६ । मित्रैश्वर्य्यसहितात्मा १७ । राजैश्वर्यावियुक्तात्मा १८ । पदार्थविदात्मा १९ । यज्ञानुष्ठानात्मा २०, २९ । यज्ञाङ्गवानात्मा २१ । यज्ञवानात्मा २२ । कालविद्याविदात्मा २३ । विषमाङ्कगणितविद्याविदात्मा २४ । समाङ्कगणितविद्याविदात्मा २५ । पशुविद्याविदात्मा २६ । पशुपालनविद्याविदात्मा २७ । संग्रामाविविदात्मा २८ । राज्यवानात्मा ३० । विश्वेदेवाः ३१, ७६, ७७ । अन्नवान् विद्वान् ३२ । अन्नपतिः ३३, ३४ । रसविद्याविद्विद्वान् ३५, ३६ । सम्राड्राजा ३७ । ऋतुविद्याविद्विद्वान् ३८ । सूर्य्यः ३९, ५० । चन्द्रमाः ४० । वातः ४१ । यज्ञः ४२, ५६, ६३—६५ । विश्वकर्मा ४३ । बृहस्पतिः ४७—४९ । इन्दुः ५३—५५ । इन्द्रः ६८—७१ । विश्वकर्माग्निर्वा ६२ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छन्दः—शक्वरी १, ९ । भुरिगतिजगती २ । भुरिक्शक्वरी ३, ११, १८, २२ । निचृदत्यष्टिः ४,१९। स्वराट्शक्वरी ५, ८ । भुरिगतिजगती ७ । निचृच्छक्वरी १० । भुरिगतिशक्वरी ६, १२, १३ । भुरिगष्टिः १४ । विराडार्षीपङ्क्तिः १५ । निचृदतिशक्वरी १६, २८[क] । स्वराट्शक्वरी १७ । स्वराडतिधृतिः २० । विराड्धृतिः २१ । पंक्तिः २३, २५[क] । संकृतिः[क], विराट्संकृतिः[र] २४ । भुरिक्पङ्क्तिः[क] आकृतिः[र] २५ । ब्राह्मीबृहती २६ । भुरिगार्षीपङ्क्तिः २७, ४४ । भुरिगाकृतिः[क] आर्चीबृहती[र] २८ । स्वराड्विकृतिः[क], ब्राह्म्युष्णिक्[र] २९ । स्वराड्जगती ३० । निचृदार्षीत्रिष्टुप् ३१, ४९, ५९, ६० । निचृदार्ष्यनुष्टुप् ३२, ६२ । त्रिष्टुप् ३३, ३४ । विराडार्ष्यनुष्टुप् ३५ । आर्ष्यनुष्टुप् ३६, ४७ । आर्षीपङ्क्तिः ३७, ५३ । विराडार्षीत्रिष्टुप् ३८, ४१,४२ । भुरिगार्षीत्रिष्टुप् ३९ । निचृदार्षीजगती ४०, ५८ । विराडार्षीजगती ४३, ५२ । अष्टिः ४५ । भुरिगार्ष्यनुष्टुप् ४६, ४८ । भुरिगार्ष्युष्णिक् ५०, ५४ । स्वराडार्षीत्रिष्टुप् ५१ । आर्षीजगती ५५, ६७ । आर्ष्युष्णिक् ५६ । निचृदार्षीगायत्री ५७ । आर्षीत्रिष्टुप् ६१, ६९, ७१, ७३, ७५ । निचृदनुष्टुप् ६३, ६४, ७०, ७६ । विराडनुष्टुप् ६५ । निचृत्त्रिष्टुप् ६६, ७४ । निचृद्गायत्री ६८, ७७ । आर्षीगायत्री ७२ ॥

स्वरः—धैवतः १, ३, ५, ८—११, १७, १८ २२, ३१, ३३, ३४, ३८, ३९, ४१, ४२, ४९, ५१, ५९—६१, ६६, ६९, ७१, ७३—७५ । निषादः २, ७, ३०, ४०, ४३, ५२, ५५, ५८, ६७ । पञ्चमः ६, १२, १३, १५, १६, २३, २५, २७, ३७, ४४, ५३ । गान्धारः ४, १९, २४, ३२, ३५, ३६, ४६—४८, ६२—६५, ७०, ७६ । मध्यमः १४, २६, ४५ । षड्जः २०, ५७, ६८, ७२, ७७, । ऋषभः २१, ५०, ५४, ५६ । पञ्चमः[क], मध्यमः[र] २८ । मध्यमः[क], ऋषभः[र] २९ ॥

॥१॥ वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्वश्च मे यज्ञेन कल्पन्ताम् ॥१॥

प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तञ्च मऽआधीतञ्च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रञ्च मे दक्षश्च मे बलञ्च मे यज्ञेन कल्पन्ताम् ॥२॥

ओजश्च मे सहश्च मऽआत्मा च मे तनूश्च मे शर्म्म च मे वर्म्म च मेऽङ्गानि च मेऽस्थीनि च मे परूꣳषि च मे शरीराणि च मऽआयुश्च मे जरा च मे यज्ञेन कल्पन्ताम् ॥३॥

ज्यैष्ठ्यञ्च मऽआधिपत्यञ्च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धञ्च मे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥४॥

सत्यञ्च मे श्रद्धा च मे जगच्च मे धनञ्च मे विश्वञ्च मे महश्च मे क्रीडा च मे मोदश्च मे जातञ्च मे जनिष्यमाणञ्च मे सूक्तञ्च मे सुकृतञ्च मे यज्ञेन कल्पन्ताम् ॥५॥

ऋतञ्च मेऽमृतञ्च मेऽयक्ष्मञ्च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वञ्च मेऽनमित्रञ्च मेऽभयञ्च मे सुखञ्च मे शयनञ्च मे सूषाश्च मे सुदिनञ्च मे यज्ञेन कल्पन्ताम् ॥६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युन्ता च॑ मे धुर्त्ता च॑ मे क्षेम॑श्च मे धृति॑श्च मे विश्व॑श्च मे मह॑श्च मे संविच्च॑ मे ज्ञात्रं॑च मे सूश्च॑ मे प्रसूश्च॑ मे सीर॑ञ्च मे लय॑श्च मे युज्ञेन॑ कल्पन्ताम् ॥७॥

॥२॥ शं च॑ मे मय॑श्च मे प्रियं च॑ मेनुकामश्च॑ मे काम॑श्च मे सौमनुसश्च॑ मे भग॑श्च मे द्रविण॑ञ्च मे भुद्रं च॑ मे श्रेय॑श्च मे वसी॑यश्च मे यश॑श्च मे युज्ञेन कल्पन्ताम् ॥८॥

॥३॥ ऊर्क्च॑ मे सूनृता च मे पय॑श्च मे रस॑श्च मे घृतं च॑ मे मधु च मे सग्धि॑श्च मे सपी॑तिश्च मे कृषिश्च॑ मे वृष्टि॑श्च मे जैत्रं॑च मऽऔद्भि॑द्यञ्च मे युज्ञेन॑ कल्पन्ताम् ॥९॥
रयिश्च॑ मे राय॑श्च मे पुष्टं च॑ मे पुष्टि॑श्च मे विभु च॑ मे प्रभु च॑ मे पूर्णं च॑ मे पूर्णत॑रञ्च मे कुय॑वञ्च मेक्षि॑तञ्च मेन्नं॑च मेक्षु॑च्च मे युज्ञेन॑ कल्पन्ताम् ॥१०॥
वित्तं च॑ मे वेद्यं॑च मे भूतं च॑ मे भविष्यच्च॑ मे सुगं च॑ मे सुपथ्यं॑च मऽऋद्धं च॑ मऽ ऋद्धि॑श्च मे क्लृप्तं च॑ मे क्लृप्ति॑श्च मे मुति॑श्च मे सुमुतिश्च॑ मे युज्ञेन॑ कल्पन्ताम् ॥११॥
व्रीहय॑श्च मे यवा॑श्च मे माषा॑श्च मे तिला॑श्च मे मुद्गाश्च॑ मे खल्वा॑श्च मे प्रियङ्ग॑वश्च मेण॑वश्च मे श्यामाका॑श्च मे नीवारा॑श्च मे गोधूमा॑श्च मे मुसूरा॑श्च मे युज्ञेन॑ कल्पन्ताम् ॥१२॥

॥४॥ अश्मा॑ च मे मृत्तिका च मे गिरय॑श्च मे पर्वता॑श्च मे सिकता॑श्च मे वनुस्पत॑यश्च मे हिर॑ण्यञ्च मेय॑श्च मे श्यामं च॑ मे लोहं च॑ मे सीस॑ञ्च मे त्रपु च मे युज्ञेन कल्पन्ताम् ॥१३॥
अग्निश्च॑ मऽआप॑श्च मे वीरुध॑श्च मऽओष॑धयश्च मे कृष्टपुच्याश्च॑ मेकृष्टपुच्याश्च॑ मे ग्राम्याश्च॑ मे पुशव॑ऽआरुण्याश्च॑ मे वित्तं च॑ मे वित्ति॑श्च मे भूतं च॑ मे भूति॑श्च मे युज्ञेन॑ कल्पन्ताम् ॥१४॥
वसु च मे वसुतिश्च॑ मे कर्म॑ च मे शक्ति॑श्च मेर्थ॑श्च मऽएम॑श्च मऽइत्या च॑ मे गति॑श्च मे युज्ञेन॑ कल्पन्ताम् ॥१५॥

॥५॥ अग्निश्च॑ मऽइन्द्र॑श्च मे सोम॑श्च मऽइन्द्र॑श्च मे सविता च॑ मऽइन्द्र॑श्च मे सर॑स्वती च मऽइन्द्र॑श्च मे पूषा च॑ मऽइन्द्र॑श्च मे बृहस्पति॑श्च मऽइन्द्र॑श्च मे युज्ञेन॑ कल्पन्ताम् ॥१६॥
मित्रश्च॑ मऽइन्द्र॑श्च मे वरु॑णश्च मऽइन्द्र॑श्च मे धाता च॑ मऽइन्द्र॑श्च मे त्वष्टा॑ च मऽइन्द्र॑श्च मे मुरुत॑श्च मऽइन्द्र॑श्च मे विश्वे॑ च मे देवाऽइन्द्र॑श्च मे युज्ञेन॑ कल्पन्ताम् ॥१७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृथिवी च मऽइन्द्रश्च मेन्तरिक्षञ्च मऽइन्द्रश्च मे द्यौश्च मऽइन्द्रश्च मे समाश्च मऽइन्द्रश्च मे नक्षत्राणि च मऽइन्द्रश्च मे दिशश्च मऽइन्द्रश्च मे यज्ञेन कल्पन्ताम् ॥१८॥

॥६॥ अꣳशुश्च मे रश्मिश्च मेदाभ्यश्च मेधिपतिश्च मऽउपाꣳशुश्च मेन्तर्यामश्च मऽऐन्द्रवायवश्च मे मैत्रावरुणश्च मऽआश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१९॥

आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च मऽऐन्द्राग्नश्च मे महावैश्वदेवश्च मे मरुत्वतीयाश्च मे निष्केवल्यश्च मे सावित्रश्च मे सारस्वतश्च मे पात्नीवतश्च मे हारियोजनश्च मे यज्ञेन कल्पन्ताम् ॥२०॥

स्रुचश्च मे चमसाश्च मे वायव्यानि च मे द्रोणकलशश्च मे ग्रावाणश्च मेधिषवणे च मे पूतभृच्च मऽआधवनीयश्च मे वेदिश्च मे बर्हिश्च मेवभृथश्च मे स्वगाकारश्च मे यज्ञेन कल्पन्ताम् ॥२१॥

अग्निश्च मे घर्म्मश्च मेर्कश्च मे सूर्यश्च मे प्राणश्च मेश्वमेधश्च मे पृथिवी च मेदितिश्च मे दितिश्च मे द्यौश्च मेङ्गुलयः शक्वरयो दिशश्च मे यज्ञेन कल्पन्ताम् ॥२२॥

व्रतञ्च मऽऋतवश्च मे तपश्च मे सँवत्सरश्च मेहोरात्रेऽऊर्वष्ठीवे बृहद्रथन्तरे च मे यज्ञेन कल्पन्ताम् ॥२३॥

॥७॥ एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च मऽएकादश च मऽएकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे नवदश च मे नवदश च मऽएकविꣳशतिश्च मऽएकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च मे नवविꣳशतिश्च मऽएकत्रिꣳशच्च मऽएकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२४॥

चतस्रश्च मेष्टौ च मेष्टौ च मे द्वादश च मे द्वादश च मे षोडश च मे षोडश च मे विꣳशतिश्च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मे चतुर्विꣳशतिश्च मेष्टाविꣳशतिश्च मेष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेष्टाचत्वारिꣳशच्च मे यज्ञेन कल्पन्ताम् ॥२५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्र्यविश्च मे त्र्युवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्य्यवाट् च मे तुर्य्यौही च मे यज्ञेन कल्पन्ताम् ॥२६॥

पष्ठवाट् च मे पष्ठौही च मऽउक्षा च मे वशा च मऽऋषभश्च मे वेहच्च मेऽनड्वाँश्च मे धेनुश्च मे यज्ञेन कल्पन्ताम् ॥२७॥

॥८॥ [क] वाजाय स्वाहा प्रसवाय स्वाहापिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहाहर्पतये स्वाहाह्ने मुग्धाय स्वाहा मुग्धाय वैनंशिनाय स्वाहा विनंशिनऽआन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा । [र] इयन्ते राण्मित्राय यन्तासि यमनऽऊर्जे त्वा वृष्ट्यै त्वा प्रजानान्त्वाधिपत्याय ॥२८॥

[क] आयुर्य्यज्ञेन कल्पताम्प्राणो यज्ञेन कल्पताञ्चक्षुर्य्यज्ञेन कल्पताᳬं श्रोत्रँय्यज्ञेन कल्पताँवाग्यज्ञेन कल्पताम्मनो यज्ञेन कल्पतामात्मा यज्ञेन कल्पताम्ब्रह्मा यज्ञेन कल्पताञ्ज्योतिर्य्यज्ञेन कल्पताᳬं स्वर्य्यज्ञेन कल्पताम्पृष्ठँय्यज्ञेन कल्पताँय्यज्ञो यज्ञेन कल्पताम् । [र] स्तोमश्च यजुश्चऽऋक्च साम च बृहच्च रथन्तरञ्च । स्वर्देवाऽअगन्मामृताऽअभूम प्रजापतेः प्रजाऽअभूम वेट् स्वाहा ॥२९॥

॥९॥ वाजस्य नु प्रसवे मातरम्महीमदितिन्नाम वचसा करामहे ।
यस्यामिदँविश्वम्भुवनमाविवेश तस्यान्नो देवः सविता धर्म्म साविषत् ॥३०॥

विश्वेऽअद्य मरुतो विश्वऽऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवाऽअवसागमन्तु विश्वमस्तु द्रविणँवाजोऽअस्मे ॥३१॥

वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः ।
वाजो नो विश्वैर्देवैर्धनसाताविहावतु ॥३२॥

वाजो नोऽअद्य प्रसुवाति दानँवाजो देवाँ२ऽऋतुभिः कल्पयाति ।
वाजो हि मा सर्ववीरञ्जजान विश्वाऽआशा वाजपतिर्जयेयम् ॥३३॥

वाजः पुरस्तादुत मध्यतो नो वाजो देवान्हविषा वर्द्धयाति ।
वाजो हि मा सर्ववीरञ्चकार सर्वाऽआशा वाजपतिर्भवेयम् ॥३४॥

सम्मा सृजामि पयसा पृथिव्याः सम्मा सृजाम्यद्भिरोषधीभिः ।
सोहँवाजंᳬं सनेयमग्ने ॥३५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पयः॑ पृथि॒व्याम्पय॒ऽओष॑धीषु॒ पयो॑ दि॒व्युन्तरि॑क्षे॒ पयो॑ धाः ।
पय॑स्वतीः प्र॒दिशः॑ सन्तु॒ मह्य॑म् ॥३६॥
दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॒ऽश्विनो॑र्ब्बा॒हुभ्या॑म्पू॒ष्णो हस्ता॑भ्याम् ।
सर॑स्वत्यै वा॒चो य॒न्तुर्य॒न्त्रेणा॒ग्नेः साम्रा॑ज्येना॒भिषि॑ञ्चामि ॥३७॥

॥१०॥ ऋ॒ताषाडृ॒तधा॑मा॒ग्निर्ग॑न्ध॒र्वस्तस्यौष॑धयोऽप्स॒रसो॑ मु॒दो नाम॑ ।
स न॑ऽइ॒दम्ब्रह्म॑ क्ष॒त्रम्पा॑तु॒ तस्मै॒ स्वाहा॒ वाट्ताभ्यः॒ स्वाहा॑ ॥३८॥
सꣳहि॒तो वि॒श्वसा॑मा॒ सूर्यो॑ गन्ध॒र्वस्तस्य॒ मरी॑चयोऽप्स॒रस॑ऽआ॒युवो॒ नाम॑ ।
स न॑ऽइ॒दम्ब्रह्म॑ क्ष॒त्रम्पा॑तु॒ तस्मै॒ स्वाहा॒ वाट्ताभ्यः॒ स्वाहा॑ ॥३९॥
सु॒षु॒म्णः सूर्य॑रश्मिश्च॒न्द्रमा॑ गन्ध॒र्वस्तस्य॒ नक्ष॑त्राण्यप्स॒रसो॑ भे॒कुर॑यो॒ नाम॑ ।
स न॑ऽइ॒दम्ब्रह्म॑ क्ष॒त्रम्पा॑तु॒ तस्मै॒ स्वाहा॒ वाट्ताभ्यः॒ स्वाहा॑ ॥४०॥
इ॒षि॒रो वि॒श्वव्य॑चा॒ वातो॑ गन्ध॒र्वस्तस्यापो॑ऽअप्स॒रस॒ऽऊर्जो॒ नाम॑ ।
स न॑ऽइ॒दम्ब्रह्म॑ क्ष॒त्रम्पा॑तु॒ तस्मै॒ स्वाहा॒ वाट्ताभ्यः॒ स्वाहा॑ ॥४१॥
भु॒ज्युः सु॑प॒र्णो य॒ज्ञो ग॑न्ध॒र्वस्तस्य॒ दक्षि॑णाऽअप्स॒रस॑ स्त॒वा नाम॑ ।
स न॑ऽइ॒दम्ब्रह्म॑ क्ष॒त्रम्पा॑तु॒ तस्मै॒ स्वाहा॒ वाट्ताभ्यः॒ स्वाहा॑ ॥४२॥
प्र॒जाप॑तिर्वि॒श्वक॑र्म्मा॒ मनो॑ गन्ध॒र्वस्तस्य॑ऽऋक्सा॒मान्य॑प्स॒रस॒ऽएष्ट॑यो॒ नाम॑ ।
स न॑ऽइ॒दम्ब्रह्म॑ क्ष॒त्रम्पा॑तु॒ तस्मै॒ स्वाहा॒ वाट्ताभ्यः॒ स्वाहा॑ ॥४३॥
स नो॑ भुवनस्य पते प्रजापते॒ यस्य॑ त॒ऽउप॑रि गृ॒हा यस्य॑ वे॒ह ।
अ॒स्मै ब्रह्म॑णे॒ऽस्मै क्ष॒त्राय॒ महि॒ शर्म्म॑ यच्छ॒ स्वाहा॑ ॥४४॥
स॒मु॒द्रो॑ऽसि॒ नभ॑स्वाना॒र्द्रदा॑नुः श॒म्भूर्म॑यो॒भूर॒भि मा॑ वाहि॒ स्वाहा॑ मारु॒तो॑ऽसि म॒रुतां॑ ग॒णः
श॒म्भूर्म॑यो॒भूर॒भि मा॑ वाहि॒ स्वाहा॑ऽव॒स्यूर॑सि॒ दुव॑स्वाञ्छ॒म्भूर्म॑यो॒भूर॒भि मा॑ वाहि॒
स्वाहा॑ ॥४५॥
यास्ते॑ऽअग्ने॒ सूर्ये॒ रुचो॒ दिव॑माता॒न्वन्ति॑ र॒श्मिभिः॑ ।
ताभि॑र्नो॒ऽअ॒द्य सर्वा॑भी रु॒चे जना॑य नस्कृधि ॥४६॥
या वो॑ देवाः॒ सूर्ये॒ रुचो॒ गोष्वश्वे॑षु॒ या रुचः॑ ।
इन्द्रा॑ग्नी॒ ताभिः॒ सर्वा॑भी॒ रुच॑न्नो धत्त बृहस्पते ॥४७॥
रुच॑न्नो धेहि ब्राह्म॒णेषु॒ रुच॒ꣳ राज॑सु नस्कृधि ।
रुचँ॒ विश्ये॑षु शू॒द्रेषु॒ मयि॑ धेहि रु॒चा रुच॑म् ॥४८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा नऽआयुः प्रमोषीः ॥४९॥
स्वर्ण्ण घर्म्मः स्वाहा स्वर्ण्णार्क्कः स्वाहा स्वर्ण्ण शुक्रः स्वाहा स्वर्ण्ण ज्योतिः स्वाहा
स्वर्ण्ण सूर्य्यः स्वाहा ॥५०॥

॥११॥ अग्निँय्युनज्मि शवसा घृतेन दिव्यꣳ सुपर्ण्णँवयसा बृहन्तम् ।
तेन वयङ्गमेम ब्रध्नस्य विष्टपꣳ स्वो रुहाणाऽअधि नाकमुत्तमम् ॥५१॥
इमौ ते पक्षावजरौ पतत्रिणौ याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने ।
ताभ्याम्पतेम सुकृतामु लोकँय्यत्रऽऋषयो जग्मुः प्रथमजाः पुराणाः ॥५२॥
इन्दुर्द्दक्षः श्येनऽऋतावा हिरण्यपक्षः शकुनो भुरण्युः ।
महान्त्सधस्थे ध्रुवऽआनिषत्तो नमस्तेऽअस्तु मा मा हिꣳसीः ॥५३॥
दिवो मूर्द्धासि पृथिव्या नाभिरूर्ग्गपामोषधीनाम् ।
विश्वायुः शर्म्म सप्रथा नमस्पथे ॥५४॥
विश्वस्य मूर्द्धन्नधि तिष्ठसि श्रितः समुद्रे ते हृदयमप्स्वायुरपो दत्तोदधिम्भिन्त ।
दिवस्पर्ज्जन्यादन्तरिक्षात्पृथिव्यास्ततो नो वृष्ट्याव ॥५५॥
इष्टो यज्ञो भृगुभिराशीर्द्दा वसुभिः । तस्य नऽइष्टस्य प्रीतस्य द्रविणेहागमेः ॥५६॥
इष्टोऽअग्निराहुतः पिपर्त्तु नऽइष्टꣳ हविः । स्वगेदन्देवेभ्यो नमः ॥५७॥

॥१२॥ यदाकूतात्समसुस्रोद्धृदो वा मनसो वा सम्भृतञ्चक्षुषो वा ।
तदनु प्रेत सुकृतामु लोकँय्यत्रऽऋषयो जग्मुः प्रथमजाः पुराणाः ॥५८॥
एतꣳ सधस्थ परि ते ददामि यमावहाच्छेवधिञ्जातवेदाः ।
अन्वागन्ता यज्ञपतिर्वोऽअत्र तꣳ स्म जानीत परमे व्योमन् ॥५९॥
एतञ्जानाथ परमे व्योमन्देवाः सधस्था विद रूपमस्य ।
यदागच्छात्पथिभिर्द्देवयानैरिष्टापूर्त्ते कृणवाथाविरस्मै ॥६०॥
उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्त्ते सꣳसृजेथामयञ्च ।
अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत ॥६१॥
येन वहसि सहस्रँय्येनाग्ने सर्ववेदसम् ।
तेनेमँय्यज्ञन्नो नय स्वर्द्देवेषु गन्तवे ॥६२॥
प्रस्तरेण परिधिना स्रुचा वेद्या च बर्हिषा ।
ऋचेमँय्यज्ञन्नो नय स्वर्द्देवेषु गन्तवे ॥६३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्दत्तँय्यत्त्परादानँय्यत्त्पूर्त्तँय्याश्च दक्षिणाः ।
तदग्निर्वैश्वकर्म्मणः स्वर्देवेषु नो दधत् ॥६४॥
यत्र धाराऽअनपेता मधोर्घृतस्य च याः ।
तदग्निर्वैश्वकर्म्मणः स्वर्देवेषु नो दधत् ॥६५॥
अग्निरस्मि जन्मना जातवेदा घृतम्मे चक्षुरमृतम्मऽआसन् ।
अर्कस्त्रिधातू रजसो विमानोजस्रो घर्म्मो हविरस्मि नाम ॥६६॥
ऋचो नामास्मि यजूंषि नामास्मि सामानि नामास्मि । येऽअग्नयः
पाञ्चजन्याऽअस्यां पृथिव्यामधि । तेषामसि त्वमुत्तमः प्र नो जीवातवे सुव ॥६७॥

॥१३॥ वार्त्रहत्याय शवसे पृतनाषाह्याय च । इन्द्र त्वावर्त्तयामसि ॥६८॥
सहदानुम्पुरुहूत क्षियन्तमहस्तमिन्द्र सम्पिणक्कुणारुम् ।
अभि वृत्रंवर्द्धमानम्पियारुमपादमिन्द्र तवसा जघन्थ ॥६९॥
वि नऽइन्द्र मृधो जहि नीचा यच्छ पृतन्यतः ।
योऽअस्माँ२॥ऽअभिदासत्यधरङ्गमया तमः ॥७०॥
मृगो न भीमः कुचरो गिरिष्ठाः परावतऽआजगन्था परस्याः ।
सृकं सँशाय पविमिन्द्र तिग्मं वि शत्रून्ताढि वि मृधो नुदस्व ॥७१॥
वैश्वानरो नऽऊतयऽआप्प्रयातु परावतः । अग्निर्नः सुष्टुतीरुप ॥७२॥
पृष्टो दिवि पृष्टोऽअग्निः पृथिव्याम्पृष्टो विश्वाऽओषधीराविवेश ।
वैश्वानरः सहसा पृष्टोऽअग्निः स नो दिवा स रिषस्पातु नक्तम् ॥७३॥
अश्याम तङ्कामम‍ग्ने तवोतीऽअश्याम रयिं रयिवः सुवीरम् ।
अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरन्ते ॥७४॥
वयन्तेऽअद्य ररिमा हि काममुत्तानहस्ता नमसोपसद्य ।
यजिष्ठेन मनसा यक्षि देवानस्रेधता मन्मना विप्रोऽअग्ने ॥७५॥
धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः ।
सचेतसो विश्वे देवा यज्ञम्प्रावन्तु नः शुभे ॥७६॥
त्वँय्यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥७७॥

इत्यष्टादशोऽध्यायः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथैकोनविंशोऽध्यायः

ऋषिः—प्रजापतिः १ । भारद्वाजः २, ३ । आभूतिः ४—९ । हैमवर्चिः १०—३५ । प्रजापतिः ३६, ३७ । वैखानसः ३८—४८ । शङ्खः ४९—९५ ।

देवता—सोमः १—५, ८—१०, १५, २१, २३, २५, ३४, ३५, ५४, ७२, ७४, ८४ । इन्द्रः ६, ७, ३२, ३३, ३८, ७१, ७६, ९१ । अग्निः ११, ४०, ४१, ४८, ६४—६६ । विद्वांसः १२, ३९ । यज्ञः १३, १६, १७, १९, २२, २६—२८, ३०, ३१ । अतिथ्यादयो लिङ्गोक्ताः १४ । गृहपतिः १८ । यजमानः २० । विद्वान् २४ । इडा २९ । पितरः ३६, ४५, ४७, ४९—५३, ५५—६३, ६७—७०, ८७ । सरस्वती ३७, ८३, ८८, ९०, ९४ । पवित्रकर्त्ता ४२ । सविता ४३, ८०, ८५, ८६ । विश्वे देवाः ४४ । श्रीः ४६ । अङ्गिरसः ७३ । प्रजापतिः ७५, ७७—७९ । वरुणः ८१ । अश्विनौ ८२, ८९, ९३, ९५ । आत्मा ९२ ॥

छन्दः—निचृच्छक्वरी १, ९ । स्वराडनुष्टुप् २ । भुरिक्त्रिष्टुप् ३, ७, ७२, ७८, ८०, ८१, ८३, ८५, ८९, ९१ । आर्षीगायत्री ४ । निचृज्जगती ५, ५९, ९५ । विराट्प्रकृतिः ६ । निचृत् पङ्क्तिः ८ । शक्वरी ११ । आर्ष्युष्णिक् १० । भुरिगनुष्टुप् १२, १६, २५, २७ । अनुष्टुप् १३—१५, १७, २१—२३, २६, २८, ३०, ३१, ३९, ४६, ६५ । निचृदनुष्टुप् १८, १९, २४, २९, ४५, ७० । भुरिगुष्णिक् २० । निचृत्त्रिष्टुप् ३२, ६२, ६६, ७३, ८४ । त्रिष्टुप् ३३, ३४, ५३, ५६, ६१, ६९, ७४, ८२, ८६, ९२, ९३ । विराट्त्रिष्टुप् ३५, ४४, ४९, ५०, ६०, ६३ । निचृदष्टिः ३६, ४८ । भुरिगष्टिः ३७ । गायत्री ३८, ४२, ७१ । निचृद्गायत्री ४०, ४१, ४३ । स्वराट्पङ्क्तिः ४७, ५२, ६७, ६८, ९४ । भुरिक्पङ्क्तिः ५१, ५४, ५५, ८७, ९० । निचृत्पङ्क्तिः ५७ । विराट्पङ्क्तिः ५८, ९४ । विराडनुष्टुप् ६४ । भुरिगतिजगती ७५, ७९ । भुरिगतिशक्वरी ७६ । अतिशक्वरी ७७ । स्वराट्त्रिष्टुप् ८८ ॥

स्वरः—धैवतः १, ३, ६, ७, ९, ११, ३२—३५, ४४, ४९, ५०, ५३, ५६, ६०—६३, ६६, ६९, ७२—७४, ७८, ८०—८६, ८८, ८९, ९१—९३ । गान्धारः २, १२—१९, २१—३१, ३९, ४५, ४६, ६४, ६५, ७० । षड्जः ४, ३८, ४०—४३, ७१ । निषादः ५, ५९, ७५, ७९, ९५ । पञ्चमः ८, ४७, ५१, ५२, ५४, ५५, ५७, ५८, ६७, ६८, ७६, ७७, ८७, ९०, ९४ । ऋषभः १०, २० । मध्यमः ३६, ३७, ४८ ॥

॥१॥ स्वाद्वीन्त्वा स्वादुना तीव्रान्तीव्रेणामृताममृतेन । मधुमतीम्मधुमता सृजामि सꣳ,
सोमेन । सोमोऽस्यश्विभ्याम्पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥१॥
परीतो षिञ्चता सुतꣳ सोमो यऽउत्तमꣳ हविः ।
दधन्वा यो नर्य्योऽअप्स्वन्तरा सुषाव सोममद्रिभिः ॥२॥
वायोः पूतः पवित्रेण प्रत्यङ्क्सोमोऽअतिद्रुतः । इन्द्रस्य युज्यः सखा । वायोः
पूतः पवित्रेण प्राङ्क्सोमोऽअतिद्रुतः । इन्द्रस्य युज्यः सखा ॥३॥
पुनाति ते परिस्रुतꣳ सोमꣳ सूर्य्यस्य दुहिता । वारेण शश्वता तना ॥४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्म क्षत्रम्पवते तेजऽइन्द्रियꣳ सुरया सोमः सुतऽआसुतो मदाय ।
शुक्रेण देव देवताः पिपृग्धि रसेनान्नँय्यजमानाय धेहि ॥५॥

कुविदङ्ग यवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वँवियूय । इहेहैषाङ्कृणुहि भोजनानि ये बर्हिषो नमऽउक्तिँय्यजन्ति । उपयामगृहीतोस्यश्विभ्यान्त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्णऽएष ते योनिस्तेजसे त्वा वीर्य्याय त्वा बलाय त्वा ॥६॥

नाना हि वान्देवहितꣳ सदस्कृतम्मा सꣳसृक्षाथाम्परमे व्योमन् । सुरा त्वमसि शुष्मिणी सोमऽएष मा मा हिꣳसीः स्वाँय्योनिमाविशन्ती ॥७॥

उपयामगृहीतोस्याश्विनन्तेजः सारस्वतँवीर्य्यमैन्द्रम्बलम् ।
एष ते योनिर्मोदाय त्वानन्दाय त्वा महसे त्वा ॥८॥

तेजोसि तेजो मयि धेहि वीर्य्यमसि वीर्य्यम्मयि धेहि बलमसि बलम्मयि धेह्योजोस्योजो मयि धेहि मन्युरसि मन्युम्मयि धेहि सहोसि सहो मयि धेहि ॥९॥

या व्याघ्रँविषूचिकोभौ वृकञ्च रक्षति ।
श्येनम्पतत्रिणꣳ सिꣳहꣳ सेमम्पात्वꣳहसः ॥१०॥

यदापिपेष मातरम्पुत्रः प्रमुदितो धयन् ।
एतत्तदग्नेऽअनृणो भवाम्यहतौ पितरौ मया ।
सम्पृच स्थ सम्मा भद्रेण पृङ्क्त विपृच स्थ वि मा पाप्मना पृङ्क्त ॥११॥

॥२॥ देवा यज्ञमतन्वत भेषजम्भिषजाश्विना ।
वाचा सरस्वती भिषगिन्द्रायेन्द्रियाणि दधतः ॥१२॥

दीक्षायै रूपꣳ शष्पाणि प्रायणीयस्य तोक्मानि ।
क्रयस्य रूपꣳ सोमस्य लाजाः सोमाꣳशवो मधु ॥१३॥

आतिथ्यरूपम्मासरम्महावीरस्य नग्नहुः ।
रूपमुपसदामेतत्तिस्रो रात्रीः सुरासुता ॥१४॥

सोमस्य रूपङ्क्रीतस्य परिस्रुत्परिषिच्यते ।
अश्विभ्यान्दुग्धम्भेषजमिन्द्रायैन्द्रꣳ सरस्वत्या ॥१५॥

आसन्दी रूपꣳ राजासन्द्यै वेद्यै कुम्भी सुराधानी ।
अन्तरऽउत्तरवेद्या रूपङ्कारोतरो भिषक् ॥१६॥

वेद्या वेदिः समाप्यते बर्हिषा बर्हिरिन्द्रियम् ।
यूपेन यूपऽआप्यते प्रणीतोऽअग्निरग्निना ॥१७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हुविर्द्धानँय्यदुश्श्विनाग्नीद्ध्रँय्यत्त्सरस्वती ।
इन्द्रायैन्द्रꣳ सदस्कृतम्पत्नीशालङ्गार्हपत्त्यः ॥१८॥
प्रैषेभिः प्रैषानाप्नोत्त्याप्रीभिराप्रीर्य्युज्ञस्य ।
प्रयाजेभिरनुयाजान्वषट्कारेभिराहुतीः ॥१९॥
पशुभिः पशूनाप्नोति पुरोडाशैर्हवीꣳष्या ।
छन्दोभिः सामिधेनीर्य्याज्याभिर्वषट्कारान् ॥२०॥
धानाः करम्भः सक्तवः परीवापः पयो दधि ।
सोमस्य रूपꣳ हविषऽआमिक्षा वाजिनम्मधु ॥२१॥
धानानाꣳ रूपङ्कुवलम्परीवापस्य गोधूमाः ।
सक्तूनाꣳ रूपम्बदरमुपवाकाः करम्भस्य ॥२२॥
पयसो रूपँय्यद्यवा दध्नो रूपङ्कर्कन्धूनि ।
सोमस्य रूपँवाजिनꣳ सौम्म्यस्य रूपमामिक्षा ॥२३॥
आश्श्रावयेति स्तोत्रियाः प्रत्याश्श्रावोऽअनुरूपः ।
यजेति धाय्यारूपम्प्रगाथा येयजामहाः ॥२४॥
अर्द्धऽऋचैरुक्थानाꣳ रूपम्पदैराप्नोति निविदः ।
प्रणवैः शस्त्राणाꣳ रूपम्पयसा सोमऽआप्प्यते ॥२५॥
अश्श्विभ्याम्प्रातःसवनमिन्द्रेणैन्द्रम्माद्ध्यन्दिनम् ।
वैश्श्वदेवꣳ सरस्वत्त्या तृतीयमाप्तꣳ सवनम् ॥२६॥
वायव्व्यैर्वायव्व्यान्याप्नोति सतेन द्रोणकलशम् ।
कुम्भीभ्यामम्भृणौ सुते स्थालीभि स्थालीराप्नोति ॥२७॥
यजुर्भिराप्प्यन्ते ग्रहा ग्रहै स्तोमाश्च विष्टुतीः ।
छन्दोभिरुक्थाशस्त्राणि साम्नावभृथऽआप्प्यते ॥२८॥
इडाभिर्भक्षानाप्नोति सूक्तवाकेनाशिषः ।
शँय्युना पत्नीसँय्याजान्त्समिष्टयजुषा सꣳस्थाम् ॥२९॥
व्रतेन दीक्षामाप्नोति दीक्षयाप्नोति दक्षिणाम् ।
दक्षिणा श्श्रद्धामाप्नोति श्श्रद्धया सत्त्यमाप्प्यते ॥३०॥
एतावद्रूपँय्यज्ञस्य यद्देवैर्ब्रह्मणा कृतम् ।
तदेतत्सर्वमाप्नोति यज्ञे सौत्रामणी सुते ॥३१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥३॥ सुरावन्तम्बर्हिषदꣳ सुवीरँय्यज्ञꣳ हिन्वन्ति महिषा नमोभिः ।
दधानाः सोमन्दिवि देवतासु मदेमेन्द्रँय्यजमानाः स्वर्क्काः ॥३२॥
यस्ते रसः सम्भृतऽओषधीषु सोमस्य शुष्मः सुरया सुतस्य ।
तेन जिन्व यजमानम्मदेन सरस्वतीमश्श्विनाविन्द्रमग्निम् ॥३३॥
यमश्श्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियाय ।
इमन्तꣳ शुक्क्रम्मधुमन्तमिन्दुꣳ सोमꣳ राजानमिह भक्क्षयामि ॥३४॥
यदत्र रिप्तꣳ रसिनः सुतस्य यदिन्द्रोऽअपिबच्छचीभिः ।
अहन्तदस्य मनसा शिवेन सोमꣳ राजानमिह भक्क्षयामि ॥३५॥
पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधा नमः
प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः । अक्क्षन्पितरोमीमदन्त पितरोती-
तृपन्त पितरः पितरः शुन्धध्वम् ॥३६॥
पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः ।
पवित्रेण शतायुषा । पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शता-
युषा विश्श्वमायुर्व्यश्नवै ॥३७॥
अग्नऽआयूꣳषि पवसऽआसुवोर्जमिषञ्च नः । आरे बाधस्व दुच्छुनाम् ॥३८॥
पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्श्वा भूतानि जातवेदः पुनीहि मा ॥३९॥
पवित्रेण पुनीहि मा शुक्क्रेण देव दीद्यत् । अग्ने क्क्रत्वा क्क्रतूँ१ँरनु ॥४०॥
यत्ते पवित्रमर्च्चिष्ष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥४१॥
पवमानः सोऽअद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥४२॥
उभाभ्यान्देव सवितः पवित्रेण सवेन च । माम्पुनीहि विश्श्वतः ॥४३॥
वैश्श्वदेवी पुनती देव्यागाद्यस्यामिमा बह्व्यस्तन्वो वीतपृष्ठाः ।
तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥४४॥
ये समानाः समनसः पितरो यमराज्ये ।
तेषाँल्लोकः स्वधा नमो यज्ञो देवेषु कल्पताम् ॥४५॥
ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषाꣳ श्रीर्म्मयि कल्पतामस्मिँल्लोके शतꣳ समाः ॥४६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वे सृतीऽअश्रृणवम्पितॄणामहन्देवानामुत मर्त्त्यानाम् ।
ताभ्यामिदँविश्श्वमेजुत्समेति यदन्तरा पितरम्मातरञ्च ॥४७॥
इद\ँ हविः प्रजननम्मेऽअस्तु दशवीर\ँ सर्वगण\ँ स्वस्तये ।
आत्मसनि प्रजासनि पशुसनि लोकसन्न्यभयसनि ।
अग्निः प्प्रजाम्बहुलाम्मे करोत्वन्नम्पयो रेतोऽअस्म्मासु धत्त ॥४८॥

॥४॥ उदीरतामवरऽउत्त्परासऽउन्मध्यमाः पितरः सोम्म्यासः ।
असुँय्यऽईयुरवृकाऽऋतज्ञास्ते नोवन्तु पितरो हवेषु ॥४९॥
अङ्गिरसो नः पितरो नवग्ग्वाऽअथर्व्वाणो भृगवः सोम्म्यासः ।
तेषाँवय\ँ सुमतौ यज्ञियानामपि भद्द्रे सौमनसे स्याम ॥५०॥
ये नः पूर्व्वे पितरः सोम्म्यासोनूहिरे सोमपीथँवसिष्ठाः ।
तेभिर्य्यमः स\ँरराणो हवी\ँष्युशन्नुशद्भिः प्रतिकाममत्तु ॥५१॥
त्व\ँ सोम प्रचिकितो मनीषा त्व\ँ रजिष्ठमनुनेषि पन्थाम् ।
तव प्रणीती पितरो नऽइन्दो देवेषु रत्नमभजन्त धीराः ॥५२॥
त्वया हि नः पितरः सोम पूर्व्वे कर्म्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिधी१ँ॥रपोर्ण्णु वीरेभिरश्श्वैर्म्मघवा भवा नः ॥५३॥
त्व\ँ सोम पितृभिः सँविदानोनु द्यावापृथिवीऽआततन्थ ।
तस्म्मै तऽइन्दो हविषा विधेम वय\ँ स्याम पतयो रयीणाम् ॥५४॥
बर्हिषदः पितरऽऊत्त्यर्व्वागिमा वो हव्या चकृमा जुषध्वम् ।
तऽआगतावसा शन्तमेनाथा नः शँय्योररपो दधात ॥५५॥
आहम्पितॄन्त्सुविदत्राँ२ँ॥ऽअवित्सि नपातञ्च विक्क्रमणञ्च विष्ण्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्तऽइहागमिष्ठाः ॥५६॥
उपहूताः पितरः सोम्म्यासो बर्हिष्ष्येषु निधिषु प्प्रियेषु ।
तऽआगमन्तु तऽइह श्रुवन्त्वधिब्रुवन्तु तेवन्त्वस्म्मान् ॥५७॥
आयन्तु नः पितरः सोम्म्यासोग्निष्ष्वात्ताः पथिभिर्द्देवयानैः ।
अस्म्मिन्यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेवन्त्वस्म्मान् ॥५८॥
अग्निष्ष्वात्ताः पितरऽएह गच्छत सदःसदः सदत सुप्प्रणीतयः ।
अत्ता हवी\ँषि प्रयतानि बर्हिष्ष्यथा रयि\ँ सर्व्ववीरन्दधातन ॥५९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

येऽअग्निष्ष्वात्ता येऽअनग्निष्ष्वात्ता मद्ध्ये दिवः स्वधया मादयन्ते ।
तेब्भ्यः स्वराडसुनीतिमेताँय्यथावशन्तन्वङ्कल्पयाति ॥६०॥
अग्निष्ष्वात्तानृतुमतो हवामहे नाराशꣳसे सोमपीथँय्यऽआशुः ।
ते नो विप्रासः सुहवा भवन्तु वयꣳ स्याम पतयो रयीणाम् ॥६१॥
॥५॥ आच्या जानु दक्षिणतो निषद्येमँय्यज्ञमभिगृणीत विश्वे ।
मा हिꣳसिष्ट पितरः केनचिन्नो यद्वऽआगः पुरुषता कराम ॥६२॥
आसीनासोऽअरुणीनामुपस्थे रयिन्धत्त दाशुषे मर्त्याय ।
पुत्रेब्भ्यः पितरस्तस्य वस्वः प्रयच्छत तऽइहोर्जन्दधात ॥६३॥
यमग्ने कव्यवाहन त्वञ्चिन्मन्यसे रयिम् ।
तन्नो गीर्भिः श्रवाय्यन्देवत्रा पनया युजम् ॥६४॥
योऽअग्निः कव्यवाहनः पितॄन्यक्षदृतावृधः ।
प्रेदु हव्यानि वोचति देवेब्भ्यश्च पितृब्भ्यऽआ ॥६५॥
त्वमग्नऽईडितः कव्यवाहनावाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृब्भ्यः स्वधया तेऽअक्षन्नद्धि त्वन्देव प्रयता हवीꣳषि ॥६६॥
ये चेह पितरो ये च नेह याँश्च विद्म याँ२ऽउ च न प्रविद्म ।
त्वँवेत्थ यति ते जातवेदः स्वधाभिर्य्यज्ञꣳ सुकृतञ्जुषस्व ॥६७॥
इदम्पितृब्भ्यो नमोऽअस्त्वद्य ये पूर्वासो यऽउपरासऽईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥६८॥
अधा यथा नः पितरः परासः प्रत्नासोऽअग्नऽऋतमाशुषाणाः ।
शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तोऽअरुणीरपव्रन् ॥६९॥
उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि ।
उशन्नुशतऽआवह पितॄन्हविषेऽअत्तवे ॥७०॥
अपाम्फेनेन नमुचेः शिरऽइन्द्रोदवर्त्तयः ।
विश्वा यदजय स्पृधः ॥७१॥

॥६॥ सोमो राजामृतꣳ सुतऽऋजीषेणाजहान्मृत्युम् ।
ऋतेन सत्यमिन्द्रियँविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७२॥
अद्भ्यः क्षीरँव्यपिबत्क्रुङ्ङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियँविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सोममद्भ्यो व्यपिबच्छन्दसा हꣳसः शुचिषत् ।
ऋतेन सत्त्यमिन्द्रियँविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७४॥
अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ।
ऋतेन सत्त्यमिन्द्रियँविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७५॥
रेतो मूत्रँविजहाति योनिम्प्रविशदिन्द्रियम् ।
गर्भो जरायुणावृतऽउल्बञ्जहाति जन्मना ।
ऋतेन सत्त्यमिन्द्रियँविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७६॥
दृष्ट्वा रूपे व्याकरोत्सत्त्यानृते प्रजापतिः ।
अश्रद्धामनृतेदधाच्छ्रद्धाꣳ सत्त्ये प्रजापतिः ।
ऋतेन सत्त्यमिन्द्रियँविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७७॥
वेदेन रूपे व्यपिबत्सुतासुतौ प्रजापतिः ।
ऋतेन सत्त्यमिन्द्रियँविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७८॥
दृष्ट्वा परिस्रुतो रसꣳ शुक्रेण शुक्रँव्यपिबत्पयः सोमम्प्रजापतिः ।
ऋतेन सत्त्यमिन्द्रियँविपानꣳ शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७९॥

॥७॥ सीसेन तन्त्रम्मनसा मनीषिणऽऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञꣳ सविता सरस्वतीन्द्रस्य रूपँवरुणो भिषज्यन् ॥८०॥
तदस्य रूपममृतꣳ शचीभिस्तिस्रो दधुर्देवताः सꣳरराणाः ।
लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य माꣳसमभवन्न लाजाः ॥८१॥
तदश्विना भिषजा रुद्रवर्त्तनी सरस्वती वयति पेशोऽअन्तरम् ।
अस्थि मज्जानम्मासरैः कारोतरेण दधतो गवान्त्वचि ॥८२॥
सरस्वती मनसा पेशलँवसु नासत्त्याभ्याँवयति दर्शतँवपुः ।
रसम्परिस्रुता न रोहितन्नग्नहुर्धीरस्तसरन्न वेम ॥८३॥
पयसा शुक्रममृतञ्जनित्रꣳ सुरया मूत्राज्जनयन्त रेतः ।
अपामतिन्दुर्म्मतिम्बाधमानाऽऊवध्यँवातꣳ सब्बन्तदारात् ॥८४॥
इन्द्रः सुत्रामा हृदयेन सत्त्यम्पुरोडाशेन सविता जजान ।
यकृत्क्लोमानँवरुणो भिषज्यन्मतस्ने वायव्यैर्न्न मिनाति पित्तम् ॥८५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आ॒न्त्राणि॑ स्था॒लीर्मधु॒ पिन्व॑माना गु॒दाः पात्रा॑णि सु॒दुघा॒ न धे॒नुः ।
श्ये॒नस्य॒ पत्र॒न्न प्ली॒हा शची॑भिरास॒न्दी नाभि॑रु॒दर॒न्न मा॒ता ॥८६॥
कु॒म्भो व॑नि॒ष्ठुर्ज॑नि॒ता शची॑भि॒र्यस्मि॒न्नग्रे॒ योन्यां॒ गर्भो॑ऽअ॒न्तः ।
प्ला॒शिर्व्य॑क्तः श॒तधा॑र॒ऽउत्सो॑ दु॒हे न कु॒म्भी स्व॒धाम्पि॒तृभ्यः॑ ॥८७॥
मुख॑ꣳ स॒दस्य॒ शिर॒ऽइत्सते॑न जि॒ह्वा प॒वित्र॑म॒श्विना॒सन्त्सर॑स्वती ।
चप्प॒न्न पा॒युर्भि॒षग॑स्य॒ वालो॑ व॒स्तिर्न शेपो॒ हर॑सा तर॒स्वी ॥८८॥
अ॒श्विभ्यां॒ चक्षु॑र॒मृत॒ङ्ग्रहा॑भ्या॒ञ्छागे॑न॒ तेजो॑ ह॒विषा॑ शृ॒तेन॑ ।
पक्ष्मा॑णि गो॒धूमैः॒ कुव॑लैरु॒तानि॒ पेशो॒ न शु॒क्रमसि॑तँव्वसाते ॥८९॥
अवि॒र्न मे॒षो न॒सि वी॒र्या॑य प्रा॒णस्य॒ पन्था॑ऽअ॒मृतो॒ ग्रहा॑भ्याम् ।
सर॑स्वत्युपवा॒कैर्व्या॒नन्नस्या॑नि ब॒र्हिर्बद॑रैर्जजान ॥९०॥
इन्द्र॑स्य रू॒पमृ॑ष॒भो बला॑य॒ कर्णा॑भ्या॒ꣳ श्रोत्र॑म॒मृत॒ङ्ग्रहा॑भ्याम् ।
यवा॒ न ब॒र्हिर्भ्रु॒वि केस॑राणि क॒र्कन्धु॑ जज्ञे॒ मधु॑ सार॒घम्मुखा॑त् ॥९१॥
आ॒त्मन्नु॒पस्थे॒ न वृक॑स्य॒ लोम॒ मुखे॒ श्मश्रू॑णि॒ न व्या॑घ्रलो॒म ।
केशा॒ न शी॒र्षन्यश॑से श्रि॒यै शिखा॑ सि॒ꣳहस्य॒ लोम॒ त्विषि॑रिन्द्रि॒याणि॑ ॥९२॥
अङ्गा॑न्यात्मन्भि॒षजा॒ तद॒श्विना॒त्मान॒मङ्गैः॒ सम॑धा॒त्सर॑स्वती ।
इन्द्र॑स्य रू॒पꣳ श॒तमा॑न॒मायु॑श्च॒न्द्रेण॒ ज्योति॑र॒मृत॒न्दधा॑नाः ॥९३॥
सर॑स्वती॒ योन्यां॒ गर्भ॑म॒न्तर॒श्विभ्या॒म्पत्नी॒ सुकृ॑त॒म्बिभ॑र्त्ति ।
अ॒पाꣳ रसे॑न॒ वरु॑णो॒ न साम्नेन्द्र॒ꣳ श्रि॒यै ज॒नय॑न्न॒प्सु राजा॑ ॥९४॥
तेजः॑ पशू॒नाꣳ ह॒विरि॑न्द्रि॒याव॑त्परि॒स्रुता॒ पय॑सा सार॒घम्मधु॑ ।
अ॒श्विभ्या॑न्दु॒ग्धम्भि॒षजा॒ सर॑स्वत्या सु॒तासु॒ताभ्या॑म॒मृतः॒ सोम॒ऽइन्दुः॑ ॥९५॥

इत्येकोनविंशोऽध्यायः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ विंशोऽध्यायः

ऋषिः—प्रजापतिः १, २, ४—२०, २२, २३, २७, २८, ३१, ३४, ३५ । अश्विनौ ३ । प्रस्कण्वः २१ । आश्वतराश्विः २४—२६ । विश्वामित्रः २६, ५३ । नृमेधपुरुषमेधौ ३० । कौण्डिन्यः ३२ । काक्षीवत्सुकीर्तिः ३३ । आङ्गिरसः ३६—४६ । वामदेवः ४७—४९ । गर्गः ५०—५२ । वसिष्ठः ५४ । विदर्भिः ५५—८० । गृत्समदः ८१—८३ । मधुच्छन्दाः ८४—९० ॥

देवताः—सभेशः १—३, ९, १० । सभापतिः ४—६, ८ । राजा ७ । उपदेशकाः ११ । विश्वेदेवाः १२ । अध्यापकोपदेशकौ १३ । अग्निः १४, २२, २४—२६, ७८, ७९ । वायुः १५ । सूर्यः १६, २१ । लिङ्गोक्ताः १७, ३४, ३५ । वरुणः १८ । आपः १९, २० । समिद् २३ । सोमः २७, ३२ । इन्द्रः २८—३१, ३६, ३८—४०, ४७—५४, ८७—८९ । परमात्मा ३२ । तनूनपात् ३७ । उषासानक्ता ४१ । दैव्याध्यापकोपदेशकौ ४२ । तिस्रो देव्यः ४३ । त्वष्टा ४४ । वनस्पतिः ४५ । स्वाहाकृतयः ४६ । अश्विसरस्वतीन्द्राः ५५—६९, ७३—७७, ८०, ९० । इन्द्रसवितृवरुणाः ७०—७२ । अश्विनौ ८१—८३ । सरस्वती ८४—८६ ॥

छन्दः—द्विपदाविराड्गायत्री १ । भुरिगुष्णिक् २, २८ । निचृदतिधृतिः ३ । निचृदार्षीगायत्री ४ । अनुष्टुप् ५, ६, १३, २५, ३४, ५५, ५७ ५९—६२, ६४, ६५, ६८, ७०—७२, ७५ । निचृद्गायत्री ७, ८३, ८५, ८७, । निचृदनुष्टप् ८, १४—१६, २४, २६, ५८, ६६, ६९, ७३, ७४, ९० । निचृज्जगती ९ । स्वराट्शक्वरी १० । पङ्क्तिः ११, २२, ३२, ४९ । निचृत्प्रकृतिः १२ । भुरिक्त्रिष्टुप् १७, ४० । भुरिगत्यष्टिः १८ । निचृदतिजगती १९ । भुरिगनुष्टुप् २०, ६७ । विराडनुष्टुप् २१, २७, ५६. ६३, ७६, ८० । स्वराडतिशक्वरी २३ । गायत्री २९, ३१, ८४, ८६, ८८, ८९ । बृहती ३० । विराट्त्रिष्टुप् ३३, ५० । निचृदुपरिष्टाद्बृहती ३५ । त्रिष्टुप् ३६—३८, ४१—४३, ४५, ४६ । निचृत्त्रिष्टुप् ३९, ४४, ४८ । भुरिक्पङ्क्तिः ४७, ५१, ५२; ५४, ७७, ७९ । निचृद्बृहती ५३ । जगती ७८ । प्राच्युष्णिक् ८१ । विराड्गायत्री ८२ ॥

स्वरः—षड्जः १, ३, ४, ७, २९, ३१, ८२—८९ । ऋषभः २, २८, ८१ । गान्धारः ५, ६, ८, १३—१६, १८, २०, २१, २४—२७, ३४, ५५—७६, ८०, ९० । निषादः ९, १९, ७८ । धैवतः १०, १२, १७, ३३, ३६—४६, ४८, ५० । पञ्चमः ११, २२, २३, ३२, ४७, ४९, ५१, ५२, ५४, ७७, ७९ । मध्यमः ३०, ३५, ५३ ।

॥१॥ क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि ।
मा त्वा हिꣳसीन्मा मा हिꣳसीः ॥१॥

निषसाद धृतव्रतो वरुणः पस्त्यास्वा ।
साम्राज्याय सुक्रतुः । मृत्योः पाहि विद्योत्पाहि ॥२॥
देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥३॥
कोऽसि कतमोऽसि कस्मै त्वा काय त्वा । सुश्लोक सुमङ्गल सत्यराजन् ॥४॥
शिरो मे श्रीर्यशो मुखन्त्विषिः केशाश्च श्मश्रूणि ।
राजा मे प्राणोऽअमृतꣳ सम्राट्चक्षुर्विराट्श्रोत्रम् ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड्भामः ।
मोदाः प्रमोदाऽअङ्गुलीरङ्गानि मित्रं मे सहः ॥६॥
बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म्म वीर्य्यम् । आत्मा क्षत्रमुरो मम ॥७॥
पृष्टीर्मे राष्ट्रमुदरमꣳसौ ग्रीवाश्च श्रोणी ।
ऊरूऽअरत्नी जानुनी विशो मेऽङ्गानि सर्वतः ॥८॥
नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् ।
आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः ।
जङ्घाभ्यां पद्भ्यां धर्म्मोऽस्मि विशि राजा प्रतिष्ठितः ॥९॥
प्रति क्षत्रे प्रतितिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रतितिष्ठामि गोषु ।
प्रत्यङ्गेषु प्रतितिष्ठाम्यात्मन्प्रति प्राणेषु प्रतितिष्ठामि पुष्टे प्रति द्यावा-
पृथिव्योः प्रतितिष्ठामि यज्ञे ॥१०॥
त्रया देवाऽएकादश त्रयस्त्रिꣳशाः सुराधसः ।
बृहस्पतिपुरोहिता देवस्य सवितुः सवे । देवा देवैरवन्तु मा ॥११॥
प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्य-
जूꣳषि सामभिः सामान्यृग्भिर्ऋचः पुरोनुवाक्याभिः पुरोनुवाक्या याज्याभि-
र्याज्या वषट्कारैर्वषट्काराऽआहुतिभिराहुतयो मे कामान्त्समर्द्धयन्तु भूः स्वाहा ॥१२॥
लोमानि प्रयतिर्मम त्वङ्मऽआनतिरागतिः ।
माꣳसं मऽउपनतिर्वस्वस्थि मज्जा मऽआनतिः ॥१३॥
॥२॥ यद्देवा देवहेडनं देवासश्चकृमा वयम् ।
अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥१४॥
यदि दिवा यदि नक्तमेनाꣳसि चकृमा वयम् ।
वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥१५॥
यदि जाग्रद्यदि स्वप्नऽएनाꣳसि चकृमा वयम् ।
सूर्य्यो मा तस्मादेनसो विश्वान्मुञ्चत्वꣳहसः ॥१६॥
यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये ।
च्छूद्रे यदर्य्ये यदेनश्चकृमा वयं यदेकस्याधि धर्म्मणि तस्यावयजनमसि ॥१७॥
दापोऽअघ्न्याऽइति वरुणेति शपामहे ततो वरुण नो मुञ्च ।
अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः ।
अव देवैर्देवकृतमेनोयक्ष्यव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ॥१८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुमुद्रे ते॒ हृदयमुप्स्वुन्तः सन्त्वा विशन्त्वोषधीरुतापः॑ । सुमित्रिया न॒ऽआप॒ऽओष॑-
धयः सन्तु दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च व॒यन्द्विष्मः ॥१९॥
द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।
पूतम्पवित्रेणेवाज्यमापः॑ शुन्धन्तु मैनसः ॥२०॥
उद्वयन्तमसस्परि स्वः॑ पश्यन्त॒ऽउत्तरम् ।
देवन्देवत्रा सूर्य्यमगन्म ज्योतिरुत्तमम् ॥२१॥
अपोऽअद्यान्वचारिषꣳ रसेन समसृक्ष्महि ।
पयस्वानग्न॒ऽआगमन्तम्मा सꣳसृज वर्चसा प्रजया च धनेन च ॥२२॥
एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ।
समाववर्त्ति पृथिवी समुषाः समु सूर्य्यः॑ । समु विश्वमिदञ्जगत् ।
वैश्वानरज्योतिर्भूयासँ विभून्कामान्व्यश्नवै भूः स्वाहा ॥२३॥

॥३॥ अभ्यादधामि समिधमग्ने व्रतपते त्वयि ।
व्रतञ्च श्रद्धाञ्चोपैमीन्धे त्वा दीक्षितोऽअहम् ॥२४॥
यत्र ब्रह्म च क्षत्रञ्च सम्यञ्चौ चरतः सह ।
तँल्लोकम्पुण्यम्प्रज्ञेषँय्यत्र देवाः सहाग्निना ॥२५॥
यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरतः सह ।
तँल्लोकम्पुण्यम्प्रज्ञेषँय्यत्र सेदिर्न विद्यते ॥२६॥
अꣳशुना तेऽअꣳशुः पृच्यताम्परुषा परुः॑ ।
गन्धस्ते सोममवतु मदाय रसोऽअच्युतः ॥२७॥
सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च ।
सुरायै बभ्र्वै मदे किन्त्वो वदति किन्त्वः ॥२८॥
धानावन्तङ्करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुषस्व नः ॥२९॥
बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।
येन ज्योतिरजनयन्नृतावृधो देवन्देवाय जागृवि ॥३०॥
अध्वर्य्योऽअद्रिभिः सुतꣳ सोमम्पवित्र॒ऽआनय । पुनाहीन्द्राय पातवे ॥३१॥

॥४॥ यो भूतानामधिपतिर्य्यस्मिँल्लोकाऽअधि श्रिताः ।
यऽईशे महतो महाँस्तेन गृह्णामि त्वामहम्मयि गृह्णामि त्वामहम् ॥३२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपयामगृहीतोस्यश्श्विभ्यान्त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्म्णऽएष ते योनिर-
श्श्विभ्यान्त्वा सरस्वत्यै त्वेन्द्राय त्वा सुत्राम्म्णे ॥३३॥
प्राणपा मेऽअपानपाश्श्चक्क्षुष्प्पाः श्श्रोत्रपाश्श्च मे ।
वाचो मे विश्श्वभेषजो मनसोसि विलायकः ॥३४॥
अश्श्विनकृतस्य ते सरस्वतिकृतस्येन्द्रेण सुत्राम्म्णा कृतस्य ।
उपहूतऽउपहूतस्य भक्क्षयामि ॥३५॥

॥५॥ समिद्धऽइन्द्रऽउषसामनीके पुरोरुचा पूर्व्वकृद्वावृधानः ।
त्रिभिर्द्देवैस्त्रिꣳशता वज्ज्रबाहुर्ज्जघान वृत्रँवि दुरो ववार ॥३६॥
नराशꣳसः प्प्रति शूरो मिमानस्तनूनपात्प्रति यज्ज्ञस्य धाम ।
गोभिर्व्वपावान्मधुना समञ्जन्हिरण्यैश्श्चन्द्री यजति प्रचेताः ॥३७॥
ईडितो देवैर्हरिवाँ२ऽअभिष्टिराजुह्वानो हविषा शर्द्धमानः ।
पुरन्दरो गोत्रभिद्वज्ज्रबाहुरायातु यज्ज्ञमुप नो जुषाणः ॥३८॥
जुषाणो बर्हिर्हरिवान्नऽइन्द्रः प्राचीनꣳ सीदत्प्रदिशा पृथिव्याः ।
उरुप्रथाः प्प्रथमानꣳ स्योनमादित्यैरक्क्तँवसुभिः सजोषाः ॥३९॥
इन्द्रन्दुरः कवष्ष्यो धावमाना वृषाणँय्यन्तु जनयः सुपत्क्नीः ।
द्वारो देवीरभितो विश्श्रयन्ताꣳ सुवीरा वीरम्प्रथमाना महोभिः ॥४०॥
उषासानक्क्ता बृहती बृहन्तम्पयस्वती सुदुघे शूरमिन्द्रम् ।
तन्तुन्ततम्पेशसा सँव्वयन्ती देवानान्देवँय्यजतः सुरुक्क्मे ॥४१॥
दैव्या मिमाना मनुषः पुरुत्रा होताराविन्द्रम्प्रथमा सुवाचा ।
मूर्द्धन्यज्ज्ञस्य मधुना दधाना प्राचीनञ्ज्योतिर्हविषा वृधातः ॥४२॥
तिस्रो देवीर्हविषा वर्द्धमानाऽइन्द्रञ्जुषाणा जनयो न पत्क्नीः ।
अच्छिन्नन्तन्तुम्पयसा सरस्वतीडा देवी भारती विश्श्वतूर्त्तिः ॥४३॥
त्वष्टा दधच्छुष्ष्ममिन्द्राय वृष्ष्णेपाकोचिष्टुर्य्यशसे पुरूणि ।
वृषा यजन्वृषणम्भूरिरेता मूर्द्धन्यज्ज्ञस्य समनक्तु देवान् ॥४४॥
वनस्प्पतिरवसृष्टो न पाशैस्त्मन्या समञ्जञ्छमिता न देवः ।
इन्द्रस्य हव्यैर्ज्जठरम्पृणानः स्वदाति यज्ज्ञम्मधुना घृतेन ॥४५॥
स्तोकानामिन्दुम्प्रति शूरऽइन्द्रो वृषायमाणो वृषभस्तुराषाट् ।
घृतप्प्रुषा मनसा मोदमानाः स्वाहा देवाऽअमृता मादयन्ताम् ॥४६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥६॥ आयात्त्विन्द्रोवसऽउप नऽइह स्तुतः सधमादस्तु शूरः ।
वावृधानस्तविषीर्य्यस्य पूर्वीर्द्यौर्न्न क्षत्रमभिभूति पुष्यात् ॥४७॥
आ नऽइन्द्रो दूरादा नऽआसादभिष्टिकृदवसे यासदुग्रः ।
ओजिष्ठेभिर्नृपतिर्वज्रबाहुः सङ्गे समत्सु तुर्वणिः पृतन्यून् ॥४८॥
आ नऽइन्द्रो हरिभिर्य्यात्वच्छार्वाचीनोवसे राधसे च ।
तिष्ठाति वज्री मघवा विरप्शीमँय्यज्ञमनु नो वाजसातौ ॥४९॥
त्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवे सुहवꣳ शूरमिन्द्रम् ।
ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥५०॥
इन्द्रः सुत्रामा स्ववाँ॥ऽअवोभिः सुमृडीको भवतु विश्ववेदाः ।
बाधतान्द्वेषोऽअभयङ्कृणोतु सुवीर्य्यस्य पतयः स्याम ॥५१॥
तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम ।
स सुत्रामा स्ववाँ॥ऽइन्द्रोऽअस्मेऽआराच्चिद्द्वेषः सनुतर्य्युयोतु ॥५२॥
आ मन्द्रैरिन्द्र हरिभिर्य्याहि मयूररोमभिः ।
मा त्वा केचिन्नियमन्विन्न पाशिनोति धन्वेव ताँ॥ऽइहि ॥५३॥
एवेदिन्द्रँवृषणँवज्रबाहुँवसिष्ठासोऽअभ्यर्चन्त्यर्कैः ।
स न स्तुतो वीरवद्धातु गोमद्यूयम्पात स्वस्तिभिः सदा नः ॥५४॥

॥७॥ समिद्धोऽअग्निरश्विना तप्तो घर्म्मो विराट्सुतः ।
दुहे धेनुः सरस्वती सोमꣳ शुक्रमिहेन्द्रियम् ॥५५॥
तनूपा भिषजा सुतेश्विनोभा सरस्वती ।
मध्वा रजाꣳसीन्द्रियमिन्द्राय पथिभिर्वहान् ॥५६॥
इन्द्रायेन्दुꣳ सरस्वती नराशꣳसेन नग्नहुम् ।
अधातामश्विना मधु भेषजम्भिषजा सुते ॥५७॥
आजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्य्यम् ।
इडाभिरश्विनाविषꣳ समूर्जꣳ सꣳ रयिन्दधुः ॥५८॥
अश्विना नमुचेः सुतꣳ सोमꣳ शुक्रम्परिस्रुता ।
सरस्वती तमाभरद्बर्हिषेन्द्राय पातवे ॥५९॥
कवष्यो न व्यचस्वतीरश्विभ्यान्न दुरो दिशः ।
इन्द्रो न रोदसीऽउभे दुहे कामान्त्सरस्वती ॥६०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उषासानक्तमश्विना दिवेन्द्रꣳ सायमिन्द्रियैः ।
सञ्जानाने सुपेशसा समञ्जाते सरस्वत्या ॥६१॥
पातन्नोऽअश्विना दिवा पाहि नक्तꣳ सरस्वति ।
दैव्या होतारा भिषजा पातमिन्द्रꣳ सचा सुते ॥६२॥
तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा ।
तीव्रम्परिस्रुता सोममिन्द्राय सुषुवुर्म्मदम् ॥६३॥
अश्विना भेषजम्मधु भेषजन्नः सरस्वती ।
इन्द्रे त्वष्टा यशः श्रियꣳ रूपꣳरूपमधुः सुते ॥६४॥
ऋतुथेन्द्रो वनस्पतिः शशमानः परिस्रुता ।
कीलालमश्विभ्याम्मधु दुहे धेनुः सरस्वती ॥६५॥
गोभिर्न्न सोममश्विना मासरेण परिस्रुता ।
समधातꣳ सरस्वत्या स्वाहेन्द्रे सुतम्मधु ॥६६॥

॥८॥ अश्विना हविरिन्द्रियन्नमुचेर्द्धिया सरस्वती ।
आ शुक्रमासुराद्वसु मघमिन्द्राय जभ्रिरे ॥६७॥
यमश्विना सरस्वती हविषेन्द्रमवर्द्धयन् ।
स बिभेद वलम्मघन्नमुचावासुरे सचा ॥६८॥
तमिन्द्रम्पशवः सचाश्विनोभा सरस्वती ।
दधानाऽअभ्यनूषत हविषा यज्ञऽइन्द्रियैः ॥६९॥
यऽइन्द्रऽइन्द्रियन्दधुः सविता वरुणो भगः ।
स सुत्रामा हविष्पतिर्य्यजमानाय सश्चत ॥७०॥
सविता वरुणो दधद्यजमानाय दाशुषे ।
आदत्त नमुचेर्वसु सुत्रामा बलमिन्द्रियम् ॥७१॥
वरुणः क्षत्रमिन्द्रियम्भगेन सविता श्रियम् ।
सुत्रामा यशसा बलन्दधाना यज्ञमाशत ॥७२॥
अश्विना गोभिरिन्द्रियमश्वेभिर्व्वीर्य्यम्बलम् ।
हविषेन्द्रꣳ सरस्वती यजमानमवर्द्धयन् ॥७३॥
ता नासत्या सुपेशसा हिरण्यवर्त्तनी नरा ।
सरस्वती हविष्मतीन्द्र कर्म्मसु नोवत ॥७४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ता भिषजा सुकर्म्मणा सा सुदुघा सरस्वती ।
स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियम् ॥७५॥
युवꣳ सुराममश्विना नमुचावासुरे सचा । विपिपानाः सरस्वतीन्द्रङ्कर्म्मस्वावत ॥७६॥
पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दꣳसनाभिः ।
यत्सुरामँव्यपिबः शचीभिः सरस्वती त्त्वा मघवन्नभिष्णक् ॥७७॥
यस्मिन्नश्श्वासऽऋषभासऽउक्षणो वशा मेषाऽअवसृष्टासऽआहुताः ।
कीलालपे सोमपृष्ठाय वेधसे हृदा मतिञ्जनय चारुमग्नये ॥७८॥
अहाव्यग्ने हविरास्ये ते स्रुचीव घृतञ्चम्वीव सोमः ।
वाजसनिꣳ रयिमस्मे सुवीरम्प्रशस्तन्धेहि यशसम्बृहन्तम् ॥७९॥

॥९॥ अश्विना तेजसा चक्षुः प्प्राणेन सरस्वती वीर्य्यम् ।
वाचेन्द्रो बलेनेन्द्राय दधुरिन्द्रियम् ॥८०॥
गोमदू षु णासत्त्याश्वावद्यातमश्विना । वर्त्ती रुद्रा नृपाय्यम् ॥८१॥
न यत्परो नान्तरऽआदधर्षद्वृषण्वसू । दुःशꣳसो मर्त्त्यो रिपुः ॥८२॥
ता नऽआवोढमश्विना रयिम्पिशङ्गसन्दृशम् । धिष्ण्या वरिवोविदम् ॥८३॥
पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञँवष्टु धियावसुः ॥८४॥
चोदयित्री सूनृतानाञ्चेतन्ती सुमतीनाम् । यज्ञन्दधे सरस्वती ॥८५॥
महोऽअर्णः सरस्वती प्प्रचेतयति केतुना । धियो विश्वा विराजति ॥८६॥
इन्द्रायाहि चित्रभानो सुताऽइमे त्वायवः । अण्वीभिस्तना पूतासः ॥८७॥
इन्द्रायाहि धियेषितो विप्प्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥८८॥
इन्द्रायाहि तूतुजानऽउप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥८९॥
अश्विना पिबताम्मधु सरस्वत्त्या सजोषसा ।
इन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्म्यम्मधु ॥९०॥

इति विंशोऽध्यायः

समाप्ता चेयं पूर्वविंशतिः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ अथोत्तरविंशतिः ॥

अथैकविंशोऽध्यायः

ऋषिः—शुनःशेपः १, २ । वामदेवः ३—५ । गयस्फानः ६ । गयःप्लातः ७ । विश्वामित्रः ८ । वसिष्ठः ९ । आत्रेयः १०, ११, २७ । स्वस्त्यात्रेयः १२—२६, २८—६१ ।

देवता—वरुणः १, २ । अग्निवरुणौ ३, ४ । आदित्याः ५ । अदितिः ६ । स्वर्ग्या नौः ७ । मित्रावरुणौ ८ । अग्निः ९, १२ । ऋत्विजः १० । विद्वांसः ११, १३—१६, २२, २७, ४१, ४४ । विश्वेदेवाः १७—२१, २४, २६, २८ । रुद्राः २३ । इन्द्रः २५ । अग्न्यश्वीन्द्रसरस्वत्याद्या लिङ्गोक्ताः २९ । अश्व्यादयो लिङ्गोक्ताः ३० । अश्व्यादयः ३१, ३६—४०, ४६, ४७, ४९—५८ । सरस्वत्यादयः ३२, ४८ होत्रादयः ४२, ४३ । यजमानर्त्विजः ४५ । अग्न्यादयः ५९ । लिङ्गोक्ताः ६०, ६१ ॥

छन्दः—निचृद्गायत्री १, ८ । निचृत्त्रिष्टुप् २, ११ । स्वराट्पङ्क्तिः ३, ४ । त्रिष्टुप् ५ । भुरिक्त्रिष्टुप् ६ । यवमध्यागायत्री ७ । त्रिष्टुप् ९, ४८, ५०, ५१, ५४ । भुरिक्पङ्क्तिः १० । विराडनुष्टुप् १२, १४ । अनुष्टुप् १३, १६, १९—२२, २४, २५ । निचृदनुष्टुप् १५, १७, १८ । भुरिगनुष्टुप् २३, २७, २८ । विराड्बृहती २६ । निचृदष्टिः २९, ३३, ३६ । भुरिगत्यष्टिः ३० । अतिधृतिः ३१, ४१ । विराडतिधृतिः ३२ । निचृदतिधृतिः ३४ । भुरिगष्टिः ३५ । धृतिः ३७, ६० । भुरिक्कृतिः ३८ । निचृदत्यष्टिः ३९, ५६ । विराडत्यष्टिः[क], अत्यष्टिः[र] ४० । आर्च्युष्णिक्[क], विराडाकृतिः[र], ४२ । याजुषीपङ्क्तिः[क], उत्कृतिः[र] ४३ । याजुषीत्रिष्टुप्[क], स्वराडुत्कृतिः[र] ४४ । भुरिक्प्राजापत्योष्णिक्[क], भुरिगभिकृतिः[र] ४५ । उत्कृतिः[क], स्वराट्संकृतिः[र] ४६ । भुरिगाकृतिः[क],[र]४७ । ब्राह्म्युष्णिक् ४९ । अतिजगती ५२ । भुरिगतिजगती ५३ । स्वराट्शक्वरी ५५ । अतिशक्वरी ५७ । अत्यष्टिः[क], निचृत्त्रिष्टुप्[र] ५८ । अष्टिः ५९ । भुरिग्विकृतिः ६१ ॥

स्वरः—षड्जः १, ७, ८, ३१, ३२, ३४, ३५, ४१, ४३[र], ४४[र] ४६[क] । धैवतः २, ५, ६, ९, ११, ४४[क], ४८, ५०, ५१, ५४, ५५, ५८[र] । पञ्चमः ३, ४, १०, ४२[र], ४३[क], ४७, ५७ । गान्धारः १२—२५, २७, २८, ३०, ३९, ४०, ४६[र], ५६, ५८[क] । मध्यमः २६, २९, ३३, ३५, ३६, ५९, ६१ । ऋषभः ३७, ४२[क], ४५, ४९, ५६, ६० । निषादः ३८, ५२, ५३ ॥

॥१॥ इमम्मे॑ वरुण श्श्रुधी हव॑मुद्या च॑ मृडय । त्वाम॑वस्युरार्च॑के ॥१॥
तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ वन्द॑मानु॒स्तदाशा॑स्ते॒ यज॑मानो ह॒विर्भि॒ः ।
अहे॑डमानो वरुणे॒ह बो॒ध्युरु॑श॒ꣳस॒ मा न॒ऽआयु॒ः प्रमो॑षीः ॥२॥
त्वन्नो॑ऽअग्ने॒ वरु॑णस्य वि॒द्वान्दे॒वस्य॒ हेडो॒ऽअव॑यासिसीष्ठाः ।
यजि॑ष्ठो॒ वह्नि॑तमः॒ शोशु॑चानो॒ विश्वा॒ द्वेषा॑ꣳसि॒ प्रमु॑मुग्ध्यु॒स्मत् ॥३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स त्वन्नोऽअग्ग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ।
अवयक्क्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो नऽएधि ॥४॥
महीमू षु मातरꣳ सुव्रतानामृतस्य पत्नीमवसे हुवेम ।
तुविक्षत्रामजरन्तीमुरूचीꣳ सुशर्म्माणमदितिꣳ सुप्प्रणीतिम् ॥५॥
सुत्रामाणम्पृथिवीन्द्यामनेहसꣳ सुशर्म्माणमदितिꣳ सुप्प्रणीतिम् ।
दैवीन्नावꣳ स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥६॥
सुनावमारुहेयमस्रवन्तीमनागसम् । शतारित्राꣳ स्वस्तये ॥७॥
आ नो मित्रावरुणा घृतैर्ग्गव्यूतिमुक्षतम् । मद्ध्वा रजाꣳसि सुक्रतू ॥८॥
प्र बाहवा सिसृतञ्जीवसे नऽआ नो गव्यूतिमुक्षतङ्घृतेन ।
आ मा जने श्श्रवयतँय्युवाना श्श्रुतम्मे मित्रावरुणा हवेमा ॥९॥
शन्नो भवन्तु वाजिनो हवेषु देवताता मितद्द्रवः स्वर्क्काः ।
जम्भयन्तोहिँवृकꣳ रक्क्षाꣳसि सनेम्म्यस्म्मद्युयवन्नमीवाः ॥१०॥
वाजेवाजेवत वाजिनो नो धनेषु विप्प्राऽअमृताऽऋतज्ज्ञाः ।
अस्य मद्ध्वः पिबत मादयद्ध्वन्तृप्ता यात पथिभिर्द्देवयानैः ॥११॥
॥२॥ समिद्धोऽअग्ग्निः समिधा सुसमिद्धो वरेण्ण्यः ।
गायत्री च्छन्दऽइन्द्रियन्त्र्यविर्ग्गौर्वयो दधुः ॥१२॥
तनूनपाच्छुचिव्व्रतस्तनूपाश्च सरस्वती ।
उष्णिहा च्छन्दऽइन्द्रियन्दित्त्यवाड्गौर्वयो दधुः ॥१३॥
इडाभिरग्ग्निरीड्यः सोमो देवोऽअमर्त्त्यः ।
अनुष्टुप्प्च्छन्दऽइन्द्रियम्पञ्चाविर्ग्गौर्वयो दधुः ॥१४॥
सुबर्हिरग्ग्निः पूषण्ण्वान्त्स्तीर्ण्णबर्हिरमर्त्त्यः ।
बृहती च्छन्दऽइन्द्रियन्त्रिवत्सो गौर्वयो दधुः ॥१५॥
दुरो देवीर्द्दिशो महीर्ब्रह्मा देवो बृहस्पतिः ।
पङ्क्तिश्च्छन्दऽइहेन्द्रियन्तुर्य्यवाड्गौर्वयो दधुः ॥१६॥
उषे यह्वी सुपेशसा विश्श्वे देवाऽअमर्त्त्याः ।
त्रिष्टुप्प्च्छन्दऽइहेन्द्रियम्पष्ठवाड्गौर्वयो दधुः ॥१७॥
दैव्या होतारा भिषजेन्द्रेण सयुजा युजा ।
जगती च्छन्दऽइन्द्रियमनड्वान्गौर्वयो दधुः ॥१८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तिस्रऽइडा सरस्वती भारती मरुतो विशः।
विराट्छन्दऽइहेन्द्रियन्धेनुर्गौर्न्न वयो दधुः ॥१९॥
त्वष्टा तुरीपोऽअद्भुतऽइन्द्राग्नी पुष्टिवर्द्धना।
द्विपदा च्छन्दऽइन्द्रियमुक्षा गौर्न्न वयो दधुः ॥२०॥
शमिता नो वनस्पतिः सविता प्रसुवन्भगम्।
ककुप्छन्दऽइहेन्द्रियँवशा वेहद्वयो दधुः ॥२१॥
स्वाहा यज्ञँवरुणः सुक्षत्रो भेषजङ्करत्।
अतिच्छन्दाऽइन्द्रियम्बृहदृषभो गौर्व्वयो दधुः ॥२२॥

॥३॥ वसन्तेनऽऋतुना देवा वसवस्त्रिवृता स्तुताः।
रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥२३॥
ग्रीष्मेणऽऋतुना देवा रुद्राः पञ्चदशे स्तुताः।
बृहता यशसा बलꣳ हविरिन्द्रे वयो दधुः ॥२४॥
वर्षाभिर्ऋतुनादित्या स्तोमे सप्तदशे स्तुताः।
वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥२५॥
शारदेनऽऋतुना देवाऽएकविꣳशऽऋभवं स्तुताः।
वैराजेन श्रिया श्रियꣳ हविरिन्द्रे वयो दधुः ॥२६॥
हेमन्तेनऽऋतुना देवास्त्रिणवे मरुत स्तुताः।
बलेन शक्वरीः सहो हविरिन्द्रे वयो दधुः ॥२७॥
शैशिरेणऽऋतुना देवास्त्रयस्त्रिꣳशेमृता स्तुताः।
सत्येन रेवतीः क्षत्रꣳ हविरिन्द्रे वयो दधुः ॥२८॥

॥४॥ होता यक्षत्समिधाग्निमिडस्पदेश्विनेन्द्रꣳ सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजम्मधु शष्पैर्न्न तेजऽइन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥२९॥
होता यक्षत्तनूनपात्सरस्वतीमविर्म्मेषो न भेषजम्पथा मधुमता भरन्नश्विनेन्द्राय वीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिः पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

होता यक्षन्नराशꣳसन्न नग्नहुम्पतिꣳ सुरया भेषजम्मेषः सरस्वती भिषग्ग्रथो न चन्द्रयश्विनोर्वपाऽइन्द्रस्य वीर्य्यम्बदरैरुपवाकाभिर्भेषजन्तोक्मभिः पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३१॥

होता यक्षदिडेडितऽआजुह्वानः सरस्वतीमिन्द्रम्बलेन वर्द्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजँय्यवैः कर्कन्धुभिर्म्मधु लाजैर्न्न मासरम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३२॥

होता यक्षद्बर्हिरूर्णम्म्रदा भिषङ्नासत्या भिषजाश्विनाश्वा शिशुमती भिषग्धेनुः सरस्वती भिषग्दुहऽइन्द्राय भेषजम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३३॥

होता यक्षद्दुरो दिशः कवष्यो न व्यचस्वतीरश्विभ्यान्न दुरो दिशऽइन्द्रो न रोदसी दुघे दुहे धेनुः सरस्वत्यश्विनेन्द्राय भेषजꣳ शुक्रन्न ज्योतिरिन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३४॥

होता यक्षत्सुपेशसोषे नक्तन्दिवाश्विना समञ्जाते सरस्वत्या त्विषिमिन्द्रे न भेषजꣳ श्येनो न रजसा हृदा श्रिया न मासरम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३५॥

होता यक्षद्दैव्या होतारा भिषजाश्विनेन्द्रन्न जागृवि दिवा नक्तन्न भेषजैः शूषꣳ सरस्वती भिषक्सीसेन दुहऽइन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३६॥

होता यक्षत्तिस्रो देवीर्न्न भेषजन्त्रयस्त्रिधातवोपसो रूपमिन्द्रे हिरण्ययमश्विनेडा न भारती वाचा सरस्वती महऽइन्द्राय दुहऽइन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३७॥

होता यक्षत्सुरेतसमृषभन्नर्य्यापसन्त्वष्टारमिन्द्रमश्विना भिषजन्न सरस्वतीमोजो न जूतिरिन्द्रियँवृको न रभसो भिषग्यशः सुरया भेषजꣳ श्रिया न मासरम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३८॥

होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुम्भीमन्न मन्युꣳ राजानँव्याघ्रन्नमसाश्विना भामꣳ सरस्वती भिषगिन्द्राय दुहऽइन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज ॥३९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

होता यक्षदग्निꣳ स्वाहाज्यस्य स्तोकानाꣳ स्वाहा मेदसाम्पृथक्स्वाहा च्छाग-मश्विभ्याꣳ स्वाहा मेषꣳ सरस्वत्यै स्वाहऽऋषभमिन्द्राय सिꣳहाय सहसऽइन्द्रि-यꣳ स्वाहाग्निन्न भेषजꣳ स्वाहा सोममिन्द्रियꣳ स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारँ-वरुणम्भिषजाम्पतिꣳ स्वाहा वनस्पतिम्प्रियम्पाथो न भेषजꣳ स्वाहा देवाऽआ-ज्यपा जुषाणोऽअग्निर्भेषजम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होत-र्य्यज ॥४०॥

॥५॥ होता यक्षदश्विनौ च्छागस्य वपाया मेदसो जुषेताꣳ हविर्होतर्य्यज । होता यक्ष-त्सरस्वतीम्मेषस्य वपाया मेदसो जुषताꣳ हविर्होतर्य्यज । होता यक्षदिन्द्रमृषभस्य वपाया मेदसो जुषताꣳ हविर्होतर्य्यज ॥४१॥

होता यक्षदश्विनौ सरस्वतीमिन्द्रꣳ सुत्रामाणमिमे सोमाः सुरामाणश्च्छागैर्न मेषै-र्ऋषभैः सुताः शष्पैर्न तोक्मभिर्लाजैर्म्महस्वन्तो मदा मासरेण परिष्कृताः शुक्राः पयस्वन्तोऽमृताः प्रस्थिता वो मधुश्चुतस्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सोम्यम्मधु पिबन्तु मदन्तु व्यन्तु होतर्य्यज ॥४२॥

होता यक्षदश्विनौ च्छागस्य हविषऽआत्तामद्य मद्ध्यतो मेदऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तान्नूनङ्घासेऽअज्राणाँय्यवसप्प्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामतऽउ-त्सादतोङ्गादङ्गादवत्तानाङ्करतऽएवाश्विना जुषेताꣳ हविर्होतर्य्यज ॥४३॥

होता यक्षत्सरस्वतीम्मेषस्य हविषऽआवयदद्य मद्ध्यतो मेदऽउद्भृतम्पुरा द्वेषो-भ्यः पुरा पौरुषेय्या गृभो घसन्नूनङ्घासेऽअज्राणाँय्यवसप्प्रथमानाꣳ सुमत्क्ष-राणाꣳ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शिता-मतऽउत्सादतोङ्गादङ्गादवत्तानाङ्करदेवꣳ सरस्वती जुषताꣳ हविर्होतर्य्यज ॥४४॥

होता यक्षदिन्द्रमृषभस्य हविषऽआवयदद्य मद्ध्यतो मेदऽउद्भृतम्पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घसन्नूनङ्घासेऽअज्राणाँय्यवसप्प्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामतऽउ-त्सादतोङ्गादङ्गादवत्तानाङ्करदेवमिन्द्रो जुषताꣳ हविर्होतर्य्यज ॥४५॥

होता यक्षद्वनस्पतिमभि हि पिष्टतमया रभिष्ठया रशनयाधित । यत्राश्विनो-श्च्छागस्य हविषः प्रिया धामानि यत्र सरस्वत्या मेषस्य हविषः प्रिया धामानि यत्रेन्द्रस्यऽऋषभस्य हविषः प्रिया धामानि यत्राग्नेः प्रिया धामानि यत्र सोमस्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्प्रिया धामा॑नि॒ यत्रेन्द्र॑स्य सु॒त्राम्म्ण॑÷ प्प्रि॒या धामा॑नि॒ यत्र॑ सवि॒तुः प्प्रि॒या धामा॑नि॒ यत्र॒ वरु॑णस्य प्प्रि॒या धामा॑नि॒ यत्र॒ वन॒स्प्पतेः॑ प्प्रि॒या पाथा॑ᳩसि॒ यत्र॑ दे॒वाना॑मा-ज्ज्यपाना॑म्प्प्रि॒या धामा॑नि॒ यत्रा॒ग्ग्नेर्होतु॑÷ प्प्रि॒या धामा॑नि॒ तत्रै॒तान्प्प्रस्तुत्त्ये॑वोपस्तुत्त्ये॑-वोपाव॑स्स्रक्क्षद्र॒भीय॑सऽइव कृ॒त्त्वी कर॑द्दे॒वन्दे॒वो वन॒स्प्पति॑र्जु॒षता॑ᳩ ह॒विर्होत॒-र्य्यज॑ ॥४६॥

होता॑ यक्क्षद॒ग्ग्निᳩ स्वि॑ष्ट॒कृत॒मया॑ड॒ग्ग्निर॒श्श्विनो॒श्च्छाग॑स्य ह॒विषः॑÷ प्प्रि॒या धामा॒-न्न्यया॒ट्सर॑स्वत्त्या मे॒षस्य॑ ह॒विषः॑÷ प्प्रि॒या धामा॒न्न्यया॒डिन्द्र॑स्यऽऋष॒भस्य॑ ह॒विषः॑÷ प्प्रि॒या धामा॒न्न्यया॑ड॒ग्ग्नेः प्प्रि॒या धामा॒न्न्यया॒ट्सोम॑स्य प्प्रि॒या धामा॒न्न्यया॒डिन्द्र॑स्य सु॒त्राम्म्ण॑÷ प्प्रि॒या धामा॒न्न्यया॑ट्सवि॒तुः प्प्रि॒या धामा॒न्न्यया॒ड्वरु॑णस्य प्प्रि॒या धामा॒-न्न्यया॒ड्वन॒स्प्पतेः॑ प्प्रि॒या पाथा॒ᳩस्यया॑ड्दे॒वाना॑माज्ज्यपाना॑म्प्प्रि॒या धामा॑नि॒ यक्क्ष॑-द॒ग्ग्नेर्होतुः॑÷ प्प्रि॒या धामा॑नि॒ यक्क्ष॒त्स्वम्म॑हि॒मान॒माय॑जता॒मेज्ज्या॒ऽइषः॑÷ कृ॒णोतु॒ सोऽअ॑द्ध्व॒रा जा॒तवे॑दा जु॒षता॑ᳩ ह॒विर्होत॒र्य्यज॑ ॥४७॥

॥६॥ दे॒वम्ब॒र्हिः सर॑स्वती सु॒दे॒वमिन्द्रे॑ऽअ॒श्श्विना॑ ।
तेजो॒ न चक्क्षु॑र॒क्क्ष्योर्ब्ब॒र्हिषा॑ दधुरिन्द्रि॒यँव्व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥४८॥
दे॒वीर्द्वारो॑ऽअ॒श्श्विना॑ भि॒षजेन्द्रे॒ सर॑स्वती ।
प्रा॒णन्न वी॒र्य्यन्न॒सि द्वारो॑ दधुरिन्द्रि॒यँव्व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥४९॥
दे॒वीऽउ॒षासा॑व॒श्श्विना॑ सु॒त्रामेन्द्रे॒ सर॑स्वती ।
बल॒न्न वाच॑मा॒स्य॒ऽउ॒षाब्भ्या॒न्दधुरिन्द्रि॒यँव्व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥५०॥
दे॒वी जोष्ट्री॒ सर॑स्वत्त्य॒श्श्विनेन्द्र॑मवर्द्धयन् ।
श्रोत्र॒न्न कर्ण्ण॑योर्य्यशो॒ जोष्ट्री॒ब्भ्या॒न्दधुरिन्द्रि॒यँव्व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥५१॥
दे॒वीऽऊ॒र्ज्जाहु॑ती॒ दुघे॑ सु॒दुघेन्द्रे॒ सर॑स्वत्त्य॒श्श्विना॑ भि॒षजा॑वतः ।
शु॒क्रन्न ज्ज्योति॒ स्त्तन॑यो॒राहु॑ती धत्त॒ऽइन्द्रि॒यँव्व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥५२॥
दे॒वा दे॒वाना॑म्भि॒षजा॒ होता॑रा॒विन्द्र॑म॒श्श्विना॑ ।
व॒षट्का॒रैः सर॑स्वती॒ त्त्विषि॒न्न हृद॑ये म॒तिᳩ होतृ॒ब्भ्या॒न्दधुरिन्द्रि॒यँव्व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥५३॥
दे॒वीस्त्ति॒स्रस्त्ति॒स्रो दे॒वीर॒श्श्विनेडा॒ सर॑स्वती ।
शूष॒न्न मद्ध्ये॒ नाब्भ्या॒मिन्द्रा॑य दधुरिन्द्रि॒यँव्व॑सु॒वने॑ वसु॒धेय॑स्य व्यन्तु॒ यज॑ ॥५४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवऽइन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्त्याश्विब्भ्यामीयते रथः । रेतो न रूपममृतञ्जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणि वसुवने वसुधेयस्य व्यन्तु यज ॥५५॥

देवो देवैर्वनस्प्पतिर्हिरण्ण्यपर्णोऽअश्विब्भ्याꣳ सरस्वत्त्या सुपिप्पलऽइन्द्राय पच्यते मधु । ओजो न जूतिर्ऋषभो न भामं वनस्प्पतिर्नो दधदिन्द्रियाणि वसुवने वसुधेयस्य व्यन्तु यज ॥५६॥

देवम्बर्हिर्वारितीनामध्वरे स्तीर्ण्णमश्विब्भ्यामूर्ण्णम्म्रदाः सरस्वत्त्या स्योनमिन्द्र ते सदः । ईशायै मन्न्युꣳ राजानम्बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य व्यन्तु यज ॥५७॥

क देवोऽअग्निः स्विष्टकृद्देवान्यक्षद्यथायथꣳ होताराविन्द्रमश्विना वाचा वाचꣳ सरस्वतीमग्निꣳ सोमꣳ स्विष्टकृत्स्विष्टऽइन्द्रः सुत्रामा सविता वरुणो भिषगिष्टो देवो वनस्प्पतिः स्विष्टा देवाऽआज्यपाः स्विष्टोऽअग्निरग्निना होता होत्रे स्विष्टकृद्यशो न दधदिन्द्रियमूर्जमपचितिꣳ स्वधां वसुवने वसुधेयस्य व्यन्तु यज ॥५८॥

अग्निमद्य होतारमवृणीतायं यजमानः पचन्पक्तीः पचन्पुरोडाशान्बध्नन्नश्विब्भ्याञ्छागꣳ सरस्वत्त्यै मेषमिन्द्रायऽऋषभꣳ सुन्वन्नश्विब्भ्याꣳ सरस्वत्त्याऽइन्द्राय सुत्राम्म्णे सुरासोमान् ॥५९॥

सूपस्थाऽअद्य देवो वनस्प्पतिरभवदश्विब्भ्याञ्छागेन सरस्वत्त्यै मेषेणेन्द्रायऽऋषभेणाक्षँस्तान्मेदस्तः प्रति पचताग्गृभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा सुरासोमान् ॥६०॥

त्वामद्यऽऋषऽआर्षेयऽऋषीणान्नपादवृणीतायं यजमानो बहुब्भ्यऽआ सङ्गतेब्भ्यऽएष मे देवेषु वसु वार्य्यायक्ष्यतऽइति ता या देवा देव दानान्यदुस्तान्यस्माऽआ च शास्स्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूहि ॥६१॥

इत्येकविंशोऽध्यायः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ द्वाविंशोऽध्यायः

ऋषिः—प्रजापतिः १, ३—८, ११—१४, १६, १९, २०, २२—३४। यज्ञपुरुषः २ । विश्वामित्रः ९ । मेधातिथिः १० । सुतम्भरः १५ । विश्वरूपः १७ । अरुणत्रसदस्यू १८ । स्वस्त्यात्रेयः २१ ॥

देवता—सविता १, ९—१४ । विद्वांसः २ । अग्निः ३, १५—१७, १९ । विश्वेदेवाः ४ । इन्द्रादयः ५ । अग्न्यादयः ६, २७ । प्राणादयः ७, २३ । प्रयत्नवन्तो जीवादयः ८ । पवमानः १८ । प्रजापत्यादयः २० । विद्वान् २१ । लिङ्गोक्ताः २२, २९ । दिशः २४ । जलादयः २५ । वातादयः २६ । नक्षत्रादयः २८ । वस्वादयः ३० । मासाः ३१ । वाजादयः ३२ । आयुरादयः ३३ । यज्ञः ३४ ॥

छन्दः—निचृत्पङ्क्तिः १ । निचृत्त्रिष्टुप् २ । भुरिगनुष्टुप् ३ । जगती ४, २७ । अतिधृतिः ५ । भुरिगतिजगती ६ । निचृदत्यष्टिः[क] स्वराडत्यष्टिः[र] ७ । भुरिग्धृतिः[क] भुरिगतिधृतिः[र] ८, २४ । निचृद्गायत्री ९, १३, १५, १६ । गायत्री १०—१२, १७ । पिपीलिकामध्यानिचृद्गायत्री १४ । पिपीलिकामध्याविराडनुष्टुप् १८ । विकृतिः १९ । भुरिग्धृतिः[क], अतिधृतिः[र] २० । आर्ष्यनुष्टुप् २१ । स्वराडुत्कृतिः २२ । स्वराडनुष्टुप् २३ । निचृदतिधृतिः २४ । अष्टिः २५ । स्वराडभिकृतिः २६ । भुरिगष्टिः[क], [र] २८ । निचृदत्यष्टिः २९ । कृतिः ३० । भुरिगत्यष्टिः ३१ । अत्यष्टिः ३२ । भुरिक्कृतिः[क] भुरिगतिधृतिः[र] ३३ । भुरिगुष्णिक् ३४ ॥

स्वरः—पञ्चमः १ । धैवतः २ । गान्धारः ३, ७, १८, २१, २३, २९, ३१, ३२ । निषादः ४, ६, २७, ३० । षड्जः ५, ९—१७, २२, २४ । ऋषभः[क], षड्जः[र] ८ । मध्यमः १९, २५, २८ । ऋषभः[क], षड्जः[र] २० । ऋषभः २६, ३४ । निषादः[क] षड्जः[र] ३३ ॥

॥१॥ तेजोसि शुक्रममृतमायुष्पाऽआयुर्म्मे पाहि ।
देवस्य त्वा सवितुः प्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्णो हस्ताब्भ्यामाददे ॥१॥
इमामगृब्भ्णन्रशनामृतस्य पूर्व्वऽआयुषि विदथेषु कव्या ।
सा नोऽअस्मिन्त्सुतऽआबभूवऽऋतस्य सामन्त्सरमारपन्ती ॥२॥
अभिधाऽअसि भुवनमसि यन्तासि धर्त्ता ।
स त्वमग्निं वैश्वानरꣳ सप्प्रथसङ्गच्छ स्वाहाकृतः ॥३॥
स्वगा त्वा देवेब्भ्यः प्प्रजापतये ब्ब्रह्मन्नश्श्वम्भन्त्स्यामि देवेब्भ्यः प्रजापतये तेन राद्ध्यासम् । तम्बधान देवेब्भ्यः प्प्रजापतये तेन राद्धुहि ॥४॥
प्रजापतये त्वा जुष्टम्प्रोक्क्षामीन्द्राग्निब्भ्यान्त्वा जुष्टम्प्रोक्क्षामि व्वायवे त्वा जुष्टम्प्रोक्क्षामि विश्श्वेब्भ्यस्त्वा देवेब्भ्यो जुष्टम्प्रोक्क्षामि सर्व्वेब्भ्यस्त्वा देवेब्भ्यो जुष्टम्प्रोक्क्षामि । योऽअर्व्वन्तञ्जिघाꣳसति तमब्भ्यमीति व्वरुणः । पुरो मर्त्तः पुरः श्वा ॥५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥२॥ अग्नये स्वाहा सोमाय स्वाहापाम्मोदाय स्वाहा सवित्रे स्वाहा वायवे स्वाहा विष्णवे स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा ॥६॥

॥३॥ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहावक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा सᳬहानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा ॥७॥

यते स्वाहा धावते स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा निषण्णाय स्वाहोत्थिताय स्वाहा जवाय स्वाहा बलाय स्वाहा विवर्त्तमानाय स्वाहा विवृत्ताय स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहेक्षमाणाय स्वाहेक्षिताय स्वाहा वीक्षिताय स्वाहा निमेषाय स्वाहा यदत्ति तस्मै स्वाहा यत्पिबति तस्मै स्वाहा यन्मूत्रङ्करोति तस्मै स्वाहा कुर्वते स्वाहा कृताय स्वाहा ॥८॥

॥४॥ तत्सवितुर्वरेण्यम्भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥९॥
हिरण्यपाणिमूतये सवितारमुपह्वये । स चेत्ता देवता पदम् ॥१०॥
देवस्य चेततो महीम्प्र सवितुर्हवामहे । सुमतिᳬ सत्यराधसम् ॥११॥
सुष्टुतिᳬ सुमतीवृधो रातिᳬ सवितुरीमहे । प्र देवाय मतीविदे ॥१२॥
रातिᳬ सत्पतिम्महे सवितारमुपह्वये । आसवन्देववीतये ॥१३॥
देवस्य सवितुर्म्मतिमासवँविश्वदेव्यम् । धिया भगम्मनामहे ॥१४॥
अग्निᳬ स्तोमेन बोधय समिधानोऽअमर्त्यम् । हव्या देवेषु नो दधत् ॥१५॥
स हव्यवाडमर्त्यऽउशिग्दूतश्चनोहितः । अग्निर्धिया समृण्वति ॥१६॥
अग्निन्दूतम्पुरो दधे हव्यवाहमुपब्रुवे । देवाँ२ऽआसादयादिह ॥१७॥
अजीजनो हि पवमान सूर्य्यंविधारे शक्मना पयः ।
गोजीरया रᳬहमाणः पुरन्ध्या ॥१८॥

॥५॥ विभूर्म्मात्रा प्रभूः पित्राश्वोसि हयोस्यत्योसि मयोस्यर्वासि सप्तिरसि वाज्यसि वृषासि नृमणाऽअसि । ययुर्न्नामासि शिशुर्न्नामास्यादित्यानाम्पत्वान्विहि देवाऽआशापालाऽएतन्देवेभ्योश्वम्मेधाय प्रोक्षितᳬ रक्षतेह रन्तिरिह रमतामिह धृतिरिह स्वधृतिः स्वाहा ॥१९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥६॥ क॒ काय॒ स्वाहा॒ कस्मै॒ स्वाहा॑ कत॒मस्मै॒ स्वाहा॒ स्वाहा॒धिमाधी॑ताय॒ स्वाहा॒ मन॑ः
प्र॒जाप॑तये॒ स्वाहा॑ चि॒त्तंवि॒ज्ञाता॒यादि॑त्यै॒ स्वाहादि॑त्यै म॒ह्यै स्वाहादि॑त्यै सुमृडी॒कायै॒
स्वाहा॒ सर॑स्वत्यै॒ स्वाहा॒ सर॑स्वत्यै पाव॒कायै॒ स्वाहा॒ सर॑स्वत्यै बृह॒त्यै स्वाहा॑ पू॒ष्णे
स्वाहा॑ पू॒ष्णे प्र॒पथ्या॒य॒ स्वाहा॑ पू॒ष्णे न॒रन्धि॑षाय॒ स्वाहा॒ त्वष्ट्रे॒ स्वाहा॒ त्वष्ट्रे॒
तु॒रीपा॑य॒ स्वाहा॒ त्वष्ट्रे॑ पुरु॒रूपा॑य॒ स्वाहा॒ विष्ण॑वे॒ स्वाहा॒ विष्ण॑वे निभूय॒पाय॒
स्वाहा॒ विष्ण॑वे शिपिवि॒ष्टाय॒ स्वाहा॑ ॥२०॥
विश्वो॑ दे॒वस्य॑ ने॒तुर्मर्त्तो॑ वुरीत स॒ख्यम् ।
विश्वो॑ रा॒यऽइ॑षुध्यति द्यु॒म्नंवृ॑णीत पु॒ष्यसे॒ स्वाहा॑ ॥२१॥

॥७॥ आ ब्रह्म॑न्ब्राह्म॒णो ब्र॑ह्मवर्च॒सी जा॑यता॒मा रा॒ष्ट्रे रा॑ज॒न्य॒ः शूर॑ऽइष॒व्योऽतिव्या॒धी
म॑हार॒थो जा॑यतां॒ दोग्ध्री॑ धे॒नुर्वोढा॑न॒ड्वाना॒शुः सप्तिः॒ पुर॑न्धि॒र्योषा॑ जि॒ष्णू र॑थे॒ष्ठाः
स॒भेयो॒ युवास्य यज॑मानस्य वी॒रो जा॑यतान्निका॒मेनि॑कामे नः प॒र्जन्यो॑ वर्षतु॒ फल॑-
वत्यो न॒ऽओष॑धयः पच्यन्तां॒ योगक्षे॒मो न॑ः कल्पताम् ॥२२॥

॥८॥ प्रा॒णाय॒ स्वाहा॑पा॒नाय॒ स्वाहा॑ व्या॒नाय॒ स्वाहा॒ चक्षु॑षे॒ स्वाहा॒ श्रोत्रा॑य॒ स्वाहा॑ वा॒चे
स्वाहा॒ मन॑से॒ स्वाहा॑ ॥२३॥

॥९॥ प्राच्यै॑ दि॒शे स्वाहा॒र्वाच्यै॑ दि॒शे स्वाहा॒ दक्षि॑णायै दि॒शे स्वाहा॒र्वाच्यै॑ दि॒शे स्वाहा॑
प्र॒तीच्यै॑ दि॒शे स्वाहा॒र्वाच्यै॑ दि॒शे स्वाहोदी॑च्यै दि॒शे स्वाहा॒र्वाच्यै॑ दि॒शे स्वाहो॒र्ध्वायै॑
दि॒शे स्वाहा॒र्वाच्यै॑ दि॒शे स्वाहा॒र्वाच्यै॑ दि॒शे स्वाहा॒र्वाच्यै॑ दि॒शे स्वाहा॑ ॥२४॥

॥१०॥ अ॒द्भ्यः स्वाहा॑ वा॒र्भ्यः स्वाहो॑द॒काय॒ स्वाहा॒ तिष्ठ॑न्तीभ्यः॒ स्वाहा॒ स्रव॑न्तीभ्यः॒
स्वाहा॒ स्यन्द॑मानाभ्यः॒ स्वाहा॒ कूप्या॑भ्यः॒ स्वाहा॒ सूद्या॑भ्यः॒ स्वाहा॒ धार्या॑भ्यः॒
स्वाहा॑र्ण॒वाय॒ स्वाहा॑ समु॒द्राय॒ स्वाहा॑ सरि॒राय॒ स्वाहा॑ ॥२५॥

॥११॥ वाता॑य॒ स्वाहा॑ धू॒माय॒ स्वाहा॒भ्राय॒ स्वाहा॑ मे॒घाय॒ स्वाहा॑ वि॒द्योत॑मानाय॒ स्वाहा॑
स्त॒नय॑ते॒ स्वाहा॑वस्फू॒र्जते॒ स्वाहा॒ वर्ष॑ते॒ स्वाहा॑व॒वर्ष॑ते॒ स्वाहो॒ग्रंवर्ष॑ते॒ स्वाहा॑ शी॒घ्रंवर्ष॑ते॒
स्वाहो॑द्गृ॒ह्णते॒ स्वाहोद्गृ॑हीताय॒ स्वाहा॑ प्रुष्ण॒ते स्वाहा॑ शीका॒यते॒ स्वाहा॒ प्रुष्वा॑भ्यः॒
स्वाहा॑ ह्रा॒दुनी॑भ्यः॒ स्वाहा॑ नीहा॒राय॒ स्वाहा॑ ॥२६॥

॥१२॥ अ॒ग्नये॒ स्वाहा॒ सोमा॑य॒ स्वाहेन्द्रा॑य॒ स्वाहा॑ पृथि॒व्यै स्वाहा॒न्तरि॑क्षाय॒ स्वाहा॑ दि॒वे
स्वाहा॑ दि॒ग्भ्यः स्वाहाशा॑भ्यः॒ स्वाहो॒र्व्यै दि॒शे स्वाहा॒र्वाच्यै॑ दि॒शे स्वाहा॑ ॥२७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥१३॥ नक्षत्रेब्भ्युः स्वाहा नक्षत्रियेब्भ्युः स्वाहाहोरात्रेब्भ्युः स्वाहार्द्धमासेब्भ्युः स्वाहा
मासेब्भ्युः स्वाहऽऋतुब्भ्युः स्वाहार्त्तवेब्भ्युः स्वाहा सँवत्सराय स्वाहा द्यावापृथिवी-
ब्भ्याॐ स्वाहा चन्द्राय स्वाहा सूर्य्याय स्वाहा रश्मिब्भ्युः स्वाहा वसुब्भ्युः स्वाहा
रुद्रेब्भ्युः स्वाहादित्येब्भ्युः स्वाहा मरुद्भ्युः स्वाहा विश्श्वेब्भ्यो देवेब्भ्युः स्वाहा
मूलेब्भ्युः स्वाहा शाखाब्भ्युः स्वाहा वनस्प्पतिब्भ्युः स्वाहा पुष्प्पेब्भ्युः स्वाहा
फलेब्भ्युः स्वाहौषधीब्भ्युः स्वाहा ॥२८॥

॥१४॥ पृथिव्यै स्वाहान्तरिक्क्षाय स्वाहा दिवे स्वाहा सूर्य्याय स्वाहा चन्द्राय स्वाहा नक्क्ष-
त्रेब्भ्युः स्वाहाद्भ्यः स्वाहौषधीब्भ्युः स्वाहा वनस्प्पतिब्भ्युः स्वाहा परिप्प्लवेब्भ्युः
स्वाहा चराचरेब्भ्युः स्वाहा सरीसृपेब्भ्युः स्वाहा ॥२९॥

॥१५॥ असवे स्वाहा वसवे स्वाहा विभुवे स्वाहा विवस्वते स्वाहा गणश्श्रिये स्वाहा गण-
पतये स्वाहाभिभुवे स्वाहाधिपतये स्वाहा शूषाय स्वाहा सꣳसर्प्पाय स्वाहा चन्द्राय
स्वाहा ज्योतिषे स्वाहा मलिम्म्लुचाय स्वाहा दिवा पतयते स्वाहा ॥३०॥

८ ॥१६॥ मधवे स्वाहा माधवाय स्वाहा शुक्क्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय
स्वाहेषाय स्वाहोर्ज्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय
६ स्वाहाꣳहसस्प्पतये स्वाहा ॥३१॥

॥१७॥ वाजाय स्वाहा प्प्रसवाय स्वाहापिजाय स्वाहा क्क्रतवे स्वाहा स्वः स्वाहा मूर्द्ध्ने
स्वाहा व्व्यश्नुविने स्वाहान्त्याय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहा-
धिपतये स्वाहा प्प्रजापतये स्वाहा ॥३२॥

॥१८॥ आयुर्य्यज्ज्ञेन कल्प्पताꣳ स्वाहा प्प्राणो यज्ज्ञेन कल्प्पताꣳ स्वाहापानो यज्ज्ञेन
कल्प्पताꣳ स्वाहा व्व्यानो यज्ज्ञेन कल्प्पताꣳ स्वाहोदानो यज्ज्ञेन कल्प्पताꣳ
स्वाहा समानो यज्ज्ञेन कल्प्पताꣳ स्वाहा चक्क्षुर्य्यज्ज्ञेन कल्प्पताꣳ स्वाहा श्श्रो-
त्रँय्यज्ज्ञेन कल्प्पताꣳ स्वाहा व्वाग्ग्यज्ज्ञेन कल्प्पताꣳ स्वाहा मनो यज्ज्ञेन कल्प्प-
ताꣳ स्वाहात्त्मा यज्ज्ञेन कल्प्पताꣳ स्वाहा ब्ब्रह्मा यज्ज्ञेन कल्प्पताꣳ स्वाहा
ज्ज्योतिर्य्यज्ज्ञेन कल्प्पताꣳ स्वाहा स्वर्य्यज्ज्ञेन कल्प्पताꣳ स्वाहा पृष्ठँय्यज्ज्ञेन
कल्प्पताꣳ स्वाहा यज्ज्ञो यज्ज्ञेन कल्प्पताꣳ स्वाहा ॥३३॥

॥१९॥ एकस्म्मै स्वाहा द्वाब्भ्याꣳ स्वाहा शताय स्वाहैकशताय स्वाहा व्व्युष्ट्यै स्वाहा
स्वर्ग्गाय स्वाहा ॥३४॥

इति द्वाविंशोऽध्यायः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ त्रयोविंशोऽध्यायः

ऋषिः—प्रजापतिः १—६५ ॥

देवता—परमेश्वरः १—५, ५२ । सूर्यः ६, १० । इन्द्रः ७ । वाय्वादयः ८ । जिज्ञासुः ९, ११, ४५ ४७ । विद्युदादयः १२ । ब्रह्मादयः १३, ४८ । ब्रह्मा १४ । विद्वान् १५ । सविता १६ । अग्न्यादयः १७ । प्राणादयः १८ । गणपतिः १९ । राजप्रजे २०, २२, २३, ३१ । न्यायाधीशः २१ । भूमिसूर्यौ २४, २५ । श्रीः २६. २७ । प्रजापतिः २८ । विद्वांसः २९, ३३ । राजा ३०, ३२, ४३, ४४ । प्रजा ३४, ३५, ४०, ४१ । स्त्रियः ३६, ३७ । सभासदः ३८ । अध्यापकः ३९, ४२ । सूर्यादयः ४६ । प्रष्टृसमाधातारौ ४९ । ईश्वरः ५०, ६४, ६५ । पुरुषेश्वरः ५१ । प्रष्टा ५३, ५५, ५७, ५९, ६१ । समाधाता ५४, ५६, ६०, ६२, ६३ । समिधा ५८ ॥

छन्दः—त्रिष्टुप् १, ३, ६० । निचृदाकृतिः २ । विकृतिः ४ । गायत्री ५ । विराड्गायत्री ६ । निचृद्बृहती ७ । निचृदत्यष्टिः ८ । निचृदनुष्टुप् ९, १२, १४, २४, २८, ३०, ३४, ४५, ५४ । अनुष्टुप् १०, ११, २५—२७, २९, ३१, ३२, ३७, ४०, ४१, ४३, ४६—४८, ५३, ५५ । भुरिगतिजगती १३ । विराडनुष्टुप् १५, २२, ६३ । विराड्जगती १६, १८ । अतिशक्वर्यौ १७ । शक्वरी १९ । स्वराडनुष्टुप् २० । भुरिग्गायत्री २१, ३९ । बृहती २३ । उष्णिक् ३३, ४४ । भुरिगुष्णिक् ३५, ३६, ४२ । निचृत्त्रिष्टुप् ३८, ४९, ५०, ५७—५९, ६१ । पङ्क्तिः ५१ । विराट्त्रिष्टुप् ५२, ६२, ६५ । स्वराडुष्णिक् ५६ । विराडुष्णिक् ६४ ॥

स्वरः—धैवतः १, ३, १९, ३८, ४९, ५०, ५२, ५७—६२, ६५ । पञ्चमः २, १७, ५१ । मध्यमः ४, ७, २३ । षड्जः ५, ६, २१, ३९ । गान्धारः ८—१२, १४, १५, २०, २२, २४—३२, ३४, ३७, ४०, ४१, ४३, ४५—४९, ५३—५५, ६३ । निषादः १३, १६, १८ । ऋषभः ३३, ३५, ३६, ४२, ४४, ४६, ६४ ॥

॥१॥ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥१॥
उपयामगृहीतोसि प्रजापतये त्वा जुष्टङ्गृह्णाम्येष ते योनिः सूर्यस्ते महिमा ।
यस्तेहन्त्संवत्सरे महिमा सम्बभूव यस्ते वायावन्तरिक्षे महिमा सम्बभूव यस्ते
दिवि सूर्ये महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ॥२॥
॥२॥ यः प्राणतो निमिषतो महित्वैकऽइद्राजा जगतो बभूव ।
यऽईशेऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥३॥
उपयामगृहीतोसि प्रजापतये त्वा जुष्टङ्गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा ।
यस्ते रात्रौ संवत्सरे महिमा सम्बभूव यस्ते पृथिव्यामग्नौ महिमा सम्बभूव यस्ते
नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्यः
स्वाहा ॥४॥
॥३॥ युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परि तस्थुषः । रोचन्ते रोचना दिवि ॥५॥
युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे । शोणा धृष्णू नृवाहसा ॥६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्वातोऽअपोऽअगनीगन्प्रियामिन्द्रस्य तन्वम् ।
एतꣳ स्तोतरनेन पथा पुनरश्वमावर्त्तयासि नः ॥७॥
वसवस्त्वाञ्जन्तु गायत्रेण च्छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन च्छन्दसादित्यास्त्वाञ्जन्तु
जागतेन च्छन्दसा । भूर्भुवः स्वर्लाजी३ञ्छाची३न्यव्ये गव्यऽएतदन्नमत्त देवा
ऽएतदन्नमद्धि प्रजापते ॥८॥
कः स्विदेकाकी चरति कऽउ स्विज्जायते पुनः ।
किꣳ स्विद्धिमस्य भेषजङ्किम्वावपनम्महत् ॥९॥
सूर्य्यऽएकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजम्भूमिरावपनम्महत् ॥१०॥
का स्विदासीत्पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः ।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥११॥
द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्बृहद्वयः ।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥१२॥

॥४॥ वायुष्ट्वा पचतैरवत्वसितग्रीवश्छागैर्न्यग्रोधश्चमसैः शल्मलिर्वृद्ध्या ।
एष स्य राथ्यो वृषा पड्भिश्चतुर्भिरेदगन्ब्रह्माकृष्णश्च नोवतु नमोग्नये ॥१३॥
सꣳशितो रश्मिना रथः सꣳशितो रश्मिना हयः ।
सꣳशितोऽअप्स्वप्सुजा ब्रह्मा सोमपुरोगवः ॥१४॥
स्वयँवाजिँस्तन्वङ्कल्पयस्व स्वयँय्यजस्व स्वयञ्जुषस्व ।
महिमा तेन्येन न सन्नशे ॥१५॥
न वाऽउऽएतन्म्रियसे न रिष्यसि देवाँ२॥ऽइदेषि पथिभिः सुगेभिः ।
यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ॥१६॥
अग्निः पशुरासीत्तेनायजन्त सऽएतँल्लोकमजयद्यस्मिन्नग्निः स ते लोको भविष्यति
तञ्जेष्यसि पिबैताऽअपः । वायुः पशुरासीत्तेनायजन्त सऽएतँल्लोकमजयद्यस्मि-
न्वायुः स ते लोको भविष्यति तञ्जेष्यसि पिबैताऽअपः । सूर्य्यः पशुरासीत्ते-
नायजन्त सऽएतँल्लोकमजयद्यस्मिन्त्सूर्य्यः स ते लोको भविष्यति तञ्जेष्यसि
पिबैताऽअपः ॥१७॥

॥५॥ प्राणाय स्वाहापानाय स्वाहा व्यानाय स्वाहा । अम्बेऽअम्बिकेम्बालिके न मा नयति
कश्चन । ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ॥१८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुणानान्त्वा गुणपतिᳬं हवामहे प्प्रियाणान्त्वा प्प्रियपतिᳬं हवामहे निधीनान्त्वा निधिपतिᳬं हवामहे व्वसो मम ।
आहमजानि गर्ब्भधमा त्त्वमजासि गर्ब्भधम् ॥१९॥
ताऽउभौ चतुरः पदः सम्प्रसारयाव स्वर्गे लोके प्प्रोर्णुवाथाँवृषा व्वाजी रेतोधा रेतो दधातु ॥२०॥

॥६॥ उत्सक्थ्याऽअव गुदन्धेहि समञ्जिञ्चारया वृषन् । य स्त्रीणाञ्जीवभोजनः ॥२१॥
यकासकौ शकुन्तिकाहलगिति व्वञ्चति ।
आहन्ति गभे पसो निगल्गलीति धारका ॥२२॥
यकोसकौ शकुन्तकऽआहलगिति व्वञ्चति ।
व्विवक्षतऽइव ते मुखमद्ध्वर्य्यो मा नस्त्वमभिभाषथाः ॥२३॥
माता च ते पिता च तेग्ग्रँवृक्षस्य रोहतः ।
प्रतिलामीति ते पिता गभे मुष्टिमतᳬंसयत् ॥२४॥
माता च ते पिता च तेग्ग्रे वृक्षस्य क्क्रीडतः ।
व्विवक्षतऽइव ते मुखम्ब्रह्मन्मा त्त्वँवदो बहु ॥२५॥
ऊर्द्ध्वमेनामुच्छ्रापय गिरौ भारᳬं हरन्निव ।
अथास्यै मद्ध्यमेधताᳬं शीते वाते पुनन्निव ॥२६॥
ऊर्द्ध्वमेनमुच्छ्रयताद्गिरौ भारᳬं हरन्निव । अथास्य मद्ध्यमेजतु शीते वाते पुनन्निव ॥२७॥
यदस्याऽअᳬंहुभेद्याः कृधु स्स्थूलमुपातसत् ।
मुष्काविदस्याऽएजतो गोशफे शकुलाविव ॥२८॥
यद्देवासो ललामगुम्प्र विष्टीमिनमाविषुः ।
सक्थ्ना देदिश्यते नारी सत्त्यस्याक्षिभुवो यथा ॥२९॥
यद्धरिणो यवमत्ति न पुष्टम्पशु मन्न्यते ।
शूद्द्रा यदर्य्यजारा न पोषाय धनायति ॥३०॥
यद्धरिणो यवमत्ति न पुष्टम्बहु मन्न्यते ।
शूद्द्रो यदर्य्यायै जारो न पोषमनुमन्न्यते ॥३१॥
दधिक्क्राव्ण्णोऽअकारिषञ्जिष्ण्णोरश्श्वस्य व्वाजिनः ।
सुरभि नो मुखा करत्प्र णऽआयूᳬंषि तारिषत् ॥३२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥७॥ गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ।
बृहत्युष्णिहा ककुप्सूचीभिः शम्यन्तु त्वा ॥३३॥
द्विपदा याश्चतुष्पदास्त्रिपदा याश्च षट्पदाः ।
विच्छन्दा याश्च सच्छन्दाः सूचीभिः शम्यन्तु त्वा ॥३४॥
महानाम्न्यो रेवत्यो विश्वाऽआशाः प्रभूवरीः ।
मैघीर्विद्युतो वाचः सूचीभिः शम्यन्तु त्वा ॥३५॥
नार्यस्ते पत्न्यो लोम विचिन्वन्तु मनीषया ।
देवानाम्पत्न्यो दिशः सूचीभिः शम्यन्तु त्वा ॥३६॥
रजता हरिणीः सीसा युजो युञ्जन्ते कर्म्मभिः ।
अश्वस्य वाजिनस्त्वचि सिमाः शम्यन्तु शम्यन्तीः ॥३७॥
कुविदङ्ग यवमन्तो यवञ्चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषाङ्कृणुहि भोजनानि ये बर्हिषो नमऽउक्तिं यजन्ति ॥३८॥

॥८॥ कस्त्वाच्छ्यति कस्त्वा विशास्ति कस्ते गात्राणि शम्यति ।
कऽउ ते शमिता कविः ॥३९॥
ऋतवस्तऽऋतुथा पर्व शमितारो विशासतु ।
संवत्सरस्य तेजसा शमीभिः शम्यन्तु त्वा ॥४०॥
अर्द्धमासाः परूंषि ते मासाऽआच्छ्यन्तु शम्यन्तः ।
अहोरात्राणि मरुतो विलिष्टं सूदयन्तु ते ॥४१॥
दैव्याऽअध्वर्य्यवस्त्वाच्छ्यन्तु वि च शासतु ।
गात्राणि पर्वशस्ते सिमाः कृण्वन्तु शम्यन्तीः ॥४२॥
द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रम्पृणातु ते ।
सूर्य्यस्ते नक्षत्रैः सह लोकङ्कृणोतु साधुया ॥४३॥
शन्ते परेभ्यो गात्रेभ्यः शमस्त्ववरेभ्यः ।
शमस्थभ्यो मज्जभ्यः शम्वस्तु तन्वै तव ॥४४॥

॥९॥ कः स्विदेकाकी चरति कऽउ स्विज्जायते पुनः ।
किंस्विद्धिमस्य भेषजङ्किम्वावपनम्महत् ॥४५॥
सूर्य्यऽएकाकी चरति चन्द्रमा जायते पुनः ।
अग्निर्हिमस्य भेषजम्भूमिरावपनम्महत् ॥४६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किᳬ स्वित्सूर्य्यसमञ्ज्योतिः किᳬ समुद्रसमᳬ सरः।
किᳬ स्वित्पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥४७॥
ब्रह्म सूर्य्यसमञ्ज्योतिर्द्यौः समुद्रसमᳬ सरः।
इन्द्रः पृथिव्यै वर्षीयान्गोस्तु मात्रा न विद्यते ॥४८॥
पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ।
येषु विष्णुस्त्रिषु पदेष्वेष्टस्तेषु विश्वम्भुवनमाविवेशा३ ॥४९॥
अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वम्भुवनमाविवेश।
सद्यः पर्य्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवोऽअस्य पृष्ठम् ॥५०॥
केष्वन्तः पुरुषऽआविवेश कान्यन्तः पुरुषेऽअर्प्पितानि।
एतद्ब्रह्मन्नुपवल्हामसि त्वा किᳬ स्विन्नः प्रतिवोचास्यत्र ॥५१॥
पञ्चस्वन्तः पुरुषऽआविवेश तान्यन्तः पुरुषेऽअर्प्पितानि।
एतत्त्वात्र प्रतिमन्वानोऽअस्मि न मायया भवस्युत्तरो मत् ॥५२॥

॥१०॥ का स्विदासीत्पूर्वचित्तिः किᳬ स्विदासीद्बृहद्वयः।
का स्विदासीत्पिलिप्पिला का स्विदासीत्पिशङ्गिला ॥५३॥
द्यौरासीत्पूर्वचित्तिरश्वऽआसीद्बृहद्वयः।
अविरासीत्पिलिप्पिला रात्रिरासीत्पिशङ्गिला ॥५४॥
काऽईमरे पिशङ्गिला काऽईङ्कुरुपिशङ्गिला।
कऽईमास्कन्दमर्षति कऽईम्पन्थाँविसर्प्पति ॥५५॥
अजारे पिशङ्गिला श्वावित्कुरुपिशङ्गिला।
शशऽआस्कन्दमर्षत्यहिः पन्थाँविसर्प्पति ॥५६॥
कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्धः।
यज्ञस्य त्वा विदथा पृच्छमत्र कति होतारऽऋतुशो यजन्ति ॥५७॥
षडस्य विष्ठाः शतमक्षराण्यशीतिर्होमाः समिधो ह तिस्रः।
यज्ञस्य ते विदथा प्रब्रवीमि सप्त होतारऽऋतुशो यजन्ति ॥५८॥
कोऽअस्य वेद भुवनस्य नाभिङ्को द्यावापृथिवीऽअन्तरिक्षम्।
कः सूर्य्यस्य वेद बृहतो जनित्रङ्को वेद चन्द्रमसँय्यतोजाः ॥५९॥
वेदाहमस्य भुवनस्य नाभिंवेद द्यावापृथिवीऽअन्तरिक्षम्।
वेद सूर्य्यस्य बृहतो जनित्रमथो वेद चन्द्रमसँय्यतोजाः ॥६०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृच्छामि त्वा परमन्तम्पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णोऽअश्वस्य रेतः पृच्छामि वाचः परमँव्योम ॥६१॥
इयँवेदिः परोऽअन्तः पृथिव्याऽअयँय्यज्ञो भुवनस्य नाभिः ।
अयꣳ सोमो वृष्णोऽअश्वस्य रेतो ब्रह्मायँवाचः परमँव्योम ॥६२॥

॥११॥ सुभूः स्वयम्भूः प्प्रथमोन्तर्म्महत्त्यर्ण्णवे ।
दधे ह गर्ब्भमृत्त्वियँय्यतो जातः प्प्रजापतिः ॥६३॥
होता यक्षत्प्रजापतिꣳ सोमस्य महिम्नः ।
जुषताम्पिबतु सोमꣳ होतर्य्यज ॥६४॥
प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नोऽअस्तु वयꣳ स्याम पतयो रयीणाम् ॥६५॥

इति त्रयोविंशोऽध्यायः

अथ चतुर्विंशोऽध्यायः

ऋषिः—प्रजापतिः १—४० ॥

देवता—प्रजापतिः १ । सोमादयः २ । अश्व्यादयः ३ । मारुतादयः ४ । विश्वेदेवाः ५ । अग्न्यादयः ६, ९, १२, १४, १६, २३, ३४ । इन्द्रादयः ७, १५ । इन्द्राग्न्यादयः ८, १७ । अन्तरिक्षादयः १० । वसन्तादयः ११, २० । विराजादयः १३ । पितरः १८ । वायुः १९ । वरुणः २१ । सोमादयः २२, २४, ३२ । कालावयवाः २५ । भूम्यादयः २६ । वस्वादयः २७ । ईशानादयः २८ । प्रजापत्यादयः २९—३१ । मित्रादयः ३३ । चन्द्रादयः ३५ । अश्विन्यादयः ३६ । अर्धमासादयः ३७ । वर्षादयः ३८ । आदित्यादयः ३९ । विश्वेदेवादयः ४० ॥

छन्दः—भुरिक्संकृतिः १ । निचृत्संकृतिः २ । निचृदतिजगती ३ । विराडतिधृतिः ४ । निचृद्बृहती ५, २७ । विराट्पङ्क्तिः ६ । अतिजगती ७ । स्वराड्बृहती ८, ११ । निचृत्पङ्क्तिः ९ । स्वराड्गायत्री १० । स्वराडनुष्टुप् १२ । निचृदनुष्टुप् १३ । भुरिगतिजगती १४, १८ । विराडुष्णिक् १५ । शक्वरी १६, ४० । भुरिग्गायत्री १७ । त्रिपाद्गायत्री १९ । विराड्जगती २० । बृहती २१, २८ । विराड्बृहती २२ । पङ्क्तिः २३ । भुरिक्पङ्क्तिः २४ । स्वराट्पङ्क्तिः २५ । भुरिगनुष्टुप् २६ । विराडनुष्टुप् २९ । निचृदतिधृतिः ३० । स्वराट्त्रिष्टुप् ३१, ३९ । भुरिग्जगती ३२,३७ । भुरिगतिजगती ३३ । स्वराट्शक्वरी ३४ । निचृच्छक्वरी ३५ । निचृज्जगती ३६ । स्वराड्जगती ३८ ॥

स्वरः—गान्धारः १, २, १२, १३, २६, २९ । निषादः ३, ७, १४, १८, २०, ३२, ३३, ३६—३८ । षड्जः ४, १०, १७, १९, ३० । मध्यमः ५, ८, ११, २१, २२, २७, २८ । ऋषभः १५ । पञ्चमः ६, ९, २३—२५ । धैवतः १६, ३१, ३४, ३५, ३९, ४० ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥१॥ अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीवऽआग्नेयो रराटे पुरस्तात्सारस्वती मेष्यधस्ताद्धन्वोराश्विनावधोरामौ बाह्वोः सौमापौष्णः श्यामो नाभ्याँ सौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छऽइन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः ॥१॥

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः शितिरन्ध्रोऽन्यतःशितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः ॥२॥

शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽआश्विनाः श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा यामाऽअवलिप्ता रौद्रा नभोरूपाः पार्जन्याः ॥३॥

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्तऽऐन्द्राग्नाः कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्तऽउषस्याः ॥४॥

शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचेऽविज्ञाताऽअदित्यै सरूपा धात्रे वत्सतर्यो देवानाम्पत्नीभ्यः ॥५॥

कृष्णग्रीवाऽआग्नेयाः शितिभ्रवो वसूनाँ रोहिता रुद्राणाँ श्वेताऽअवरोकिणऽआदित्यानान्नभोरूपाः पार्जन्याः ॥६॥

उन्नतऽऋषभो वामनस्तऽऐन्द्रावैष्णवाऽउन्नतः शितिबाहुः शितिपृष्ठस्तऽऐन्द्राबार्हस्पत्याः शुकरूपा वाजिनाः कल्माषाऽआग्निमारुताः श्यामाः पौष्णाः ॥७॥

एताऽऐन्द्राग्ना द्विरूपाऽअग्नीषोमीया वामनाऽअनड्वाहऽआग्नावैष्णवा वशा मैत्रावरुण्योऽन्यतऽएन्यो मैत्र्यः ॥८॥

कृष्णग्रीवाऽआग्नेया बभ्रवः सौम्याः श्वेता वायव्याऽअविज्ञाताऽअदित्यै सरूपा धात्रे वत्सतर्यो देवानाम्पत्नीभ्यः ॥९॥

कृष्णा भौमा धूम्राऽआन्तरिक्षा बृहन्तो दिव्याः शबला वैद्युताः सिध्मास्तारकाः ॥१०॥

॥२॥ धूम्रान्वसन्तायालभते श्वेतान्ग्रीष्माय कृष्णान्वर्षाभ्योऽरुणाञ्छरदे पृषतो हेमन्ताय पिशङ्गाञ्छिशिराय ॥११॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्र्यवयो गायत्र्यै पञ्चावयस्त्रिष्टुभे दित्यवाहो जगत्यै त्रिवत्साऽअनुष्टुभे तुर्य्यवाहऽउष्णिहे ॥१२॥

पृष्ठवाहो विराजऽउक्षाणो बृहत्याऽऋषभाः ककुभेनड्वाहः पङ्क्त्यै धेनवोतिच्छन्दसे ॥१३॥

कृष्णग्रीवाऽआग्नेया बभ्रवः सौम्याऽउपध्वस्ताः सावित्रा वत्सतर्य्यः सारस्वत्यः श्यामाः पौष्णाः पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः ॥१४॥

उक्ताः सञ्चराऽएताऽऐन्द्राग्नाः कृष्णा वारुणाः पृश्नयो मारुताः कायास्तूपराः ॥१५॥

अग्नयेनीकवते प्रथमजानालभते मरुद्भ्यः सान्तपनेभ्यः सवात्यान्मरुद्भ्यो गृहमेधिभ्यो बष्किहान्मरुद्भ्यः क्रीडिभ्यः सꣳसृष्टान्मरुद्भ्यः स्वतवद्भ्योनुसृष्टान् ॥१६॥

उक्ताः सञ्चराऽएताऽऐन्द्राग्नाः प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्म्मणाः ॥१७॥

धूम्रा बभ्रुनीकाशाः पितॄणाꣳ सोमवताम्बभ्रवो धूम्रनीकाशाः पितॄणाम्बर्हिषदाङ्कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वात्तानाङ्कृष्णाः पृषन्तस्त्रैयम्बकाः ॥१८॥

उक्ताः सञ्चराऽएताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्य्याः ॥१९॥

वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान्वर्षाभ्यस्तित्तिरीञ्छरदे वर्त्तिका हेमन्ताय ककराञ्छिशिराय विककरान् ॥२०॥

॥३॥ समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकानद्भ्यो मत्स्यान्मित्राय कुलीपयान्वरुणाय नाक्रान् ॥२१॥

सोमाय हꣳसानालभते वायवे बलाकाऽइन्द्राग्निभ्याङ्क्रुञ्चान्मित्राय मद्गून्वरुणाय चक्रवाकान् ॥२२॥

अग्नये कुटरूनालभते वनस्पतिभ्यऽउलूकानग्नीषोमाभ्याञ्चाषानश्विभ्याम्मयूरान्मित्रावरुणाभ्याङ्कपोतान् ॥२३॥

सोमाय लबानालभते त्वष्ट्रे कौलीकान्गोषादीर्देवानाम्पत्नीभ्यः कुलीका देवजामिभ्योग्नये गृहपतये पारुष्णान् ॥२४॥

अह्ने पारावतानालभते रात्र्यै सीचापूरहोरात्रयोः सन्धिभ्यो जतूर्म्मासेभ्यो दात्यौहान्त्संवत्सराय महतः सुपर्णान् ॥२५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूम्म्याऽआखूनालभतेन्तरिक्षाय पाङ्क्त्रान्दिवे कशान्दिग्ग्भ्यो नकुलान्बभ्रुकानवा-
न्तरदिशाब्भ्यः ॥२६॥

वसुब्भ्यऽऋश्श्यानालभते रुद्द्रेब्भ्यो रुरूनादित्त्येब्भ्यो न्यङ्कून्विश्श्वेब्भ्यो देवेब्भ्यः
पृषतान्त्साद्ध्येब्भ्यः कुलुङ्गान् ॥२७॥

ईशानाय परस्वतऽआलभते मित्राय गौरान्वरुणाय महिषान्बृहस्पतये गवयाँ-
स्त्वष्ट्रऽउष्ट्रान् ॥२८॥

प्रजापतये पुरुषान्हस्तिनऽआलभते वाचे प्प्लुषीँश्चक्षुषे मशकाञ्छ्रोत्राय भृङ्गाः ॥२९॥

प्रजापतये च वायवे च गोमृगो वरुणायारण्ण्यो मेषो यमाय कृष्ण्णो मनुष्ष्यरा-
जाय मर्क्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्प्रश्श्येनाय वर्त्तिका नीलङ्गोः
क्रिमिः समुद्द्राय शिशुमारो हिमवते हस्ती ॥३०॥

॥४॥ मयुः प्प्राजापत्त्यऽउलो हलिक्ष्णो वृषदꣳशस्ते धात्रे दिशाङ्कङ्को धुङ्क्षाग्नेयी
कलविङ्को लोहिताहिः पुष्ष्करसादस्ते त्वाष्ट्रा वाचे क्रुञ्चः ॥३१॥

सोमाय कुलुङ्गऽआरण्ण्योजो नकुलः शका ते पौष्ण्णाः क्रोष्टा मायोरिन्द्रस्य
गौरमृगः पिद्वो न्यङ्कुः कक्कटस्तेनुमत्त्यै प्प्रतिश्श्रुत्कायै चक्रवाकः ॥३२॥

सौरी बलाका शार्ग्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्त्यै शारिः पुरुषवाक्श्वा-
विद्भौमी शार्दूलो वृकः पृदाकुस्ते मन्न्यवे सरस्वते शुकः पुरुषवाक् ॥३३॥

सुपर्ण्णः पार्ज्जन्न्यऽआतिर्वाहसो दर्विदा ते वायवे बृहस्पतये वाचस्पतये पैङ्गराजो-
लजऽआन्तरिक्षः प्प्लवो मद्गुर्म्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्म्मः ॥३४॥

पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्प्पतीनाङ्कृकवाकुः सावित्रो
हꣳसो वातस्य नाक्क्रो मकरः कुलीपयस्तेकूपारस्य ह्रियै शल्ल्यकः ॥३५॥

एण्ण्यह्नो मण्डूको मूषिका तित्तिरिस्ते सर्प्पाणाँल्लोपाशऽआश्श्विनः कृष्ण्णो रात्र्याऽ
ऋक्षो जतूः सुषिलीका तऽइतरजनानाञ्जहका वैष्ण्णवी ॥३६॥

अन्न्यवापोर्द्धमासानामृश्श्यो मयूरः सुपर्ण्णस्ते गन्धर्वाणामपामुद्रो मासाङ्कश्श्यपो
रोहित्कुण्डृणाची गोलत्तिका तेप्प्सरसाम्मृत्त्यवेसितः ॥३७॥

वर्षाहूरृतूनामाखुः कशो मान्थालस्ते पितृणाम्बलायाजगरो वसूनाङ्कपिञ्जलः कपो-
तऽउलूकः शशस्ते निर्ऋत्त्यै वरुणायारण्ण्यो मेषः ॥३८॥

श्श्वित्रऽआदित्त्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्त्याऽअरण्ण्याय सृमरो रुरू रौद्द्रः
क्वयिः कुटरुर्दात्त्यौहस्ते वाजिनाङ्कामाय पिकः ॥३९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अ·२४, अनु· ४ , मन्त्रः ४०

खड्गो वैश्वदेवः श्वा कृष्ण्णः कर्ण्णो गर्द्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिꣳ-
हो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै व्विश्वेषान्देवानाम्पृषतः ॥४०॥

इति चतुर्विंशोऽध्यायः

अथ पञ्चविंशोऽध्यायः

अ·२५,अनु·१-२ ,मन्त्रौ १-२

ऋषिः—प्रजापतिः १—१६, २३ २७ । गोतमः १७—२२, २४—२६, २८—४७॥

देवता—सरस्वत्यादयः १ । प्राणादयः २ । इन्द्रादयः ३, ५, ८ । अग्न्यादयः ४ । मरुतादयः ६ । पूषादयः ७, ९ । हिरण्यगर्भः १० । ईश्वरः ११, १२, १८, १९ । परमात्मा १३ । यज्ञः १४, २६—२९, ३१—३४, ३६, ३८, ४०, ४१ । विद्वांस १५, २०—२२, २५, ३०, ३७, ३९ । विश्वेदेवाः १६, ३५, ४६ । वायुः १७ । द्यौरित्यादयः २३ । मित्रादयः २४ । यजमानः ४२ । आत्मा ४३, ४४ । प्रजा ४५ । अग्निः ४७॥

छन्दः—भुरिक्शक्वरी १ क, ४६ । निचृदतिशक्वरी १ र । भुरिगतिशक्वर्यौ २ । भुरिक्कृतिः ३ । स्वराड्धृतिः ४ । स्वराड्विकृतिः ५ । निचृदतिधृतिः ६। निचृदष्टिः ७ । निचृदभिकृतिः ८ । भुरिगत्यष्टिः ९ । त्रिष्टुप् १०, ११, २२, २३, २७ ३०, ३१, ४१ । स्वराट्पङ्क्तिः १२, ३७, ४२, ४५ । निचृत्त्रिष्टुप् १३, २१, २४,२५, ३२, ३३, ४०, ४३ । निचृज्जगती १४, १८, २६ । जगती १५, १६, २० । भुरिक्त्रिष्टुप् १७, २९, ३४, ४४ । स्वराड्बृहती १९ । विराट्त्रिष्टुप् २८ । स्वराट्त्रिष्टुप् ३५ । भुरिक्पङ्क्तिः ३६, ३८ । विराट्पङ्क्तिः ३९ । स्वराड्ब्राह्मीबृहती ४७

स्वरः—धैवतः क १, १०, ११, १३, १७, २१—२५, २७—३५, ४०, ४१, ४३, ४४, ४६ निषादः ३, १४—१६, १८, २०, २६ । ऋषभः ४, ८ । मध्यमः ५, ७, १९, ४७। षड्जः ६ । गान्धारः ९ । पञ्चमः र १, २, १२, ३६—३९ ४२, ४५ ॥

॥१॥ कशादन्दुद्भिरवकान्दन्तमूलैर्मृदम्बर्स्वैस्तेगान्दꣳष्ट्राभ्याꣳ सरस्वत्याऽअग्ग्रजिह्व-
ञ्जिह्वायाऽउत्त्सादमवक्क्रन्देन तालु व्वाजꣳ हनुभ्यामपऽआस्येन व्वृषणमाण्डाभ्यामा-
दित्याँश्श्मश्रुभिः पन्थानम्भ्रूभ्यान्द्यावापृथिवी व्वर्त्तोभ्याँव्विद्युतङ्कनीनकाभ्याꣳ
शुक्लाय स्वाहा कृष्ण्णाय स्वाहा पार्य्याणि पक्ष्माण्यवार्य्याऽइक्क्षवोऽवार्य्याणि
पक्ष्माणि पार्य्याऽइक्क्षवः ॥१॥

॥२॥ व्वातम्प्प्राणेनापानेन नासिकेऽउपयाममधरेणौष्ठेन सदुत्तरेण प्प्रकाशेनान्तरमनूकाशेन
बाह्यन्निवेष्प्यम्मूर्द्ध्ना स्त्तनयित्क्नुन्निर्ब्बाधेनाशनिम्मस्त्तिष्क्केण व्विद्युतङ्कनीनकाभ्याङ्क-
र्ण्णाभ्याꣳ श्रोत्रꣳ श्रोत्राभ्याङ्कर्ण्णौ तेदनीमधरकण्ठेनापः शुष्क्ककण्ठेन चित्त-
म्मन्याभिरदितिꣳ शीर्ष्ण्णा निर्ऋतिन्निर्ज्जर्जल्प्येन शीर्ष्ण्णा सङ्क्क्रोशैः प्प्राणान्रे-
ष्माणꣳ स्तुपेन ॥२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥३॥ मशकान्केशैरिन्द्रᳬं स्वपसा वहेन बृहस्पतिᳬं शकुनिसादेन कूर्म्माञ्छफैरा-
क्रमणᳬं स्थूराभ्यामृक्षलाभिः कपिञ्जलाञ्जवञ्जङ्घाभ्यामध्वानम्बाहुभ्याञ्जाम्बी-
लेनारण्यमग्निमतिरुग्भ्याम्पूषणन्दोर्भ्यामश्विनावᳬंसाभ्याᳬं रुद्रᳬं रोरा-
भ्याम् ॥३॥

॥४॥ अग्नेः पक्षतिर्वायोर्निपक्षतिरिन्द्रस्य तृतीया सोमस्य चतुर्थ्यदित्यै पञ्चमीन्द्रा-
ण्यै षष्ठी मरुताᳬं सप्तमी बृहस्पतेरष्टम्यर्य्यम्णो नवमी धातुर्दशमीन्द्रस्यै-
कादशी वरुणस्य द्वादशी यमस्य त्रयोदशी ॥४॥

॥५॥ इन्द्राग्न्योः पक्षतिः सरस्वत्यै निपक्षतिर्म्मित्रस्य तृतीयापाञ्चतुर्थी निर्ऋत्यै
पञ्चम्यग्नीषोमयोः षष्ठी सर्प्पाणाᳬं सप्तमी विष्णोरष्टमी पूष्णो नवमी
त्वष्टुर्दशमीन्द्रस्यैकादशी वरुणस्य द्वादशी यम्यै त्रयोदशी द्यावापृथिव्योर्दक्षि-
णम्पार्श्वँविश्वेषान्देवानामुत्तरम् ॥५॥

॥६॥ मरुताᳬं स्कन्धा विश्वेषान्देवानाम्प्रथमा कीकसा रुद्राणान्द्वितीयादित्यानान्तृतीया
वायोः पुच्छमग्नीषोमयोर्भासदौ क्रुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पतीऽऊरुभ्या-
म्मित्रावरुणावल्गाभ्यामाक्रमणᳬं स्थूराभ्याम्बलङ्कुष्ठाभ्याम् ॥६॥

॥७॥ पूषणँवनिष्ठुनान्धाहीन्त्स्थूलगुदया सर्प्पान्गुदाभिर्विह्रुतऽआन्त्रैरपो वस्तिना वृषण-
माण्डाभ्याँवाजिनᳬं शेपेन प्रजाᳬं रेतसा चाषान्पित्तेन प्रदरान्पायुना कूश्मा-
ञ्छकपिण्डैः ॥७॥

॥८॥ इन्द्रस्य क्रोडोदित्यै पाजस्यन्दिशाञ्जत्रवोदित्यै भसज्जीमूतान्हृदयौपशेनान्तरिक्ष-
म्पुरीतता नभऽउदर्य्येण चक्रवाकौ मतस्नाभ्यान्दिवँवृक्काभ्याङ्गिरीन्प्लाशिभि-
रुपलान्प्लीह्ना वल्मीकान्क्लोमभिर्ग्लौभिर्गुल्मान्हिराभिः स्रवन्तीर्ह्रदान्कु-
क्षिभ्याᳬं समुद्रमुदरेण वैश्वानरम्भस्मना ॥८॥

॥९॥ विधृतिन्नाभ्या घृतᳬं रसेनापो यूष्णा मरीचीर्विप्रुड्भिर्न्नीहारमूष्मणा शीनँवसया
प्रुष्वाऽअश्रुभिर्ह्रादुनीर्दूषीकाभिरस्ना रक्षाᳬंसि चित्राण्यङ्गैर्न्नक्षत्राणि
रूपेण पृथिवीन्त्वचा जुम्बकाय स्वाहा ॥९॥

॥१०॥ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् ।
स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥१०॥
यः प्राणतो निमिषतो महित्वैकऽइद्राजा जगतो बभूव ।
यऽईशेऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥११॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यस्येमे हिमवन्तो महित्त्वा यस्य समुद्रꣳ रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥१२॥
यऽआत्मदा बलदा यस्य विश्श्वऽउपासते प्प्रशिषँय्यस्य देवाः ।
यस्य छायामृतँय्यस्य मृत्त्युः कस्मै देवाय हविषा विधेम ॥१३॥
॥११॥ आ नो भद्राः क्क्रतवो यन्तु विश्श्वतोदब्धासोऽअपरीतासऽउद्भिदः ।
देवा नो यथा सदमिद्वृधेऽअसन्नप्प्रायुवो रक्क्षितारो दिवेदिवे ॥१४॥
देवानाम्भद्रा सुमतिर्ऋजूयतान्देवानाꣳ रातिरभि नो निवर्त्तताम् ।
देवानाꣳ सक्ख्यमुपसेदिमा वयन्देवा नऽआयुः प्प्रतिरन्तु जीवसे ॥१५॥
तान्पूर्व्वया निविदा हूमहे वयम्भगम्मित्रमदितिन्दक्क्षमस्त्रिधम् ।
अर्य्यमणँव्वरुणꣳ सोममश्श्विना सरस्वती नः सुभगा मयस्करत् ॥१६॥
तन्नो वातो मयोभु वातु भेषजन्तन्माता पृथिवी तत्त्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्श्विना शृणुतन्धिष्ण्ण्या युवम् ॥१७॥
तमीशानञ्जगतस्तस्थुषस्प्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्क्षिता पायुरदब्धः स्वस्त्तये ॥१८॥
स्वस्ति नऽइन्द्रो वृद्धश्श्रवाः स्वस्ति नः पूषा विश्श्ववेदाः ।
स्वस्ति नस्तार्क्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्प्पतिर्द्दधातु ॥१९॥
पृषदश्श्वा मरुतः पृश्निमातरः शुभँय्यावानो विदथेषु जग्ग्मयः ।
अग्निजिह्वा मनवः सूरचक्क्षसो विश्श्वे नो देवाऽअवसागमन्निह ॥२०॥
भद्रङ्कर्ण्णेभिः शृणुयाम देवा भद्रम्पश्श्येमाक्क्षभिर्य्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्व्यशेमहि देवहितँय्यदायुः ॥२१॥
शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्रा जरसन्तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्या रीरिषतायुर्ग्गन्तोः ॥२२॥
अदितिर्द्यौरदितिरन्तरिक्क्षमदितिर्म्माता स पिता स पुत्रः ।
विश्श्वे देवाऽअदितिः पञ्च जनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥२३॥

॥१२॥ मा नो मित्रो वरुणोऽअर्य्यमायुरिन्द्रऽऋभुक्क्षा मरुतः परिक्ख्यन् ।
यद्वाजिनो देवजातस्य सप्प्तेः प्प्रवक्क्ष्यामो विदथे वीर्य्याणि ॥२४॥
यन्निर्ण्णिजा रेक्क्णसा प्प्रावृतस्य रातिङ्गृभीताम्मुखतो नयन्ति ।
सुप्प्राङजो मेम्म्यद्विश्श्वरूपऽइन्द्रापूष्ण्णोः प्प्रियमप्प्येति पाथः ॥२५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एष च्छागः पुरोऽअश्श्वेन वाजिना पूष्ण्णो भागो नीयते विश्श्वदेव्व्यः ।
अभिप्प्रियँय्यत्पुरोडाशमर्व्वता त्वष्ट्टेदेनꣳ सौश्श्रवसाय जिन्वति ॥२६॥
यद्धविष्ष्यमृतुशो देवयानन्त्रिर्म्मानुषाः पर्य्यश्श्वन्नयन्ति ।
अत्त्रा पूष्ण्णः प्प्रथमो भागऽएति यज्ज्ञन्देवेब्भ्यः प्प्रतिवेदयन्नजः ॥२७॥
होताद्ध्वर्य्युरावयाऽअग्निमिन्धो ग्ग्रावग्ग्राभऽउत शꣳस्ता सुविप्प्रः ।
तेन यज्ज्ञेन स्वरङ्कृतेन स्विष्ट्टेन वक्क्षणाऽआपृणद्ध्वम् ॥२८॥
यूपव्व्रस्क्काऽउत ये यूपवाहाश्च्चषालँय्येऽअश्श्वयूपाय तक्क्षति ।
ये चार्व्वते पचनꣳ सम्भरन्त्युतो तेषामभिगूर्त्तिर्न्नऽइन्वतु ॥२९॥
उपप्प्रागात्सुमन्न्मेऽधायि मन्न्म देवानामाशाऽउप वीतपृष्ठः ।
अन्वेनँव्विप्प्राऽऋषयो मदन्ति देवानाम्पुष्ट्टे चकृमा सुबन्धुम् ॥३०॥
यद्वाजिनो दाम सन्दानमर्व्वतो या शीर्षण्ण्या रशना रज्जुरस्य ।
यद्वा घास्य प्प्रभृतमास्ये तृणꣳ सर्व्वा ता तेऽअपि देवेष्ष्वस्तु ॥३१॥

॥१३॥ यदश्श्वस्य क्क्रविषो मक्क्षिकाश यद्वा स्वरौ स्वधितौ रिप्प्तमस्ति ।
यद्धस्तयोः शमितुर्य्यन्नखेषु सर्व्वा ता तेऽअपि देवेष्ष्वस्तु ॥३२॥
यदूवद्ध्यमुदरस्यापवाति यऽआमस्य क्क्रविषो गन्धोऽअस्ति ।
सुकृता तच्छमितारः कृण्ण्वन्तूत मेधꣳ शृतपाकम्पचन्तु ॥३३॥
यत्ते गात्रादग्ग्निना पच्च्यमानादभि शूलन्निहतस्यावधावति ।
मा तद्भूम्म्यामाश्रिषन्मा तृणेषु देवेब्भ्यस्तदुशद्भ्यो रातमस्तु ॥३४॥
ये वाजिनम्परिपश्श्यन्ति पक्क्वँय्यऽईमाहुः सुरभिर्न्निर्हरेति ।
ये चार्व्वतो माꣳसभिक्क्षामुपासतऽउतो तेषामभिगूर्त्तिर्न्नऽइन्वतु ॥३५॥
यन्नीक्क्षणम्माँस्पचन्न्याऽउखाया या पात्त्राणि यूष्ण्णऽआसेचनानि ।
ऊष्ष्मण्ण्यापिधाना चरूणामङ्काः सूनाः परिभूषन्त्यश्श्वम् ॥३६॥
मा त्वाग्ग्निर्द्ध्वनयीद्धूमगन्धिर्म्मोखा भ्भ्राजन्त्यभिविक्क्त जग्घ्रिः ।
इष्ट्टँव्वीतमभिगूर्त्तँव्वषट्कृतन्तन्देवासः प्प्रतिगृब्भ्णन्त्यश्श्वम् ॥३७॥
निक्क्रमणन्निषदनँव्विवर्त्तनँय्यच्च पड्वीशमर्व्वतः ।
यच्च पपौ यच्च घासिञ्जघास सर्व्वा ता तेऽअपि देवेष्ष्वस्तु ॥३८॥
यदश्श्वाय वासऽउपस्तृणन्त्यधीवासँय्या हिरण्ण्यान्यस्म्मै ।
सन्दानमर्व्वन्तम्पड्वीशम्प्प्रिया देवेष्ष्वायामयन्ति ॥३९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥१४॥ यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा कशया वा तुतोद ।
स्रुचेव ता हविषोऽअध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥४०॥
चतुस्त्रिꣳशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या विशस्त ॥४१॥
एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथऽऋतुः ।
या ते गात्राणामृतुथा कृणोमि ताता पिण्डानाम्प्रजुहोम्यग्नौ ॥४२॥
मा त्वा तपत्प्रियऽआत्माऽपियन्तम्मा स्वधितिस्तन्वऽआतिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥४३॥
न वाऽउऽएतन्म्रियसे न रिष्यसि देवाँ२॥ऽइदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषतीऽअभूतामुपास्थाद्वाजी धुरि रासभस्य ॥४४॥
सुगव्यन्नो वाजी स्वश्व्यम्पुꣳसः पुत्राँ२॥ऽउत विश्वापुषꣳ रयिम् ।
अनागास्त्वन्नोऽअदितिः कृणोतु क्षत्रन्नोऽअश्वो वनताꣳ हविष्मान् ॥४५॥
॥१५॥ इमा नु कम्भुवना सीषधामेन्द्रश्च विश्वे च देवाः । आदित्यैरिन्द्रः सगणो मरुद्भि-
रस्मभ्यम्भेषजा करत् । यज्ञञ्च नस्तन्वञ्च प्रजाञ्चादित्यैरिन्द्रः सह सीष-
धाति ॥४६॥
अग्ने त्वन्नोऽअन्तमऽउत त्राता शिवो भवा वरूथ्यः । वसुरग्निर्वसुश्रवाऽअच्छा
नक्षि द्युमत्तमꣳ रयिन्दाः । तन्त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे
सखिभ्यः ॥४७॥

इति पञ्चविंशोऽध्यायः

अथ षड्विंशोऽध्यायः

ऋषिः—याज्ञवल्क्यः १ । लौगाक्षिः २ । गृत्समदः ३, २४ । रम्याक्षी ४, ५ । प्रावुराक्षिः ६ । कुत्सः ७—९ । वसिष्ठः १० । नोधा गोतमः ११, १२ । भारद्वाजः १३, १४ । वत्सः १५ । महीयवः १६—१८ । मुद्गलः १९ । मेधातिथिः २०—२३ । मधुच्छन्दाः २५, २६ ॥

देवता:—अग्न्यादयः १ । ईश्वरः २,३ । इन्द्रः ४, १०, १७ । सूर्यः ५ । वैश्वानरः ६, ८, ९ । वैश्वानरोऽग्निः ७ । अग्निः ११-१३, १६, २६ । संवत्सरः १४ । विद्वान् १५, १८, २०, २१, २३, २४ । विद्वांसः १९ । सोमः २२, २५ ॥

छन्दः—अभिकृतिः १ । विराडत्यष्टिः २, ७ । भुरिगत्यष्टिः ३ । स्वराड्जगती ४, ९ । भुरिग्जगती ५ । जगती ६, ८, २४ । निचृज्जगती १० । बृहती ११ । विराडनुष्टुप् १२ । विराड्गायत्री १३, १५, १८ । भुरिग्बृहती १४ । निचृद्गायत्री १६, १७ । त्रिष्टुप् १९ । गायत्री २०—२२, २५,२६ । भुरिक्पङ्क्तिः २३॥

स्वरः—ऋषभः १ । गान्धारः २, ३, ७, १२, । निषादः ४—६, ८—१०, २४ । मध्यमः ११, १४ । षड्जः १३, १५—१८, २०—२२, २५, २६ । धैवतः १९ । पञ्चमः २३ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥१॥ अग्निश्च पृथिवी च सन्नते ते मे सन्नमतामदो वायुश्चान्तरिक्षञ्च सन्नते ते मे सन्न-
मतामदऽआदित्यश्च द्यौश्च सन्नते ते मे सन्नमतामदऽआपश्च वरुणश्च सन्नते ते मे
सन्नमतामदः । सप्त सꣳसदोऽअष्टमी भूतसाधनी । सकामाँ२॥ऽअद्ध्वनस्कुरु
सञ्ज्ञानमस्तु मेमुना ॥१॥

यथेमाँवाचङ्कल्ल्याणीमावदानि जनेब्भ्यः । ब्रह्मराजन्न्याब्भ्याꣳ शूद्राय चार्य्याय च
स्वाय चारणाय च । प्रियो देवानान्दक्षिणायै दातुरिह भूयासमयम्मे कामः समृ-
द्ध्यतामुप मादो नमतु ॥२॥

बृहस्प्पतेऽअति यदर्य्योऽअर्हाद्द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवसऽऋतप्र-
जात तदस्म्मासु द्रविणन्धेहि चित्रम् । उपयामगृहीतोसि बृहस्प्पतये त्वैष ते योनि-
र्बृहस्प्पतये त्वा ॥३॥

इन्द्र गोमन्निहायाहि पिबा सोमꣳ शतक्रतो । विद्यद्भिर्ग्ग्रावभिः सुतम् ।
उपयामगृहीतोसीन्द्राय त्वा गोमतऽएष ते योनिरिन्द्राय त्वा गोमते ॥४॥

इन्द्रायाहि वृत्रहन्पिबा सोमꣳ शतक्रतो । गोमद्भिर्ग्ग्रावभिः सुतम् ।
उपयामगृहीतोसीन्द्राय त्वा गोमतऽएष ते योनिरिन्द्राय त्वा गोमते ॥५॥

ऋतावानँवैश्वानरमृतस्य ज्ज्योतिषस्प्पतिम् । अजस्रङ्घर्म्ममीमहे ।
उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥६॥

वैश्वानरस्य सुमतौ स्याम राजा हि कम्भुवनानामभिश्रीः । इतो जातो विश्वमि-
दँविचष्टे वैश्वानरो यतते सूर्य्येण । उपयामगृहीतोसि वैश्वानराय त्वैष ते योनि-
र्वैश्वानराय त्वा ॥७॥

वैश्वानरो नऽऊतयऽआप्रयातु परावतः ।
अग्निरुक्थेन वाहसा ।
उपयामगृहीतोसि वैश्वानराय त्वैष ते योनिर्वैश्वानराय त्वा ॥८॥

अग्निरृषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् ।
उपयामगृहीतोस्यग्नये त्वा वर्चसऽएष ते योनिरग्नये त्वा वर्चसे ॥९॥

महाँ२॥ऽइन्द्रो वज्रहस्तः षोडशी शर्म्म यच्छतु । हन्तु पाप्मानँय्योस्मान्द्वेष्टि ।
उपयामगृहीतोसि महेन्द्राय त्वैष ते योनिर्म्महेन्द्राय त्वा ॥१०॥

तँवो दस्म्ममृतीषहँवसोर्म्मन्दानमन्धसः ।
अभि वत्सन्न स्वसरेषु धेनवऽइन्द्रङ्गीर्भिर्नवामहे ॥११॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्वाहिष्ठुन्तद॒ग्नये॑ बृहद॑र्च विभावसो ।
महि॑षीव॒ त्वद्र॒यिस्त्वद्वाजा॒ऽउदी॑रते ॥१२॥
एह्यू॒ षु ब्रवा॑णि॒ तेऽग्न॑ऽइ॒त्थेत॑रा॒ गिर॑ः । ए॒भिर्व॑र्द्धास॒ऽइन्दु॑भिः ॥१३॥
ऋ॒तव॑स्ते य॒ज्ञं वित॑न्वन्तु॒ मासा॑ र॒क्षन्तु॒ ते॒ ह॒विः ।
सं॒व॒त्स॒रस्ते॑ य॒ज्ञन्द॑धातु नः प्र॒जाञ्च॒ परि॑पातु नः ॥१४॥
उ॒प॒ह्व॒रे गि॑री॒णाᳬं स॑ङ्ग॒मे च॑ न॒दीना॑म् । धि॒या विप्रो॑ऽअजायत ॥१५॥

॥२॥ उ॒च्चा ते॑ जा॒तमन्ध॑सो दि॒वि सद्भूम्याद॑दे । उ॒ग्रᳬं शर्म॒ महि॒ श्रव॑ः ॥१६॥
स न॒ऽइन्द्रा॑य॒ यज्य॑वे॒ वरु॑णाय म॒रुद्भ्य॑ः । व॒रि॒वो॒वित्परि॑स्रव ॥१७॥
ए॒ना विश्वा॑न्य॒र्य्यऽआ द्यु॒म्नानि॒ मानु॑षाणाम् । सिषा॑सन्तो वनामहे ॥१८॥
अनु॑ वी॒रैरनु॑ पुष्यास्म॒ गोभि॒रन्वश्वै॒रनु॒ सर्वे॑ण पु॒ष्टैः ।
अनु॒ द्विप॒दानु॒ चतु॑ष्पदा व॒यन्दे॒वा नो॑ य॒ज्ञमृ॑तु॒था न॑यन्तु ॥१९॥
अग्ने॒ पत्नी॑रि॒हाव॑ह दे॒वाना॑मुश॒तीरुप॑ । त्वष्टा॑रᳬं॒ सोम॑पीतये ॥२०॥
अ॒भि य॒ज्ञं गृ॑णीहि नो॒ ग्नावो॒ नेष्टः॒ पिब॑ऽऋ॒तुना॑ । त्वᳬं हि र॑त्न॒धाऽअसि॑ ॥२१॥
द्र॒वि॒णो॒दाः पि॑पीषति जु॒होत॒ प्र च॑ तिष्ठत । ने॒ष्ट्रादृ॒तुभि॑रिष्यत ॥२२॥

तवा॒यᳬं सोम॒स्त्वमेह्य॒र्वाङ्श॑श्वत्त॒मᳬं सु॒मना॑ऽअ॒स्य पा॑हि ।
अ॒स्मिन्य॒ज्ञे ब॒र्हिष्या नि॒षद्या॑ दधि॒ष्वेमं ज॒ठर॒ऽइन्दु॑मिन्द्र ॥२३॥
अ॒मेव॑ नः सुहवा॒ऽआ हि गन्त॑न॒ नि ब॒र्हिषि॑ सदतना॒ रणि॑ष्टन ।
अथा॑ मन्दस्व जुजुषा॒णोऽअन्ध॑स॒स्त्वष्ट॑र्दे॒वेभि॒र्जनि॑भिः सु॒मद्ग॑णः ॥२४॥
स्वादि॑ष्ठया॒ मदि॑ष्ठया॒ पव॑स्व सोम॒ धार॑या । इन्द्रा॑य॒ पात॑वे सु॒तः ॥२५॥
र॒क्षो॒हा वि॒श्वच॑र्षणिर॒भि योनि॒मयो॑हते । द्रोणे॑ स॒धस्थ॒मास॑दत् ॥२६॥

इति षड्विंशोऽध्यायः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ सप्तविंशोऽध्यायः

ऋषिः—अग्निः १—७, १०—२० । प्रजापतिः ८, ९, २१, २२। वसिष्ठः २३, २४, २७, २८, ३५ । हिरण्यगर्भः २५, २६ । गृत्समदः २९, ३२, ३३ । पुरुमीढः ३० । अजमीढः ३१ । अङ्गिरसः ३४ । शम्युबार्हस्पत्यः ३६—३८ । वामदेवः ३९—४१ । शम्युः ४२, ४४, ४५ । भार्गवः ।४३

देवता—अग्निः १, ३—७, ११, १८, ३९, ४३, ४५ । सामिधेन्यः २ । विश्वेदेवाः ८, १२ । अश्व्यादयः ९ । सूर्यः १० । यज्ञः १३, १७, ४२ । वह्निः १४ । वायुः १५, २३, २४, २७—३५, ४४ । देव्यः १६ । इडादयो लिङ्गोक्ताः १९ । त्वष्टा २० । विद्वांसः २१ । इन्द्रः २२, ३७, ३८, ४०, ४१ । प्रजापतिः २५, २६ । परमेश्वरः ३६ ।।

छन्दः—त्रिष्टुप् १, २, ८, ९, २४, २६, २८ । विराट्त्रिष्टुप् ३, ३३, । स्वराट्त्रिष्टुप् ४, २५ । स्वराट्पङ्क्तिः ५, २७ । भुरिग्बृहती ६ । निचृज्जगती ७ । विराडनुष्टुप् १० । उष्णिक् ११, १२ । निचृदुष्णिक् १३, १६, १७, २०, २२ । भुरिगुष्णिक् १४ । स्वराडुष्णिक् १५ । भुरिग्गायत्री १८ । गायत्री १९, ३१, ३२, ३९ । विराडुष्णिक् २१, । निचृत्त्रिष्टुप् २३, । निचृद्गायत्री २९, ३४, ४० । अनुष्टुप् ३० । स्वराडनुष्टुप् ३५, ४३ । निचृत्पङ्क्तिः ३६ । निचृदनुष्टुप् ३७ । स्वराड्बृहती ३८, ४४ । पादनिचृद्गायत्री ४१ । बृहती ४२ । निचृदभिकृतिः ४५ ।।

स्वरः—धैवतः १—४, ८, ९, २३—२६, २८, ३३ । पञ्चमः ५, २७, ३६ । मध्यमः ६, ३८, ४२, ४४ । निषादः ७ । गान्धारः १०, ३०, ३५, ३७, ४३ । ऋषभः ११—१७, २०—२२, ४५ । षड्जः १८, १९, २९, ३१, ३२, ३४, ३९—४१ । निषादः ३८ ।।

॥१॥ समास्त्वाग्नऽऋतवो वर्द्धयन्तु सँवत्सराऽऋषयो यानि सत्या ।
सन्दिव्येन दीदिहि रोचनेन विश्वाऽआभाहि प्रदिशश्चतस्रः ॥१॥
सञ्चेध्यस्वाग्ने प्र च बोधयैनमुच्च तिष्ठ महते सौभगाय ।
मा च रिषदुपसत्ता तेऽअग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥२॥
त्वामग्ने वृणते ब्राह्मणाऽइमे शिवोऽअग्ने सँवरणे भवा नः ।
सपत्नहा नोऽअभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥३॥
इहैवाग्नेऽअधिधारया रयिम्मा त्वा निक्रन्पूर्वचितो निकारिणः ।
क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता वर्द्धतान्तेऽअनिष्टृतः ॥४॥
क्षत्रेणाग्ने स्वायुः सꣳरभस्व मित्रेणाग्ने मित्रधेये यतस्व ।
सजातानाम्मध्यमस्थाऽएधि राज्ञामग्ने विहव्यो दीदिहीह ॥५॥
अति निहोऽअति स्रिधोऽत्यचित्तिमत्यरातिमग्ने ।
विश्वा ह्यग्ने दुरिता सहस्वाथास्मभ्यꣳ सहवीराꣳ रयिन्दाः ॥६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनाधृष्ष्यो जातवेदाऽअनिष्टृतो विराडग्ग्ने क्षत्रभृद्दीदिहीह ।
विश्श्वाऽआशाः प्प्रमुञ्चन्मानुषीर्ब्भियः शिवेभिरद्य परिपाहि नो वृधे ॥७॥
बृहस्प्पते सवितर्ब्बोधयैनꣳ सꣳशितञ्चित्सन्तराꣳ सꣳशिशाधि ।
वर्द्धयैनम्महते सौभगाय विश्श्वऽएनमनुमदन्तु देवाः ॥८॥
अमुत्रभूयादध यद्यमस्य बृहस्प्पतेऽअभिशस्तेरमुञ्चः ।
प्रत्यौहतामश्श्विना मृत्युमस्म्माद्देवानामग्ग्ने भिषजा शचीभिः ॥९॥
उद्वयन्तमसस्प्परि स्वः पश्श्यन्तऽउत्तरम् ।
देवन्देवत्रा सूर्य्यमगन्म ज्ज्योतिरुत्तमम् ॥१०॥

॥२॥ ऊर्द्ध्वाऽअस्य समिधो भवन्त्यूर्द्ध्वा शुक्क्रा शोचीꣳष्यग्ग्नेः ।
द्युमत्तमा सुप्प्रतीकस्य सूनोः ॥११॥
तनूनपादसुरो विश्श्ववेदा देवो देवेषु देवः । पथोऽअनक्तु मद्ध्वा घृतेन ॥१२॥
मद्ध्वा यज्ञन्नक्षसे प्प्रीणानो नराशꣳसोऽअग्ग्ने ।
सुकृद्देवः सविता विश्श्ववारः ॥१३॥
अच्छायमेति शवसा घृतेनेडानो वह्निर्न्नमसा ।
अग्ग्निꣳ स्रुचोऽअद्ध्वरेषु प्प्रयत्सु ॥१४॥
स यक्क्षदस्य महिमानमग्ग्नेः सऽईम्मन्द्रा सुप्प्रयसः ।
वसुश्चेतिष्ठो वसुधातमश्च ॥१५॥
द्वारो देवीरन्न्वस्य विश्श्वे व्रता ददन्तेऽअग्ग्नेः ।
उरुव्यचसो धाम्म्ना पत्त्यमानाः ॥१६॥
तेऽअस्य योषणे दिव्व्ये न योनाऽउषासानक्ता । इमँय्यज्ञमवतामद्ध्वरन्नः ॥१७॥
दैव्या होताराऽऊर्द्ध्वमद्ध्वरन्नोग्ग्नेर्ज्जिह्वामभिगृणीतम् । कृणुतन्नः स्विष्टिम् ॥१८॥
तिस्रो देवीर्ब्बर्हिरेदꣳ सदन्त्विडा सरस्वती भारती । मही गृणाना ॥१९॥
तन्नस्तुरीपमद्भुतम्पुरुक्क्षु त्वष्टा सुवीर्य्यम् ।
रायस्प्पोषँव्विष्ष्यतु नाभिमस्म्मे ॥२०॥
वनस्प्पतेवसृजा रराणस्त्मना देवेषु । अग्ग्निर्हव्व्यꣳ शमिता सूदयाति ॥२१॥
अग्ग्ने स्वाहा कृणुहि जातवेदऽइन्द्राय हव्व्यम् । विश्श्वे देवा हविरिदञ्जुषन्ताम् ॥२२॥

॥३॥ पीवोऽअन्ना रयिवृधः सुमेधाः श्वेतः सिषक्त्ति नियुतामभिश्श्रीः ।
ते वायवे समनसो वितस्त्थुर्व्विश्श्वेन्नरः स्वपत्त्यानि चक्क्रुः ॥२३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राये नु यञ्जज्ञतु रोदसीमे राये देवी धिषणा धाति देवम् ।
अध वायुन्नियुतः सश्चत स्वाऽउत श्वेतँवसुधितिन्निरेके ॥२४॥
आपो ह यद्बृहतीर्विश्वमायन्गर्भन्दधाना जनयन्तीरग्निम् ।
ततो देवानाꣳ समवर्त्ततासुरेकः कस्मै देवाय हविषा विधेम ॥२५॥
यश्चिदापो महिना पर्य्यपश्यद्दक्षन्दधाना जनयन्तीर्य्यज्ञम् ।
यो देवेष्वधि देवऽएकऽआसीत्कस्मै देवाय हविषा विधेम ॥२६॥
प्र याभिर्य्यासि दाश्वाꣳसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिꣳ सुभोजसँय्युवस्व नि वीरङ्गव्यमश्व्यञ्च राधः ॥२७॥
आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् ।
वायोऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥२८॥
नियुत्वान्वायवागह्ययꣳ शुक्रोऽअयामि ते । गन्तासि सुन्वतो गृहम् ॥२९॥
वायो शुक्रोऽअयामि ते मध्वोऽअग्रन्दिविष्टिषु ।
आयाहि सोमपीतये स्पार्हो देव नियुत्वता ॥३०॥
वायुरग्रेगा यज्ञप्रीः साकङ्गन्मनसा यज्ञम् । शिवो नियुद्भिः शिवाभिः ॥३१॥
वायो ये ते सहस्रिणो रथासस्तेभिरागहि । नियुत्वान्त्सोमपीतये ॥३२॥
एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विꣳशती च ।
तिसृभिश्च वहसे त्रिꣳशता च नियुद्भिर्वायविह ता विमुञ्च ॥३३॥
तव वायवृतस्पते त्वष्टुर्जामातरद्भुत । अवाꣳस्या वृणीमहे ॥३४॥

॥४॥ अभि त्वा शूर नोनुमोदुग्धाऽइव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥३५॥
न त्वावाँ२॥ऽअन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥३६॥
त्वामिद्धि हवामहे सातौ वाजस्य कारवः ।
त्वाँवृत्रेष्विन्द्र सत्पतिन्नरस्त्वाङ्काष्ठास्वर्वतः ॥३७॥
स त्वन्नश्चित्र वज्रहस्त धृष्णुया मह स्तवानोऽअद्रिवः ।
गामश्वꣳ रथ्यमिन्द्र सङ्किर सत्रा वाजन्न जिग्युषे ॥३८॥
कया नश्चित्रऽआभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥३९॥
कस्त्वा सत्यो मदानाम्मꣳहिष्ठो मत्सदन्धसः । दृढा चिदारुजे वसु ॥४०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अ·२७, अनु· ४ , मन्त्राः ४१-४५

अभी षु णः सखीनामविता जरितृणाम् । शतम्भवास्यूतये ॥४१॥

युञ्जायज्ञा वोऽअग्नये गिरागिरा च दक्षसे ।

प्रप्र वयममृतञ्जातवेदसम्प्रियम्मित्रन्न शꣳसिषम् ॥४२॥

पाहि नोऽअग्नऽएकया पाह्युत द्वितीयया ।

पाहि गीर्भिस्तिसृभिरूर्ज्जाम्पते पाहि चतसृभिर्वसो ॥४३॥

ऊर्जो नपातꣳ स हिनायमस्म्मयुर्द्दाशेम हव्यदातये ।

भुवद्वाजेष्ष्वविता भुवद्वृध्ऽउत त्राता तनूनाम् ॥४४॥

सँव्वत्सरोसि परिवत्सरोसीदावत्सरोसीद्वत्सरोसि वत्सरोसि । उषसस्ते कल्प्पन्ता-महोरात्रास्ते कल्प्पन्तामर्द्धमासास्ते कल्प्पन्ताम्मासास्ते कल्प्पन्तामृतवस्ते कल्प्प-न्ताꣳ सँव्वत्सरस्ते कल्प्पताम् । प्रेत्त्याऽएत्त्यै सञ्चाञ्च प्प्र च सारय । सुपर्ण्णचिदसि तया देवतयाङ्गिरस्वद्ध्रुवः सीद ॥४५॥

इति सप्तविंशोऽध्यायः

अ·२८, अनु· १ , मन्त्रौ १ - २

अथाष्टाविंशोऽध्यायः

ऋषिः—बृहदुक्थो वामदेवः १—६ । गोतमः ७ । बृहदुक्थो वामदेव्यः ८ । प्रजापतिः ९—११ । अश्विनौ १२—२३ । सरस्वती २४—४६ ॥

देवता—इन्द्रः १—३, ५, ६, ८, ९, ११—१३, १५, १६, १८—२१, २५—२८, ३२, ३३, ३५—४६ । रुद्रः ४ । अश्विनौ ७, १७, ३० । बृहस्पतिः १० । अहोरात्रे १४, २९ । अग्निः २२—२४, ३४ । वाय्वः ३१ ॥

छन्दः—निचृत्त्रिष्टुप् १, ४, २२ । निचृदतिजगती २, ५, ९, १२, ४२, ४३ । स्वराट्पङ्क्तिः ३, १४ । त्रिष्टुप् ६, २१ । जगती ७ । निचृज्जगती ८, स्वराडतिजगती १०, २७, ४५ । निचृच्छक्वरी ११, २६, ३१ । भुरिक्शक्वरी १३, ३०— ३२ । भुरिगतिजगती १५, २५, ३७, ३८, ४४ । भुरिगाकृतिः १६ । भुरिग्जगती १७, ४१ । अतिजगती १८, ४० । कृतिः १९, २३ । निचृदतिशक्वरी २०, २९ । स्वराड्जगती २४ । स्वराट्शक्वरी २८ । निचृदत्यष्टिः ३३ । अतिशक्वरी ३४ । भुरिक्त्रिष्टुप् ३५, ३६ । आकृतिः ४६ ॥

स्वरः—धैवतः १, ४, ६, ११, १३, २१, २२, २६, २८, ३०—३२ ३५, ३६, ३९ । निषादः २, ५, ७—१०, १२, १५, १७—१९, २३—२५, २७, ३७, ३८, ४०—४५ । पञ्चमः ३, १४, १६, २०, २९, ३४, ४६ । गान्धारः ३३ ॥

॥१॥ होता यक्षत्समिधेन्द्रमिडस्प्पदे नाभा पृथिव्याऽअधि ।

दिवो वर्ष्मन्त्समिद्ध्यतऽओजिष्ठश्चर्षणीसहाँवेत्त्वाज्यस्य होतर्य्यज ॥१॥

होता यक्षत्तनूनपातमूतिभिर्ज्जेतारमपराजितम् । इन्द्रन्देवꣳ स्वर्व्विदम्पथिभिर्म्म-धुमत्तमैर्न्नराशꣳसेन तेजसा वेत्त्वाज्यस्य होतर्य्यज ॥२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् ।
देवो देवैः सवीर्य्यो वज्रहस्तः पुरन्दरो वेत्वाज्यस्य होतर्य्यज ॥३॥
होता यक्षद्बर्हिषीन्द्रन्निषद्वरँवृषभन्नर्य्यापसम् ।
वसुभी रुद्रैरादित्यैः सयुग्भिर्बर्हिरासदद्वेत्वाज्यस्य होतर्य्यज ॥४॥
होता यक्षदोजो न वीर्य्यꣳ सहो द्वारऽइन्द्रमवर्द्धयन् । सुप्रायणाऽअस्मिन्यज्ञे
विश्रयन्तामृतावृधो द्वारऽइन्द्राय मीढुषे व्यन्त्वाज्यस्य होतर्य्यज ॥५॥
होता यक्षदुषेऽइन्द्रस्य धेनू सुदुघे मातरा मही ।
सवातरौ न तेजसा वत्समिन्द्रमवर्द्धतांवीतामाज्यस्य होतर्य्यज ॥६॥
होता यक्षद्दैव्या होतारा भिषजा सखाया हविषेन्द्रम्भिषज्यतः ।
कवी देवौ प्रचेतसाविन्द्राय धत्तऽइन्द्रियँवीतामाज्यस्य होतर्य्यज ॥७॥
होता यक्षत्तिस्रो देवीर्न भेषजन्त्रयस्त्रिधातवोपसऽइडा सरस्वती भारती महीः ।
इन्द्रपत्नीर्हविष्मतीर्व्यन्त्वाज्यस्य होतर्य्यज ॥८॥
होता यक्षत्त्वष्टारमिन्द्रन्देवम्भिषजꣳ सुयजङ्घृतश्रियम् ।
पुरुरूपꣳ सुरेतसम्मघोनमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्वाज्यस्य होतर्य्यज ॥९॥
होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुन्धियो जोष्टारमिन्द्रियम् । मध्वा
समञ्जन्पथिभिः सुगेभिः स्वदाति यज्ञम्मधुना घृतेन वेत्वाज्यस्य होतर्य्यज ॥१०॥
होता यक्षदिन्द्रꣳ स्वाहाज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा स्वाहा-
कृतीनाꣳ स्वाहा हव्यसूक्तीनाम् ।
स्वाहा देवाऽआज्यपा जुषाणाऽइन्द्रऽआज्यस्य व्यन्तु होतर्य्यज ॥११॥

॥२॥ देवम्बर्हिरिन्द्रꣳ सुदेवन्देवैर्वीरवत्स्तीर्णँवेद्यामवर्द्धयत् ।
वस्तोर्वृतम्प्राक्तोर्भृतꣳ राया बर्हिष्मतोऽत्यगाद्वसुवने वसुधेयस्य वेतु यज ॥१२॥
देवीर्द्वारऽइन्द्रꣳ सङ्घाते वीड्वीर्य्यामन्नवर्द्धयन् । आ वत्सेन तरुणेन कुमारेण च
मीवतापार्वाणꣳ रेणुककाटन्नुदन्तांवसुवने वसुधेयस्य व्यन्तु यज ॥१३॥
देवीऽउषासानक्तेन्द्रँय्यज्ञे प्रयत्यह्वेताम् ।
दैवीर्विशः प्रायासिष्टाꣳ सुप्रीते सुधिते वसुवने वसुधेयस्य वीताँय्यज ॥१४॥
देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्द्धताम् । अयाव्यन्याघा द्वेषाꣳस्यान्या वक्षद्वसु
वार्य्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीताँय्यज ॥१५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवीऽऊर्जाहुती दुघे सुदुघे पयसेन्द्रमवर्द्धताम् । इषमूर्जमन्या वक्षत्सग्धिꣳ सपी-
तिमन्या नवेन पूर्वन्दयमाने पुराणेन नवमधातामूर्जमूर्जाहुतीऽऊर्जयमाने वसु
वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतांय्यज ॥१६॥

देवा दैव्या होतारा देवमिन्द्रमवर्द्धताम् । हताघशꣳसावाभार्ष्टांवसु वार्याणि यज-
मानाय शिक्षितौ वसुवने वसुधेयस्य वीतांय्यज ॥१७॥

देवीस्तिस्रस्तिस्रो देवीः पतिमिन्द्रमवर्द्धयन् । अस्पृक्षद्भारती दिवꣳ रुद्रैर्य्यज्ञꣳ
सरस्वतीडा वसुमती गृहान्वसुवने वसुधेयस्य व्यन्तु यज ॥१८॥

देवऽइन्द्रो नराशꣳसस्त्रिवरूथस्त्रिबन्धुरो देवमिन्द्रमवर्द्धयत् । शतेन शितिपृष्ठाना-
माहितः सहस्रेण प्प्रवर्त्तते मित्रावरुणेदस्य होत्रमर्हतो बृहस्पति स्तोत्रमश्विना-
ध्वर्य्यवंवसुवने वसुधेयस्य वेतु यज ॥१९॥

देवो देवैर्वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्द्धयत् ।
दिवमग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृꣳहीद्वसुवने वसुधेयस्य वेतु यज ॥२०॥

देवम्बर्हिर्वारितीनान्देवमिन्द्रमवर्द्धयत् ।
स्वासस्थमिन्द्रेणासन्नमन्या बर्हीꣳष्यभ्यभूद्वसुवने वसुधेयस्य वेतु यज ॥२१॥

देवोऽअग्निः स्विष्टकृद्देवमिन्द्रमवर्द्धयत् ।
स्विष्टङ्कुर्वन्त्स्विष्टकृत्स्विष्टमद्य करोतु नो वसुवने वसुधेयस्य वेतु यज ॥२२॥

अग्निमद्य होतारमवृणीतायंय्यजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्नन्निन्द्राय
च्छागम् । सूपस्थाऽअद्य देवो वनस्पतिरभवदिन्द्राय च्छागेन ।
अघत्तम्मेदस्तः प्प्रतिपचताग्रभीदवीवृधत्पुरोडाशेन ॥२३॥

॥३॥ होता यक्षत्समिधानम्महद्यशः सुसमिद्धंवरेण्यमग्निमिन्द्रंवयोधसम् ।
गायत्रीञ्छन्दऽइन्द्रियन्त्र्यविङ्गांवयो दधद्वेत्वाज्यस्य होतर्य्यज ॥२४॥

होता यक्षत्तनूनपातमुद्भिदंय्यङ्गर्भमदितिर्दधे शुचिमिन्द्रंवयोधसम् ।
उष्णिहञ्छन्दऽइन्द्रियन्दित्यवाहङ्गांवयो दधद्वेत्वाज्यस्य होतर्य्यज ॥२५॥

होता यक्षदीडेन्यमीडितंवृत्रहन्तममिडाभिरीड्यꣳ सहः सोममिन्द्रंवयोधसम् ।
अनुष्टुभञ्छन्दऽइन्द्रियम्पञ्चाविङ्गांवयो दधद्वेत्वाज्यस्य होतर्य्यज ॥२६॥

होता यक्षत्सुबर्हिषम्पूषण्वन्तममर्त्यꣳ सीदन्तम्बर्हिषि प्प्रियेऽमृतेन्द्रंवयोधसम् ।
बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गांवयो दधद्वेत्वाज्यस्य होतर्य्यज ॥२७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

होता यक्षद्व्यचस्वतीः सुप्रायणाऽऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रं-
वयोधसम् । पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्यवाहङ्गाँवयो दधद्व्यन्त्वाज्यस्य होतर्य्यज ॥२८॥
होता यक्षत्सुपेशसा सुशिल्पे बृहतीऽउभे नक्तोषासा न दर्शते विश्वमिन्द्रंवयो-
धसम् । त्रिष्टुभञ्छन्दऽइहेन्द्रियम्पष्ठवाहङ्गाँवयो दधद्वीतामाज्यस्य होतर्य्यज ॥२९॥
होता यक्षत्प्रचेतसा देवानामुत्तमँय्यशो होतारा दैव्या कवी सयुजेन्द्रंवयोधसम् ।
जगतीञ्छन्दऽइन्द्रियमनड्वाहङ्गाँवयो दधद्वीतामाज्यस्य होतर्य्यज ॥३०॥
होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृहतीर्म्महीः पतिमिन्द्रंवयो-
धसम् । विराजञ्छन्दऽइहेन्द्रियन्धेनुङ्गान्न वयो दधद्व्यन्त्वाज्यस्य होतर्य्यज ॥३१॥
होता यक्षत्सुरेतसन्त्वष्टारम्पुष्टिवर्द्धनꣳ रूपाणि बिभ्रतम्पृथक्पुष्टिमिन्द्रंवयो-
धसम् । द्विपदञ्छन्दऽइन्द्रियमुक्षाणङ्गान्न वयो दधद्वेत्वाज्यस्य होतर्य्यज ॥३२॥
होता यक्षद्वनस्पतिꣳ शमितारꣳ शतक्रतुꣳ हिरण्यपर्णमुक्थिनꣳ रशनाम्बि-
भ्रतँवशिम्भगमिन्द्रंवयोधसम् । ककुभञ्छन्दऽइहेन्द्रियँवशाँवेहतङ्गाँवयो दधद्वेत्वा-
ज्यस्य होतर्य्यज ॥३३॥
होता यक्षत्स्वाहाकृतीरग्निङ्गृहपतिम्पृथग्वरुणम्भेषजङ्कविङ्क्षत्रमिन्द्रंवयोधसम् ।
अतिच्छन्दसञ्छन्दऽइन्द्रियम्बृहदृषभङ्गाँवयो दधद्व्यन्त्वाज्यस्य होतर्य्यज ॥३४॥

॥४॥ देवम्बर्हिर्वयोधसन्देवमिन्द्रमवर्द्धयत् । गायत्र्या च्छन्दसेन्द्रियञ्चक्षुरिन्द्रे वयो दध-
द्वसुवने वसुधेयस्य वेतु यज ॥३५॥
देवीर्द्वारो वयोधसꣳ शुचिमिन्द्रमवर्द्धयन् ।
उष्णिहा च्छन्दसेन्द्रियम्प्राणमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥३६॥
देवीऽउषासानक्ता देवमिन्द्रंवयोधसन्देवी देवमवर्द्धताम् ।
अनुष्टुभा च्छन्दसेन्द्रियम्बलमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीताँय्यज ॥३७॥
देवी जोष्ट्री वसुधिती देवमिन्द्रंवयोधसन्देवी देवमवर्द्धताम् ।
बृहत्या च्छन्दसेन्द्रियꣳ श्रोत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीताँय्यज ॥३८॥
देवीऽऊर्ज्जाहुती दुघे सुदुघे पयसेन्द्रंवयोधसन्देवी देवमवर्द्धताम् ।
पङ्क्त्या च्छन्दसेन्द्रियꣳ शुक्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीताँय्यज ॥३९॥
देवा दैव्या होतारा देवमिन्द्रंवयोधसन्देवौ देवमवर्द्धताम् ।
त्रिष्टुभा च्छन्दसेन्द्रियन्त्विषिमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वीताँय्यज ॥४०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवीस्तिस्रस्तिस्रो देवीर्वयोधसम्पतिमिन्द्रमवर्द्धयन् ।
जगत्या च्छन्दसेन्द्रियꣳ शूषमिन्द्रे वयो दधद्वसुवने वसुधेयस्य व्यन्तु यज ॥४१॥

देवो नराशꣳसो देवमिन्द्रँवयोधसन्देवो देवमवर्द्धयत् ।
विराजा च्छन्दसेन्द्रियꣳ रूपमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४२॥

देवो वनस्पतिर्देवमिन्द्रँवयोधसन्देवो देवमवर्द्धयत् ।
द्विपदा च्छन्दसेन्द्रियम्भगमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४३॥

देवम्बर्हिर्वारितीनान्देवमिन्द्रँवयोधसन्देवन्देवमवर्द्धयत् ।
ककुभा च्छन्दसेन्द्रियँय्यशऽइन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४४॥

देवोऽअग्निः स्विष्टकृद्देवमिन्द्रँवयोधसन्देवो देवमवर्द्धयत् ।
अतिच्छन्दसा च्छन्दसेन्द्रियङ्क्षत्रमिन्द्रे वयो दधद्वसुवने वसुधेयस्य वेतु यज ॥४५॥

अग्निमद्य होतारमवृणीतायँय्यजमानः पचन्पक्तीः पचन्पुरोडाशम्बध्नन्निन्द्राय वयोधसे च्छागम् । सूपस्थाऽअद्य देवो वनस्पतिरभवदिन्द्राय वयोधसे च्छागेन । अघत्तम्मेदस्तः प्रतिपचताग्रभीदवीवृधत्पुरोडाशेन ॥४६॥

इत्यष्टाविंशोऽध्यायः

अथैकोनत्रिंशोऽध्यायः

ऋषिः—बृहदुक्थो वामदेव्यः १—११ । भार्गवो जमदग्निः १२—२४ । जमदग्निः २५—३६ । मधुच्छन्दाः ३७ । भारद्वाजः ३८—६० ॥

देवता—अग्निः १—५, ११, १३—१८, २०, २८, ३५ । मनुष्याः ६, २१, २३ । अश्विनौ ७ । सरस्वती ८ । त्वष्टा ९ । सूर्यः १० । यजमानः १२ । मनुष्यः १९, २४ । वायवः २२ । विद्वान् २५—२७, ३४, ३८ । अन्तरिक्षम् २९ । स्त्रियः ३०, ३१ । विद्वांसः ३२, ३६, ३७, ५८ । वाग् ३३ । वीराः ३९—४६, ४८—५०, ५५ । धनुर्वेदाध्यापकाः ४७ । महावीरः सेनापतिः ५१ । सुवीरः ५२ । वीरः ५३, ५४ । वादयितारो वीराः ५६, ५७ । अग्न्यादयः ५९, ६० ॥

छन्दः—त्रिष्टुप् १, ५—९, ११, १२, १७, १८, २७, ३१, ३४, ३९, ४१, ४२, ४४—४६, ४८, ५१ । विराट्त्रिष्टुप् २, १४, १९, २२ । पङ्क्तिः ३ । निचृत्त्रिष्टुप् ४, १०, १६, २०, २४—२६, ३०, ३५, ३६, ३८, ४०, ५४ । भुरिक्त्रिष्टुप् १३, ५५, ५६ । भुरिक्पङ्क्तिः १५, २१, २३, २९, ३३, ५२, ५७ । स्वराड्बृहती २८ । आर्षीत्रिष्टुप् ३२ । गायत्री ३७ । जगती ४३ । विराड्जगती ४७, ५३ । विराडनुष्टुप् ४९, ५० । भुरिगत्यष्टिः ५८ । भुरिगतिशक्वरी ५९ । विराट्प्रकृतिः[क], प्रकृतिः[ख] ६० ॥

स्वरः—धैवतः १, २, ४—१४, १६—२०, २२, २४—२७, ३०—३२, ३४—३६, ३८—४२, ४४—४६, ४८, ५१, ५४—५६, ६० । पञ्चमः ३, १५, २१, २३, २९, ३३, ५२, ५७, ५९ । मध्यमः २८ । षड्जः ३७ । निषादः ४३, ४७, ५३ । गान्धारः ४९, ५०, ५८ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥१॥ समिद्धोऽअञ्जन्कृदरम्मतीनाङ्घृतमग्ग्ने मधुमुत्पिन्वमानः ।
वाजी वहन्वाजिनञ्जातवेदो देवानाँवक्षि प्प्रियमा सधस्त्थम् ॥१॥
घृतेनाञ्जन्त्सम्पथो देवयानान्प्रजानन्वाज्यप्प्येतु देवान् ।
अनु त्त्वा सप्प्ते प्प्रदिशः सचन्ताछं स्वधामस्म्मै यजमानाय धेहि ॥२॥
ईड्यश्चासि वन्द्यश्च वाजिन्नाशुश्चासि मेद्ध्यश्च सप्प्ते ।
अग्निष्ट्वा देवैर्वसुभिः सजोषाः प्प्रीतँवह्निँवहतु जातवेदाः ॥३॥
स्तीर्ण्णम्बर्हिः सुष्टरीमा जुषाणोरु पृथु प्प्रथमानम्पृथिव्याम् ।
देवेभिर्युक्तमदितिः सजोषाः स्योनङ्कृण्वाना सुविते दधातु ॥४॥
एताऽउ वः सुभगा विश्श्वरूपा वि पक्क्षोभिः श्रयमाणाऽउदातैः ।
ऋष्वाः सतीः कवषः शुम्भमाना द्वारो देवीः सुप्प्रायणा भवन्तु ॥५॥
अन्तरा मित्त्रावरुणा चरन्ती मुखँय्यज्ञानामभिसँविदाने ।
उषासा वाछं सुहिरण्ण्ये सुशिल्प्पेऽऋतस्य योनाविह सादयामि ॥६॥
प्रथमा वाछं सरथिना सुवर्ण्णा देवौ पश्श्यन्तौ भुवनानि विश्श्वा ।
अपिप्प्रयञ्चोदना वाम्मिमाना होतारा ज्ज्योतिः प्प्रदिशा दिशन्ता ॥७॥
आदित्त्यैर्न्नो भारती वष्टु यज्ञꣳ सरस्वती सह रुद्रैर्न्नऽआवीत् ।
इडोपहूता वसुभिः सजोषा यज्ञन्नो देवीरमृतेषु धत्त ॥८॥
त्वष्टा वीरन्देवकामञ्जजान त्वष्टुरर्वा जायतऽआशुरश्श्वः ।
त्वष्टेदँविश्श्वम्भुवनञ्जजान बहोः कर्त्तारमिह यक्क्षि होतः ॥९॥
अश्श्वो घृतेन त्त्मन्या समक्तऽउप देवाँ२ऽऋतुशः पाथऽएतु ।
वनस्प्पतिर्देवलोकम्प्रजानन्नग्निना हव्या स्वदितानि वक्क्षत् ॥१०॥
प्रजापतेस्त्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ग्ने ।
स्वाहाकृतेन हविषा पुरोगा याहि साद्ध्या हविरदन्तु देवाः ॥११॥
॥२॥ यदक्क्रन्दः प्प्रथमञ्जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात् ।
श्श्येनस्य पक्क्षा हरिणस्य बाहूऽउपस्तुत्त्यम्महि जातन्तेऽअर्वन् ॥१२॥
यमेन दत्तन्त्रितऽएनमायुनगिन्द्रऽएणम्प्रथमोऽअद्ध्यतिष्ठत् ।
गन्धर्वोऽअस्य रशनामगृब्भ्णात्त्सूरादश्श्वँवसवो निरतष्ट ॥१३॥
असि यमोऽअस्यादित्त्योऽअर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्तऽआहुस्ते त्त्रीणि दिवि बन्धनानि ॥१४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रीणि तऽआहुर्द्दिवि बन्धनानि त्रीण्ण्युप्प्सु त्रीण्ण्युन्तः समुद्द्रे ।
उतेव मे व्वरुणश्छन्त्स्यर्व्वुन्यत्रा तऽआहुः परमञ्जनित्रम् ॥१५॥
इमा ते व्वाजिन्नवमार्जनानीमा शुफानांᳬ सनितुर्न्निधाना ।
अत्त्रा ते भुद्द्रा रशनाऽअपश्श्यमृतस्य याऽअभिरक्षन्ति गोपाः ॥१६॥
आत्त्मानन्ते मनसारादजानामुवो दिवा पुतयन्तम्पतुङ्गम् ।
शिरोऽअपश्श्यम्पुथिभिः सुगेभिररेणुभिर्ज्जेहमानम्पतत्त्रि ॥१७॥
अत्त्रा ते रूपमुत्तममपश्श्युञ्जिगीषमाणमिषऽआ पुदे गोः ।
युदा ते मर्त्तोऽअनु भोगमानडादिद्ग्रसिष्ट्ठऽओषधीरजीगः ॥१८॥
अनु त्त्वा रथोऽअनु मर्य्योऽअर्व्वुन्ननु गावोनु भगः कुनीनाम् ।
अनु व्व्रातासुस्तवं सुक्ख्यमीयुरनु देवा ममिरे व्वीर्य्यन्ते ॥१९॥
हिरण्ण्यशृङ्गोयोऽअस्य पादा मनोजवाऽअवरऽइन्द्रऽआसीत् ।
देवाऽइदस्य हविरद्यमायुन्योऽअर्व्वन्तम्प्रथमोऽअद्ध्यतिष्ट्ठत् ॥२०॥
ईर्म्मान्तासः सिलिकमद्ध्यमासः सᳬ शूरणासो दिव्व्यासोऽअत्त्याः ।
हᳬसाऽइव श्श्रेणिशो यतन्ते यदाक्षिषुर्द्दिव्यमज्ज्ममश्श्वाः ॥२१॥
तव शरीरम्पतयिष्ण्वर्व्वन्तवं चित्तँव्वातऽइव ध्ध्रजीमान् ।
तव श्शृङ्गाणि विष्ट्ठिता पुरुत्त्रारण्ण्येषु जर्ब्भुराणा चरन्ति ॥२२॥
उपप्प्रागाच्छसनँव्वाज्यर्व्वा देवद्द्रीचा मनसा दीद्ध्यानः ।
अजः पुरो नीयते नाभिरस्यानु पुश्चात्त्कुवयो यन्ति रेभाः ॥२३॥
उपप्प्रागात्त्परमँय्यत्सुधस्त्थमर्व्वाँ२ऽअच्छा पितरम्मातरञ्च ।
अद्द्या देवाञ्जुष्टतमो हि गम्म्याऽअथाशास्त्ते दाशुषे वार्य्याणि ॥२४॥

॥३॥ समिद्धोऽअद्द्य मनुषो दुरोणे देवो देवान्न्यजसि जातवेदः ।
आ च वह मित्त्रमहश्चिकित्त्वान्त्वन्दूतः कुविरसि प्प्रचेताः ॥२५॥
तनूनपात्त्पुथऽऋुतस्य यानान्म्मद्ध्वा समुञ्जन्त्स्वदया सुजिह्व ।
मन्म्मानि धीभिरुत युज्ञमृन्धन्देवत्रा च कृणुह्यद्ध्वरन्नः ॥२६॥
नराशᳬसस्य महिमानमेषामुपस्त्तोषाम यजुतस्य युज्ञैः ।
ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवाऽउभयानि हव्व्या ॥२७॥
आजुह्वानऽईड्ड्यो वन्द्यश्चायाह्यग्ग्ने व्वसुभिः सुजोषाः ।
त्त्वन्देवानामसि यह्व होता सऽएनान्यक्षीषितो यजीयान् ॥२८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राचीनम्बर्हिः प्प्रदिशा पृथिव्या वस्तोरस्या वृज्यतेऽअग्ग्रेऽअह्नाम् ।
व्यु प्प्रथते वितुरँवरीयो देवेब्भ्योऽअदितये स्योनम् ॥२९॥
व्यचस्वतीरुर्विया विश्श्रयन्ताम्पतिब्भ्यो न जनयुः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्श्वमिन्वा देवेब्भ्यो भवत सुप्प्रायुणाः ॥३०॥
आ सुष्ष्वयन्ती यजुतेऽउपाकेऽउषासानक्ता सदतान्नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मेऽअधि श्श्रियंᳪ शुक्रपिशन्दधाने ॥३१॥
दैव्या होतारा प्प्रथमा सुवाचा मिमाना युज्ञम्मनुषो यजद्ध्यै ।
प्रचोदयन्ता विदथेषु कारू प्प्राचीनञ्ज्योतिः प्प्रदिशा दिशन्ता ॥३२॥
आ नो युज्ञम्भारती तूयमेत्त्विडा मनुष्ष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदᳪं स्योनᳪ सरस्वती स्वपसः सदन्तु ॥३३॥
यऽइमे द्यावापृथिवी जनित्री रूपैरपिᳪशद्भुवनानि विश्श्वा ।
तमुद्य होतरिषितो यजीयान्देवन्त्वष्टारमिह यक्षि विद्वान् ॥३४॥
उपावसृज त्त्मन्न्या समुञ्जन्देवानाम्पाथऽऋतुथा हवीᳪषि ।
वनस्प्पतिः शमिता देवोऽअग्निः स्वदन्तु हव्यम्मधुना घृतेन ॥३५॥
सुद्यो जातो व्यमिमीत युज्ञमुग्निर्देवानामभवत्पुरोगाः ।
अस्य होतुः प्प्रदिश्श्यृतस्य वाचि स्वाहाकृतᳪ हविरदन्तु देवाः ॥३६॥

॥४॥ केतुङ्कृण्वन्नकेतवे पेशो मर्य्याऽअपेशसे । समुषद्भिरजायथाः ॥३७॥
जीमूतस्येव भवति प्प्रतीकँय्यद्वर्म्मी याति सुमदामुपस्थे ।
अनाविद्धया तुन्वा जय त्त्वᳪ स त्त्वा वर्म्मणो महिमा पिपर्त्तु ॥३८॥
धन्वना गा धन्वनाजिञ्जयेम धन्वना तीव्राः सुमदो जयेम ।
धनुः शत्रोरपकामङ्कृणोति धन्वना सर्वाः प्प्रदिशो जयेम ॥३९॥
वुक्ष्यन्तीवेदागनीगन्ति कर्णम्प्रियᳪ सखायम्परिषस्वजाना ।
योषेव शिङ्क्ते वितताधि धन्वञ्ज्याऽइयᳪ समने पारयन्ती ॥४०॥
तेऽआचरन्ती समनेव योषा मातेव पुत्रम्बिभृतामुपस्थे ।
अप शत्रून्विद्ध्यताᳪ सँविदानेऽआर्त्नीऽइमे विष्फुरन्तीऽअमित्रान् ॥४१॥
बह्वीनाम्पिता बहुरस्य पुत्रश्चिश्चाकृणोति समनावगत्त्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्प्रसूतः ॥४२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयते सुषारथिः ।
अभीशूनाम्महिमानम्पनायत मनः पश्चादनुयच्छन्ति रश्मयः ॥४३॥
तीव्रान्घोषान्कृण्वते वृषपाणयोश्वा रथेभिः सह वाजयन्तः ।
अवक्रामन्तः प्रपदैरमित्रान्क्षिणन्ति शत्रूँ॥रनपव्ययन्तः ॥४४॥
रथवाहनꣳ हविरस्य नाम यत्रायुधन्निहितमस्य वर्म्म ।
तत्रा रथमुप शग्मꣳ सदेम विश्वाहा वयꣳ सुमनस्यमानाः ॥४५॥
स्वादुषꣳसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवन्तो गभीराः ।
चित्रसेनाऽइषुबलाऽअमृध्राः सतोवीराऽउरवो व्रातसाहाः ॥४६॥
ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवीऽअनेहसा ।
पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नोऽअघशꣳसऽईशत ॥४७॥
सुपर्णँवस्ते मृगोऽअस्या दन्तो गोभिः सन्नद्धा पतति प्रसूता ।
यत्रा नरः सञ्च वि च द्रवन्ति तत्रास्मभ्यमिषवः शर्म्म यꣳसन् ॥४८॥
ऋजीते परिवृङ्धि नोश्मा भवतु नस्तनूः ।
सोमोऽअधिब्रवीतु नोदितिः शर्म्म यच्छतु ॥४९॥
आजङ्घन्ति सान्वेषाञ्जघनाँ॥ऽउपजिघ्नते ।
अश्वाजनि प्रचेतसोश्वान्त्समत्सु चोदय ॥५०॥
अहिरिव भोगैः पर्य्येति बाहुञ्ज्याया हेतिम्परिबाधमानः ।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमाꣳसम्परिपातु विश्वतः ॥५१॥
वनस्पते वीड्वङ्गो हि भूयाऽअस्मत्सखा प्रतरणः सुवीरः ।
गोभिः सन्नद्धोऽअसि वीडयस्वास्थाता ते जयतु जेत्वानि ॥५२॥
दिवः पृथिव्याः पर्य्योजऽउद्भृतँवनस्पतिभ्यः पर्य्याभृतꣳ सहः ।
अपामोज्मानम्परि गोभिरावृतमिन्द्रस्य वज्रꣳ हविषा रथँय्यज ॥५३ ॥
इन्द्रस्य वज्रो मरुतामनीकम्मित्रस्य गर्भो वरुणस्य नाभिः ।
सेमान्नो हव्यदातिञ्जुषाणो देव रथ प्रति हव्या गृभाय ॥५४॥
उपश्वासय पृथिवीमुत द्याम्पुरुत्रा ते मनुताँविष्ठितञ्जगत् ।
स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयोऽअपसेध शत्रून् ॥५५॥
आक्रन्दय बलमोजो नऽआधा निष्टनिहि दुरिता बाधमानः ।
अपप्रोथ दुन्दुभे दुच्छुनाऽइतऽइन्द्रस्य मुष्टिरसि वीडयस्व ॥५६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आमूरंज प्प्रत्त्यावर्त्तयेमाः केतुमद्दुन्दुभिर्वावदीति ।
समश्श्वपर्ण्णाश्चरन्ति नो नरोस्म्माकमिन्द्र रथिनो जयन्तु ॥५७॥

आग्नेयः कृष्ण्णग्ग्रीवः सारस्वती मेषी बब्भ्रुः सौम्म्यः पौष्ण्णः श्यामः शितिपृष्ठो बार्हस्प्पत्त्यः शिल्प्पो वैश्श्वदेवऽऐन्द्रोरुणो मारुतः कुल्म्माषऽऐन्द्राग्नः सꣳहितोधोरामः सावित्रो वारुणः कृष्ण्णऽएकशितिपात्त्पेत्त्वः ॥५८॥

अग्नयेनीकवते रोहिताञ्जिरनड्वानधोरामौ सावित्रौ पौष्ण्णौ रजतनाभी वैश्श्वदेवौ पिशङ्गौ तूपरौ मारुतः कुल्म्माषऽआग्नेयः कृष्ण्णोजः सारस्वती मेषी वारुणः पेत्त्वः ॥५९॥

क अग्नये गायत्राय त्रिवृते राथन्तरायाष्ष्टाकपालऽइन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय़ैकादशकपालो विश्श्वेब्भ्यो देवेब्भ्यो जागतेब्भ्यः सप्तदशेब्भ्यो वैरूपेब्भ्यो द्वादशकपालो मित्रावरुणाब्भ्यामानुष्टुभाब्भ्यामेकविꣳशाब्भ्याँवैराजाब्भ्याम्पयस्या बृहस्प्पतये पाङ्क्ताय त्रिणवाय शाक्वराय चरुः सवित्रऽऔष्ण्णिहाय त्रयस्त्रिꣳशाय रैवताय द्वादशकपालः प्प्राजापत्त्यश्चरुरदित्यै विष्ण्णुपत्न्यै चरुरग्नये वैश्श्वानराय द्वादशकपालोनुमत्त्याऽअष्टाकपालः ॥६०॥

इत्येकोनत्रिंशोऽध्यायः

अथ त्रिंशोऽध्यायः

अ·३०,अनु·१,मन्त्रः१

ऋषिः—नारायणः १—३, ५—२२ । मेधातिथिः ४ ॥

देवता—सविता १—४ । परमेश्वरः ५, ६ । विद्वांसः ७, ८ । विद्वान् ९—१२ । ईश्वरः १३ । राजेश्वरौ १४—२२ ॥

छन्दः—त्रिष्टुप् १ । निचृद्गायत्री २ । गायत्री ३, ४ । स्वराडतिशक्वरी ५, ११ । निचृदष्टिः ६, ७ । कृतिः ८, १३ । भुरिगत्यष्टिः ९, १०, २१ । विराट् संकृतिः १२ । निचृदत्यष्टिः १४ । विराट्कृतिः १५, १६ । विराड्धृतिः १७ । निचृत्प्रकृतिः १८ । भुरिग्धृतिः १९ । भुरिगतिजगती २० । निचृत्कृतिः २२ ॥

स्वरः—धैवतः १, १८ । षड्जः २—४ । पञ्चमः ५, ११ । मध्यमः ६, ७ । निषादः ८, १३, १५, १६, २०, २२ । गान्धारः ९, १०, १२, १४, २१ । ऋषभः १७, १९ ॥

॥१॥ देव सवितः प्प्रसुव यज्ज्ञम्प्रसुव यज्ज्ञपतिम्भगाय ।
दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्प्पतिर्वाचन्नः स्वदतु ॥१॥
दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्प्पतिर्वाचन्नः स्वदतु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्त्सवितुर्वरेण्ण्यम्भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥२॥
विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रन्तन्नऽआसुव ॥३॥
विभक्तारꣳ हवामहे वसोश्चित्रस्य राधसः । सवितारन्नृचक्क्षसम् ॥४॥
ब्रह्मणे ब्राह्मणङ्क्षत्राय राजन्यम्मरुद्भ्यो वैश्श्यन्तपसे शूद्रन्तमसे तस्करन्नारकाय वीरहणम्पाप्प्मने क्लीबमाक्क्रयायाऽअयोगूङ्कामाय पुँश्चलूमतिक्क्रुष्टाय मागधम् ॥५॥
नृत्ताय सूतङ्गीताय शैलूषन्धर्म्माय सभाचरन्नरिष्ठायै भीमलन्नर्म्माय रेभꣳ हसाय कारिमानन्दाय स्त्रीषखम्प्रमदे कुमारीपुत्रम्मेधायै रथकारन्धैर्य्याय तक्क्षाणम् ॥६॥
॥२॥ तपसे कौलालम्मायायै कर्म्मारꣳ रूपाय मणिकारꣳ शुभे वपꣳ शरव्व्यायाऽइषुकारꣳ हेत्यै धनुष्कारङ्कर्म्मणे ज्ज्याकारन्दिष्टाय रज्जुसर्जम्मृत्यवे मृगयुमन्तकाय श्वनिनम् ॥७॥
नदीब्भ्यः पौञ्जिष्ठमृक्षीकाब्भ्यो नैषादम्पुरुषव्याग्घ्राय दुर्म्मदङ्गन्धर्वाप्प्सरोब्भ्यो व्रात्त्यम्प्रयुग्ग्भ्यऽउन्मत्तꣳ सर्प्पदेवजनेब्भ्योऽप्प्रतिपदमयेब्भ्यः कितवमीर्य्यतायाऽअकितवम्पिशाचेब्भ्यो बिदलकारीँय्यातुधानेब्भ्यः कण्टकीकारीम् ॥८॥
सन्धये जारङ्गेहायोपपतिमार्त्त्यै परिवित्तन्निर्ऋत्त्यै परिविविदानमराद्ध्याऽएदिधिषुःपतिन्निष्कृत्त्यै पेशस्कारीꣳ सञ्ज्ञानाय स्मरकारीम्प्रकामोद्यायोपसदँव्वर्णायानुरुधम्बलायोपदाम् ॥९॥
उत्सादेब्भ्यः कुब्जम्प्रमुदे वामनन्द्वाब्भ्यः स्स्रामꣳ स्वप्नायान्धमधर्म्माय बधिरम्पवित्राय भिषजम्प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्प्रश्निनमुपशिक्षायाऽअभिप्प्रश्निनम्मर्य्यादायै प्रश्नविवाकम् ॥१०॥
अर्म्मेब्भ्यो हस्तिपञ्जवायाश्वपम्पुष्ट्यै गोपालँव्वीर्य्यायाविपालन्तेजसेऽजपालमिरायै कीनाशङ्कीलालाय सुराकारम्भद्राय गृहपꣳ श्रेयसे वित्तधमाद्ध्यक्क्ष्यायानुक्क्षत्तारम् ॥११॥
भायै दार्वाहारम्प्रभायाऽअग्न्येधम्ब्रध्नस्य विष्टपायाभिषेक्क्तारँव्वर्षिष्ठाय नाकाय परिवेष्टारन्देवलोकाय पेशितारम्मनुष्ष्यलोकाय प्प्रकरितारꣳ सर्वेब्भ्यो लोकेब्भ्यऽउपसेक्क्तारमवऽऋत्त्यै वधायोपमन्थितारम्मेधाय वासःपल्पूलीम्प्रकामाय रजयित्रीम् ॥१२॥
ऋतये स्तेनहृदयँव्वैरहत्त्याय पिशुनँव्विविक्त्त्यै क्क्षत्तारमौपद्द्रष्ट्र्यायानुक्क्षत्तारम्बलायानुचरम्भूम्ने परिष्कन्दम्प्रियाय प्प्रियवादिनमरिष्ट्याऽअश्वसादꣳ स्वर्ग्गाय लोकाय भागदुघँव्वर्षिष्ठाय नाकाय परिवेष्टारम् ॥१३॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मुन्न्यवेयस्त्तापङ्क्रोधाय निसुरँय्योगाय योक्क्तारꣳ शोकायाभिसुर्त्तारङ्क्षेमाय विमो-
क्क्तारमुत्त्कूलनिकूलेब्भ्यस्त्रिष्ष्ठिनँवपुषे मानस्कृतꣳ शीलायाञ्जनीकारीन्निर्ऋत्त्यै कोश-
कारीँय्यमायासूम् ॥१४॥

यमाय यमसूमथर्व्वब्भ्योवतोकाꣳ सँवत्त्सराय पर्य्यायिणीम्परिवत्त्सरायाविजातामि-
दावत्त्सरायातीत्त्वरीमिद्वत्त्सरायातिष्क्कद्वरीँवत्त्सराय विजर्ज्जराꣳ सँवत्त्सराय पलि-
क्क्नीमृभुब्भ्योजिनसन्धꣳ साद्ध्येब्भ्यश्श्चर्म्मम्न्नम् ॥१५॥

सरोब्भ्यो धैवरमुपस्त्थावराब्भ्यो दाशँवैशन्ताब्भ्यो बैन्दन्नड्वलाब्भ्यः शौष्क्कलम्पा-
राय मार्ग्गारमवाराय कैवर्त्तन्तीर्त्थेब्भ्यऽआन्दँविषमेब्भ्यो मैनालꣳ स्वनेब्भ्यः
पर्ण्णकुड्हाब्भ्यः किरातꣳ सानुब्भ्यो जम्भकम्पर्व्वतेब्भ्यः किम्पूरुषम् ॥१६॥

बीभत्त्सायै पौल्क्कसँवर्ण्णाय हिरण्ण्यकारन्तुलायै वाणिजम्पश्श्चादोषाय ग्लाविनँवि-
श्श्वेब्भ्यो भूतेब्भ्यः सिद्ध्मलम्भूत्त्यै जागरणमभूत्त्यै स्वपनमात्त्यै जनवादिनँव्यृद्ध्याऽ
अपगल्भꣳ सꣳशराय प्प्रच्छिदम् ॥१७॥

अक्क्षराजाय कितवङ्कृतायादिनवदर्शन्त्रेतायै कल्प्पिनन्द्वापरायाधिकल्प्पिनमास्क-
न्दाय सभास्त्थाणुम्मृत्त्यवे गोव्व्यच्छमन्तकाय गोघातङ्क्षुधे यो गाँविकृन्तन्तम्भिक्क्ष-
माणऽउपतिष्ठति दुष्कृताय चरकाचार्य्यम्पाप्प्मने सैलगम् ॥१८॥

प्प्रतिश्श्रुत्त्कायाऽअर्त्तनङ्घोषाय भषमन्ताय बहुवादिनमनन्ताय मूकꣳ शब्दायाडम्ब-
राघातम्महसे वीणावादङ्क्रोशाय तूणवद्ध्ममवरस्प्पराय शङ्खद्ध्मँवनाय वनपमन्न्यतो-
रण्ण्याय दावपम् ॥१९॥

नर्म्माय पुँश्श्चलूꣳ हसाय कारिँय्यादसे शाबल्ल्याङ्ग्रामण्ण्यङ्गणकमभिक्क्रोशकन्ता-
न्महसे वीणावादम्पाणिघ्घ्नन्तूणवद्ध्मन्तान्नृत्ताायानन्दाय तलवम् ॥२०॥

अग्ग्नये पीवानम्पृथिव्व्यै पीठसर्प्पिणँवायवे चाण्डालमन्तरिक्क्षाय वꣳशनर्त्तिनन्दिवे
खलतिꣳ सूर्य्याय हर्य्यक्क्षन्नक्क्षत्रेब्भ्यः किर्म्मिरञ्चन्द्रमसे किलासमह्ने शुक्क्लम्पि-
ङ्गाक्क्षꣳ रात्र्यै कृष्ण्णम्पिङ्गाक्क्षम् ॥२१॥

अथैतानष्टौ विरूपानालभतेतिदीर्ग्घञ्चातिह्रस्वञ्चातिस्त्थूलञ्चातिकृशञ्चातिशुक्क्लञ्चा-
तिकृष्ण्णञ्चातिकुल्वञ्चातिलोमशञ्च। अशूद्द्राऽअब्ब्राह्मणास्त्ते प्प्राजापत्त्याः। मागधः
पुँश्श्चली कितवः क्क्लीबोशूद्द्राऽअब्ब्राह्मणास्त्ते प्प्राजापत्त्याः ॥२२॥

इति त्रिंशोऽध्यायः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथैकत्रिंशोऽध्यायः

ऋषिः—नारायणः १—१६ । उत्तरनारायणः १७—२२ ।

देवता—पुरुषः १, ३, ४, ६, ८—१६ । ईशानः २ । स्रष्टा ५ । स्रष्टेश्वरः ७ । आदित्यः १७—१९, २२ । सूर्यः २० । विश्वेदेवाः २१ ।।

छन्दः—निचृदनुष्टुप् १—३, ८—११, १४ । अनुष्टुप् ४, ५, ७, १२, १३, १५, २०, २१ । विराडनुष्टुप् ६ । विराट्त्रिष्टुप् १६ । भुरिक्त्रिष्टुप् १७, १९ । निचृत्त्रिष्टुप् १८ । निचृदार्षीत्रिष्टुप् २२ ।।

स्वरः—गान्धारः १—१५, २०, २१ । धैवतः १६—१९, २२ ।।

॥१॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥१॥
पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥
एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥३॥
त्रिपादूर्ध्वऽउदैत्पुरुषः पादोऽस्येहाभवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ॥४॥
ततो विराडजायत विराजोऽअधि पूरुषः ।
स जातोऽअत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥५॥
तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥६॥
तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥७॥
तस्मादश्वाऽअजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥८॥
तं यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये ॥९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत्पुरुषँ॒व्यद॑धुः कति॒धा व्य॑कल्पयन् ।
मुखं॒ किम॑स्यासी॒त्किं बा॒हू किमू॒रू पादा॑ऽउच्येते ॥१०॥
ब्रा॒ह्म॒णो॑ऽस्य॒ मुख॑मासीद्बा॒हू रा॑ज॒न्यः॑ कृ॒तः ।
ऊ॒रू तद॑स्य॒ यद्वैश्यः॑ प॒द्भ्याᳪं शू॒द्रोऽअ॑जायत ॥११॥
च॒न्द्रमा॒ मन॑सो जा॒तश्चक्षोः॒ सूर्यो॑ऽअजायत ।
श्रोत्रा॑द्वा॒युश्च॑ प्रा॒णश्च॒ मुखा॑द॒ग्निर॑जायत ॥१२॥
नाभ्या॑ऽआसीद॒न्तरि॑क्षᳬ शी॒र्ष्णो द्यौः सम॑वर्तत ।
प॒द्भ्यां भूमि॒र्दिशः॒ श्रोत्रा॒त्तथा॑ लो॒काँ२ऽअ॑कल्पयन् ॥१३॥
यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञमत॑न्वत ।
व॒स॒न्तो॑ऽस्यासी॒दाज्यं॑ ग्री॒ष्मऽइ॒ध्मः श॒रद्ध॒विः ॥१४॥
स॒प्तास्या॑सन्परि॒धय॒स्त्रिः स॒प्त स॒मिधः॑ कृ॒ताः ।
दे॒वा यद्य॒ज्ञं त॑न्वा॒नाऽअब॑ध्न॒न्पुरु॑षं प॒शुम् ॥१५॥
य॒ज्ञेन॑ य॒ज्ञम॑यजन्त दे॒वास्तानि॒ धर्मा॑णि प्रथ॒मान्या॑सन् ।
ते ह॒ नाकं॑ महि॒मानः॑ सचन्त॒ यत्र॒ पूर्वे॑ सा॒ध्याः सन्ति॑ दे॒वाः ॥१६॥
॥२॥ अ॒द्भ्यः सम्भृ॑तः पृथि॒व्यै रसा॑च्च वि॒श्वक॑र्मणः॒ सम॑वर्त्त॒ताग्रे॑ ।
तस्य॒ त्वष्टा॑ वि॒दध॑द्रू॒पमे॑ति॒ तन्मर्त्य॑स्य दे॒वत्व॑मा॒जान॒मग्रे॑ ॥१७॥
वेदा॒हमे॒तं पुरु॑षं म॒हान्त॑मादि॒त्यव॑र्णं॒ तम॑सः॒ पु॒रस्ता॑त् ।
तमे॒व वि॑दि॒त्वाति॑ मृ॒त्युमे॑ति॒ नान्यः पन्था॑ विद्य॒तेऽय॑नाय ॥१८॥
प्र॒जाप॑तिश्चरति॒ गर्भे॑ऽअ॒न्तरजा॑यमानो बहु॒धा वि जा॑यते ।
तस्य॒ योनिं॒ परि॑ पश्यन्ति॒ धीरा॒स्तस्मि॑न्ह तस्थु॒र्भुव॑नानि॒ विश्वा॑ ॥१९॥
यो दे॒वेभ्य॑ऽआ॒तप॑ति॒ यो दे॒वानां॑ पु॒रोहि॑तः ।
पूर्वो॒ यो दे॒वेभ्यो॑ जा॒तो नमो॑ रु॒चाय॒ ब्राह्म॑ये ॥२०॥
रुचं॑ ब्रा॒ह्मं ज॒नय॑न्तो दे॒वाऽअग्रे॒ तद॑ब्रुवन् ।
यस्त्वै॒वं ब्रा॑ह्म॒णो वि॒द्यात्तस्य॑ दे॒वाऽअ॑स॒न्वशे॑ ॥२१॥
श्रीश्च॑ ते ल॒क्ष्मीश्च॒ पत्न्या॑वहोरा॒त्रे पा॒र्श्वे नक्ष॑त्राणि रू॒पम॒श्विनौ॒ व्यात्त॑म् ।
इ॒ष्णन्नि॑षाणा॒मुं म॑ऽइषाण सर्वलो॒कं म॑ऽइषाण ॥२२॥

इत्येकत्रिंशोऽध्यायः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ द्वात्रिंशोऽध्यायः

ऋषिः—स्वयम्भु ब्रह्म १—१२ । मेधाकामः १३—१५ । श्रीकामः १६ ॥

देवता—परमात्मा १, २, ६—८, १०—१२, १४ । हिरण्यगर्भः परमात्मा ३ । आत्मा ४ । परमेश्वरः ५ । विद्वान् ९ । इन्द्रः १३ । परमेश्वरविद्वांसौ १५ । विद्वद्राजानौ १६ ॥

छन्दः—अनुष्टुप् १, २, १६ । द्विपदा गायत्री ३ । भुरिक्त्रिष्टुप् ४, ५ । निचृत्त्रिष्टुप् ६, ८—११ । निचृच्छक्वरी ७ । त्रिष्टुप् १२ । भुरिग्गायत्री १३ । निचृदनुष्टुप् १४ । निचृद्बृहती १५ ॥

स्वरः—गान्धारः १, २, १४, १६ । षड्जः ३, १३ । धैवतः ४—१२ । मध्यमः १५ ॥

॥१॥ तदेवाग्निस्तदादित्त्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रन्तद्ब्रह्म ताऽआपः स प्प्रजापतिः ॥१॥
सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
नैनमूर्द्ध्वन्न तिर्य्यञ्चन्न मद्ध्ये परिजग्ग्रभत् ॥२॥
न तस्य प्प्रतिमाऽअस्त्ति यस्य नाम महद्यशः ॥३॥
एषो ह देवः प्प्रदिशोनु सर्व्वाः पूर्वो ह जातः सऽउ गर्ब्भेऽअन्तः ।
सऽएव जातः स जनिष्ष्यमाणः प्प्रत्यङ्जनास्त्तिष्ठति सर्वतोमुखः ॥४॥
यस्म्माज्जातन्न पुरा किञ्चनैव यऽआबभूव भुवनानि विश्श्वा ।
प्रजापतिः प्प्रजया सꣳरराणस्त्रीणि ज्ज्योतीꣳषि सचते स षोडशी ॥५॥
येन द्यौरुग्ग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः ।
योऽअन्तरिक्क्षे रजसो विमानः कस्म्मै देवाय हविषा विधेम ॥६॥
यङ्क्रन्दसीऽअवसा तस्त्तभानेऽअब्भ्यैक्क्षेताम्मनसा रेजमाने ।
यत्राधि सूरऽउदितो विभाति कस्म्मै देवाय हविषा विधेम ॥७॥

॥२॥ वेनस्तत्पश्श्यन्निहितङ्गुहा सद्यत्र विश्श्वम्भवत्येकनीडम् ।
तस्म्मिन्निदꣳ सञ्च वि चैति सर्वꣳ सऽओतः प्प्रोतश्च विभूः प्प्रजासु ॥८॥
प्र तद्वोचेदमृतन्नु विद्वान्गन्धर्वो धाम विभृतङ्गुहा सत् ।
त्रीणि पदानि निहिता गुहास्य यस्तानि वेद स पितुः पितासत् ॥९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवाऽअमृतमानशानास्तृतीये धामन्नध्यैरयन्त ॥१०॥
परीत्य भूतानि परीत्य लोकान्परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभिसंविवेश ॥११॥
परि द्यावापृथिवी सद्यऽइत्वा परि लोकान्परि दिशः परि स्वः ।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत् ॥१२॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषं स्वाहा ॥१३॥
यां मेधां देवगणाः पितरश्चोपासते ।
तया मामद्य मेधयाग्ने मेधाविनं कुरु स्वाहा ॥१४॥
मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥१५॥
इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम् ।
मयि देवा दधतु श्रियमुत्तमां तस्यै ते स्वाहा ॥१६॥

इति द्वात्रिंशोऽध्यायः

अथ त्रयस्त्रिंशोऽध्यायः

ऋषिः—वत्सप्रीः १ । विश्वरूपः २, ४ । गोतमः ३, १६ । कुत्सः ५, ६, २९, ३७, ३८, ४२, ६८ । विश्वामित्रः ७, ८, २२, २६, ६०, ६३, ७५ । भरद्वाजः ९, १३, ६१, ६९, ८४ । मेधातिथिः १०, ४५, ४६, ८१—८३, ९७ । पराशरः ११ । त्रिश्ववारा १२ । वसिष्ठः १४, १८, २०, ४४, ७०, ७१, ७६, ८८ । प्रस्कण्वः १५, ३१—३३, ३६ । सुशोधानाकः १७ । पुरुमीढाजमीढौ १९ । सुनीतिः २१ । सुचीकः २३ । त्रिशोकः २४ । मधुच्छन्दाः २५, ५६—५८ । अगस्त्यः २७, ३४, ७८, ७९ । विभ्राट् ३० । गौरीवितिः २८, ६४ । श्रुतकक्षसुकक्षौ ३५ । जमदग्निः ३९, ४०, ८५, ८७ । नृमेधः ४१, ६६, ६७, ९५, ९६ । हिरण्यस्तूपः ४३ । कुत्सीदिः ४७ । प्रतिक्षत्रः ४८ । वत्सारः ४९ । प्रगाथः ५० । कूर्मः५१ । सुशः ५२ । सुहोत्रः ५३, ७७, ९३ । वामदेवः ५४, ६५ । ऋजिश्वः ५५ । कुशिकः ५९ । देवलः ६२ । दक्षः ७२, ७३ । प्रजापतिः ७४ । बृहद्दिवः ८० । तापसः ८६ । कण्वः ८९ । त्रितः ९० । मनुः ९१, ९४ । मेधः ९२ ॥

देवता—अग्नयः १, २ । अग्निः ३—६, ९—१२, १५, १६ । विद्वांसः ७, ८, १४ । विश्वेदेवाः १३, ३९, ४७—४९, ५१—५४, ७७, ८१—८३, ८९, ९१, ९४ । सविता १७, २०, ३४, ६९, ८४ । इन्द्रः १८, २२—२९, ५९, ६३—६७, ७९, ९०, ९५, ९६ । इन्द्रवायू १९, ४५, ५६, ८६ । वेनः २१ । सूर्यः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

३०—३२, ३५—३८, ४०—४३, ७४ । विद्वान् ३३, ७२, ७५ । वायुः ४४, ५५, ७०, ८५ । वरुणः ४६ । महेन्द्रः ५०, ८०, ९७ । मित्रावरुणौ ५७,७१, ८७ । अश्विनौ ५८, ८८ । वैश्वानरः ६० ९२ । इन्द्राग्नी ६१, ७६, ९३ । सोमः ६२ । आदित्याः ६८ । अध्वर्यू ७३ । इन्द्रामरुतौ ७८ ॥

छन्दः—स्वराट्पङ्क्तिः १, ५, ७, १६, १८, ६८ । गायत्री २, ६, १९, ४५, ४६, ५६—५८, ६५, ७१, ७६। निचृद्गायत्री ३, ४, २०, २१, २४, २५, ३१—३३, ३५, ३६, ६१, ६२, ७२, ७३, ७७ ।भुरिक्-पङ्क्तिः ६, १३, २६, २८, ५९ । त्रिष्टुप् ८ । विराड्गायत्री १० । विराट्त्रिष्टुप् ११, २७ ४३, ७०, ७८ । निचृत्त्रिष्टुप् १२, २२, ४२, ४४, ४८, ५२, ५४ । अनुष्टुप् १४ । बृहती १५ । भुरिक्त्रिष्टुप् १७, २३, ६० । जगती २९ । विराड्जगती ३० । त्रिष्टुप् ३४, ३७, ३८, ५०,५१, ५३, ५५, ६३, ६४, ७४, ७९ । विराड्-बृहती ३९, ८५, ९१ । भुरिग्बृहती ४०, ९५ । निचृद्बृहती ४१, ८१, ८२, ८६—८८, ९०, ९२, ९६ । स्वराडार्ची गायत्री ४७ । निचृज्जगती ४९, ६९, ७५, ८४ । भुरिगनुष्टुप् ६६, ८९, ९३ । पङ्क्तिः ६७, ८०, ९४, । निचृत्सतःपङ्क्तिः ८३ । विराट् सतःपङ्क्तिः ९७ ॥

स्वरः—पञ्चमः १, ५—७, १३, १६, १८, २६, २८, ५९, ६७, ६८, ८०, ८३, ९४, ९७ । षड्जः २—४, ६, १०, १९—२१, २४, २५, ३१—३३, ३५, ३६, ४५—४७, ५६—५८, ६१, ६२, ६५, ७१—७३, ७६, ७७ । धैवतः ८, ११, १२, १७, २२, २३, २७, ३४, ३७, ३८, ४२—४४, ४८, ५०—५५, ६०, ६३, ६४, ७०, ७४, ७८, ७९ । गान्धारः १४, ६६, ८९, ९३ । मध्यमः १५, ३९—४१, ८१, ८२, ८५—८८, ९०—९२, ९५, ९६ । निषादः २९, ३०, ४९, ६९, ७५, ८४ ॥

॥१॥ अस्याजरासो दमामरित्राऽअर्चद्धूमासोऽअग्नयः पावकाः ।
श्वितीचयः श्वात्रासो भुरण्यवो वनर्षदो वायवो न सोमाः ॥१॥
हरयो धूमकेतवो वातजूताऽउप द्यवि । यतन्ते वृथगग्नयः ॥२॥
यजा नो मित्रावरुणा यजा देवाँ॥ऽऋतम्बृहत् । अग्ने यक्षि स्वन्दमम् ॥३॥
युक्ष्वा हि देवहूतमाँ॥ऽअश्वाँ॥ऽअग्ने रथीरिव ।
नि होता पूर्व्यः सदः ॥४॥
द्वे विरूपे चरतः स्वर्थेऽअन्यान्या वत्समुपधापयेते ।
हरिरन्यस्याम्भवति स्वधावाञ्छुक्रोऽअन्यस्यान्ददृशे सुवर्चाः ॥५॥
अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठोऽअध्वरेष्वीड्यः ।
यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रँविभ्वँविशेविशे ॥६॥
त्रीणि शता त्री सहस्राण्यग्निन्त्रिँशच्च देवा नव चासपर्यन् ।
औक्षन्घृतैरस्तृणन्बर्हिरस्माऽआदिद्धोतारन्न्यसादयन्त ॥७॥
मूर्द्धानन्दिवोऽअरतिम्पृथिव्या वैश्वानरमृतऽआ जातमग्निम् ।
कविँसम्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः ॥८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्रऽआहुतः ॥९॥
विश्वेभिः सोम्यम्मध्वग्नऽइन्द्रेण वायुना । पिबा मित्रस्य धामभिः ॥१०॥
आ यदिषे नृपतिन्तेजऽआनट्छुचि रेतो निषिक्तन्द्यौरभीके ।
अग्निः शर्द्धमनवद्यँय्युवानꣳ स्वाध्यञ्जनयत्सूदयच्च ॥११॥
अग्ने शर्द्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु ।
सञ्जास्पत्यꣳ सुयममाकृणुष्व शत्रूयतामभितिष्ठा महाꣳसि ॥१२॥
त्वाꣳ हि मन्द्रतममर्क्कशोकैर्ववृमहे महि नः श्रोष्यग्ने ।
इन्द्रन्न त्वा शवसा देवता वायुम्पृणन्ति राधसा नृतमाः ॥१३॥
त्वेऽअग्ने स्वाहुत प्रियासः सन्तु सूरयः ।
यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥१४॥
श्रुधि श्रुत्कर्ण्ण वह्निभिर्देवैरग्ने सयावभिः ।
आसीदन्तु बर्हिषि मित्रोऽअर्य्यमा प्रातर्य्यावाणोऽअध्वरम् ॥१५॥
विश्वेषामदितिर्य्यज्ञियानाँविश्वेषामतिथिर्म्मानुषाणाम् ।
अग्निर्देवानामवऽआवृणानः सुमृडीको भवतु जातवेदाः ॥१६॥
महोऽअग्नेः समिधानस्य शर्म्मण्यनागा मित्रे वरुणे स्वस्तये ।
श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवोऽअद्या वृणीमहे ॥१७॥

॥२॥ आपश्चित्पिप्यु स्तर्य्यो न गावो नक्षन्नृतञ्जरितारस्तऽइन्द्र ।
याहि वायुर्न्न नियुतो नोऽअच्छा त्वꣳ हि धीभिर्दयसे वि वाजान् ॥१८॥
गावऽउपावतावतम्मही यज्ञस्य रप्सुदा । उभा कर्ण्णा हिरण्यया ॥१९॥
यदद्य सूरऽउदितेनागा मित्रोऽअर्य्यमा । सुवाति सविता भगः ॥२०॥
आ सुते सिञ्चत श्रियꣳ रोदस्योरभिश्रियम् । रसा दधीत वृषभम् ॥२१॥
आतिष्ठन्तम्परि विश्वेऽअभूषञ्छ्रियो वसानश्चरति स्वरोचिः ।
महत्तद्वृष्ण्णोऽअसुरस्य नामा विश्वरूपोऽअमृतानि तस्थौ ॥२२॥
प्र वो महे मन्दमानायान्धसोर्च्चा विश्वानराय विश्वाभुवे ।
इन्द्रस्य यस्य सुमखꣳ सहो महि श्रवो नृम्णञ्च रोदसी सपर्य्यतः ॥२३॥
बृहन्निदिध्मऽएषाम्भूरि शस्तम्पृथुः स्वरुः । येषामिन्द्रो युवा सखा ॥२४॥
इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः । महाँ२॥ऽअभिष्टिरोजसा ॥२५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्रो वृत्रमवृणोच्छर्द्धनीतिः प्र मायिनाममिनाद्वर्प्पणीतिः ।
अहन्व्यꣳसमुशधग्वनेष्वाविर्द्धेनाऽअकृणोद्राम्म्याणाम् ॥२६॥
कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किन्तऽइत्था ।
सम्पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्तेऽअस्मे ॥२७॥
आ तत्तऽइन्द्रायवः पनन्ताभि यऽऊर्वङ्गोमन्तन्तितृत्सान् ।
सकृत्स्वँय्ये पुरुपुत्राम्महीꣳ सहस्रधाराम्बृहतीन्दुदुक्षन् ॥२८॥
इमान्ते धियम्प्रभरे महो महीमस्य स्तोत्रे धिषणा यत्तऽआनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रन्देवासः शवसामदन्ननु ॥२९॥

॥३॥ विभ्राड्बृहत्पिबतु सोम्म्यम्मध्वायुर्द्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो योऽअभिरक्षति त्मना प्रजाः पुपोष पुरुधा विराजति ॥३०॥
उदु त्यञ्जातवेदसन्देवँवहन्ति केतवः । दृशे विश्श्वाय सूर्य्यम् ॥३१॥
येना पावक चक्षसा भुरण्यन्तञ्जनाँ२॥ऽअनु । त्वँवरुण पश्श्यसि ॥३२॥
दैव्यावध्वर्य्यूऽआगतꣳ रथेन सूर्य्यत्वचा । मध्वा यज्ञꣳ समञ्जाथे ॥३३॥
आ नऽइडाभिर्विदथे सुशस्ति विश्श्वानरः सविता देवऽएतु ।
अपि यथा युवानो मत्सथा नो विश्श्वञ्जगदभिपित्वे मनीषा ॥३४॥
यदद्य कच्च वृत्रहन्नुदगाऽअभि सूर्य्य । सर्व्वन्तदिन्द्र ते वशे ॥३५॥
तरणिर्व्विश्श्वदर्शतो ज्योतिष्कृदसि सूर्य्य । विश्श्वमाभासि रोचनम् ॥३६॥
तत्सूर्य्यस्य देवत्वन्तन्महित्त्वम्मध्या कर्त्तोर्व्विततꣳ सञ्जभार ।
यदेदयुक्त हरितः सधस्त्थादाद्रात्री वासस्तनुते सिमस्मै ॥३७॥
तन्मित्रस्य वरुणस्याभिचक्षे सूर्य्यो रूपङ्कृणुते द्योरुपस्त्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥३८॥
बण्महाँ२॥ऽअसि सूर्य्य बडादित्त्य महाँ२॥ऽअसि ।
महस्ते सतो महिमा पनस्यतेद्धा देव महाँ२॥ऽअसि ॥३९॥
बट्सूर्य्य श्श्रवसा महाँ२॥ऽअसि सत्रा देव महाँ२॥ऽअसि ।
मह्ना देवानामसुर्य्यः पुरोहितो विभु ज्योतिरदाब्भ्यम् ॥४०॥
श्रायन्तऽइव सूर्य्यँविश्श्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमानऽओजसा प्रति भागन्न दीधिम ॥४१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अद्या देवाऽउदिता सूर्यस्य निरꣳहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउत द्यौः ॥४२॥
आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्श्यन् ॥४३॥
॥४॥ प्रवावृजे सुप्प्रया बर्हिरेषामा विश्पतीव बीरिटऽइयाते ।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्त्तये नियुत्त्वान् ॥४४॥
इन्द्रवायू बृहस्पतिम्मित्राग्निम्पूषणम्भगम् । आदित्त्यान्मारुतङ्गणम् ॥४५॥
वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतान्नः सुराधसः ॥४६॥
अधि नऽइन्द्रैषाँव्विष्णो सजात्त्यानाम् । इता मरुतोऽअश्विना ॥४७॥
अग्नऽइन्द्र वरुण मित्र देवाः शर्द्धः प्रयन्त मारुतोत विष्णो ।
उभा नासत्त्या रुद्रोऽअध ग्नाः पूषा भगः सरस्वती जुषन्त ॥४८॥
इन्द्राग्नी मित्रावरुणादितिꣳ स्वः पृथिवीन्द्याम्मरुतः पर्वताँ२॥ऽअपः ।
हुवे विष्णुम्पूषणम्ब्रह्मणस्पतिम्भगन्नु शꣳसꣳ सवितारमूतये ॥४९॥
अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्त्ये भरहूतौ सजोषाः ।
यः शꣳसते स्तुवते धायि पज्रऽइन्द्रज्ज्येष्ठाऽअस्माँ२॥ऽअवन्तु देवाः ॥५०॥
अर्वाञ्चोऽअद्या भवता यजत्राऽआ वो हार्दि भयमानो व्ययेयम् ।
त्राद्ध्वन्नो देवा निजुरो वृकस्य त्राद्ध्वङ्कर्त्तादवपदो यजत्राः ॥५१॥
विश्वेऽअद्य मरुतो विश्वऽऊती विश्वे भवन्त्वग्नयः समिद्धाः ।
विश्वे नो देवाऽअवसागमन्तु विश्वमस्तु द्रविणँव्वाजोऽअस्मे ॥५२॥
विश्वे देवाः शृणुतेमꣳ हवम्मे येऽअन्तरिक्षे यऽउप द्यवि ष्ठ ।
येऽअग्निजिह्वाऽउत वा यजत्राऽआसद्यास्मिन्बर्हिषि मादयद्ध्वम् ॥५३॥
देवेभ्यो हि प्रथमँय्यज्ञियेभ्योमृतत्त्वꣳ सुवसि भागमुत्तमम् ।
आदिद्दामानꣳ सवितर्व्यूर्णुषेनूचीना जीविता मानुषेभ्यः ॥५४॥
॥५॥ प्र वायुमच्छा बृहती मनीषा बृहद्रयिँव्विश्ववारꣳ रथप्राम् ।
द्युतद्यामा नियुतः पत्त्यमानः कविः कविमियक्षसि प्रयज्यो ॥५५॥
इन्द्रवायूऽइमे सुताऽउप प्रयोभिरागतम् । इन्दवो वामुशन्ति हि ॥५६॥
मित्रꣳ हुवे पूतदक्षँव्वरुणञ्च रिशादसम् । धियङ्घृताचीꣳ साधन्ता ॥५७॥
दस्रा युवाकवः सुता नासत्त्या वृक्तबर्हिषः । आयातꣳ रुद्रवर्त्तनी ॥५८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विदद्यदी सरमा रुग्णमद्रेर्म्महि पाथः पूर्व्यᳬ सद्ध्र्यक्कः ।
अग्ग्रन्नयत्सुपद्यक्षराणामच्छा रवम्प्रथमा जानती गात् ॥५९॥
नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात्पुरऽएतारमग्नेः ।
एमेनमवृधन्नमृताऽअमर्त्त्यँवैश्वानरङ्क्षेत्रजित्याय देवाः ॥६०॥
उग्रा विघनिना मृधऽइन्द्राग्नी हवामहे । ता नो मृडातऽईदृशे ॥६१॥
उपास्मै गायता नरः पवमानायेन्दवे । अभि देवाँ२ऽइयक्षते ॥६२॥
ये त्वाहिहत्ये मघवन्नवर्द्धन्ये शाम्बरे हरिवो ये गविष्टौ ।
ये त्वा नूनमनुमदन्ति विप्राः पिबेन्द्र सोमᳬ सगणो मरुद्भिः ॥६३॥
जनिष्ठाऽउग्रः सहसे तुराय मन्द्रऽओजिष्ठो बहुलाभिमानः ।
अवर्द्धन्निन्द्रम्मरुतश्चिदत्र माता यद्वीरन्दधनद्धनिष्ठा ॥६४॥
आ तू नऽइन्द्र वृत्रहन्नस्माकमर्द्धमागहि । महान्महीभिरूतिभिः ॥६५॥
त्वमिन्द्र प्रतूर्त्तिष्वभि विश्वाऽअसि स्पृधः ।
अशस्तिहा जनिता विश्वतूरसि त्वन्तूर्य्य तरुष्यतः ॥६६॥
अनु ते शुष्मन्तुरयन्तमीयतुः क्षोणी शिशुन्न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रँय्यदिन्द्र तूर्वसि ॥६७॥
यज्ञो देवानाम्प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः ।
आ वोर्वाची सुमतिर्व्ववृत्यादᳬहोश्चिद्या वरिवोवित्तरासत् ॥६८॥
अदब्धेभिः सवितः पायुभिष्ट्वᳬ शिवेभिरद्य परिपाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्न्नोऽअघशᳬसऽईशत ॥६९॥

॥६॥ प्रवीरया शुचयो दद्रिरे वामद्ध्वर्य्युभिर्म्मधुमन्तः सुतासः ।
वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥७०॥
गावऽउपावतावतम्मही यज्ञस्य रप्सुदा । उभा कर्णा हिरण्ययया ॥७१॥
काव्ययोराजानेषु क्रत्वा दक्षस्य दुरोणे । रिशादसा सधस्थऽआ ॥७२॥
दैव्यावद्ध्वर्य्यूऽआगतᳬ रथेन सूर्य्यत्वचा । मद्ध्वा यज्ञᳬ समञ्जाथे ॥७३॥
तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त् ।
रेतोधाऽआसन्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिः पुरस्तात् ॥७४॥
आ रोदसीऽअपृणदा स्वर्म्महज्जातँय्यदेनमपसोऽअधारयन् ।
सोऽअद्ध्वराय परिणीयते कविरत्यो न वाजसातये चनोहितः ॥७५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा । आङ्गूषैराविवासतः ॥७६॥
उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये । सुमृडीका भवन्तु नः ॥७७॥
ब्रह्माणि मे मतयः शꣳ सुतासः शुष्म इयर्त्ति प्रभृतो मेऽअद्रिः ।
आशासते प्रतिहर्य्यन्त्युक्थेमा हरी वहतस्ता नोऽअच्छ ॥७८॥
अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ२ऽअस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥७९॥
तदिदास भुवनेषु ज्येष्ठं यतो जज्ञऽउग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो निरिणाति शत्रूननु यं विश्वे मदन्त्यूमाः ॥८०॥
इमाऽउ त्वा पुरूवसो गिरो वर्द्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोभि स्तोमैरनूषत ॥८१॥
यस्यायं विश्वऽआर्य्यो दासः शेवधिपाऽअरिः ।
तिरश्चिदर्य्ये रुशमे पवीरवि तुभ्येत्सोऽअज्यते रयिः ॥८२॥
अयꣳ सहस्रमृषिभिः सहस्कृतः समुद्रऽइव पप्रथे ।
सत्यः सोऽअस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥८३॥
अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परिपाहि नो गयम् ।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नोऽअघशꣳसऽईशत ॥८४॥

७॥ आ नो यज्ञन्दिविस्पृशं वायो याहि सुमन्मभिः ।
अन्तः पवित्रऽउपरि श्रीणानोयꣳ शुक्रोऽअयामि ते ॥८५॥
इन्द्रवायू सुसन्दृशा सुहवेह हवामहे ।
यथा नः सर्व्वऽइज्जनोनमीवः सङ्गमे सुमनाऽअसत् ॥८६॥
ऋधगित्था स मर्त्त्यः शशमे देवतातये ।
यो नूनम्मित्रावरुणावभिष्टयऽआचक्रे हव्यदातये ॥८७॥
आयातमुपभूषतम्मध्वः पिबतमश्विना ।
दुग्धम्पयो वृषणा जेन्यावसू मा नो मर्द्धिष्टमागतम् ॥८८॥
प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता ।
अच्छा वीरन्नर्य्यम्पङ्क्तिराधसन्देवा यज्ञन्नयन्तु नः ॥८९॥
चन्द्रमाऽअप्स्वन्तरा सुपर्णो धावते दिवि ।
रयिम्पिशङ्गम्बहुलम्पुरुस्पृहꣳ हरिरेति कनिक्रदत् ॥९०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवन्देवँवोवसे देवन्देवमुभिष्टये ।
देवन्देवꣳ हुवेम वाजसातये गृणन्तो देव्या धिया ॥९१॥
दिवि पृष्टोऽअरोचताग्निर्वैश्वानुरो बृहन् ।
क्ष्मया वृधानऽओजसा चनोहितो ज्योतिषा बाधते तमः ॥९२॥
इन्द्राग्नीऽअपादियम्पूर्वागात्पद्वतीभ्यः ।
हित्वी शिरो जिह्वया वावदच्चरत्त्रिꣳशत्पदान्यक्रमीत् ॥९३॥
देवासो हि ष्मा मनवे समन्यवो विश्वे साकꣳ सरातयः ।
ते नोऽअद्य तेऽअपरन्तुचे तु नो भवन्तु वरिवोविदः ॥९४॥
अपाधमदभिशस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत् ।
देवास्तऽइन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ॥९५॥
प्र वऽइन्द्राय बृहते मरुतो ब्रह्मार्चत ।
वृत्रꣳ हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥९६॥
अस्येदिन्द्रो वावृधे वृष्ण्यꣳ शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवोनुष्टुवन्ति पूर्वथा ॥९७॥

इति त्रयस्त्रिंशोऽध्यायः

अथ चतुस्त्रिंशोऽध्यायः

ऋषिः—शिवसङ्कल्पः १—६। अगस्त्यः ७—६, ४८। गृत्समदः १०, ११, ५८। हिरण्यस्तूप आङ्गिरसः १२, १३, २४—२७। देवश्रवदेववातौ भारतौ १४, १५, १८, १९। नोधाः १६, १७। गोतमः २०—२३, ३३। प्रस्कण्वः २८। कुत्सः २९, ३०, ३२। हिरण्यस्तूपः ३१, ४७। वसिष्ठः ३४—४०। सुहोत्रः ४१। ऋजिश्वः ४२, ५३। मेधातिथिः ४३, ४४। भरद्वाजः ४५। विहव्यः ४६। प्राजापत्यो यज्ञः ४९। दक्षः ५०—५२। कूर्मः गार्त्समदः ५४। कण्वः ५५—५७॥

देवता—मनः १—६। अन्नम् ७। अनुमतिः ८, ९। सिनीवाली १०। सरस्वती ११। अग्निः १२—१५। इन्द्रः १६—१९। सोमः २०—२३। सविता २४—२७। अश्विनौ २८—३०, ४७। सूर्यः ३१। रात्रिः ३२। उषः ३३। अग्न्यादयो लिङ्गोक्ताः ३४। भगः ३५, ३७, ३९। भगवान् ३६, ३८। उषा ४०। पूषा ४१, ४२। विष्णुः ४३, ४४। द्यावापृथिव्यौ ४५। लिङ्गोक्ताः ४६, ५३। मरुतः ४८। ऋषयः ४९। हिरण्यन्तेजः ५०—५२। आदित्याः ५४। अध्यात्मं प्राणाः ५५। ब्रह्मणस्पतिः ५६—५८॥

छन्दः—विराट्त्रिष्टुप् १, १६, २६, २७, २९, ३१, ४२। त्रिष्टुप् २, ४, ५, १३, १४, ३०, ३९, ४९। स्वराट्त्रिष्टुप् ३, ६। उष्णिक् ७। निचृदनुष्टुप् ८, ९, ११। अनुष्टुप् १०। विराड्जगती १२। विराड-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नुष्टुप् १५ । निचृत्त्रिष्टुप् १७—२०, २३, ३५, ३६, ३८, ४०, ५२, ५४, ५८ । भुरिक्पङ्क्तिः २१, २४, ५३ । विराट्पङ्क्तिः २२ । निचृज्जगती २५, ३४, ४५ । निचृद्गायत्री २८, ४३ । पथ्याबृहती ३२ । निचृत्पुरोष्णिक् ३३ । पङ्क्तिः ३७, ४८ । गायत्री ४१; ४४ । भुरिक्त्रिष्टुप् ४६ । जगती ४७ । भुरिगुष्णिक् ५० । भुरिक्छक्वरी ५१ । भुरिग्जगती ५५ । निचृद्बृहती ५६ । विराड्बृहती ५७ ॥

स्वरः—धैवतः १—६, १३, १४, १६—२०, २३, २६, २७, २९—३१, ३५, ३६, ३८—४०, ४२, ४६, ४९, ५१, ५२, ५४, ५८ । ऋषभः ७, ३३, ५० । गान्धारः ८—११, १५ । निषादः १२, २५, ३४, ४५, ४७, ५५ । पञ्चमः २१, २२, २४, ३७, ४८, ५३ । षड्जः २८, ४१, ४३, ४४ । मध्यमः ३२, ५६, ५७ ॥

॥१॥ यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवैति ।
दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मे मनः शिवसङ्कल्पमस्तु ॥१॥
येन कर्म्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वंय्यक्षमन्तः प्प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥२॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु ।
यस्म्मान्नऽऋते किञ्चन कर्म्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥३॥
येनेदम्भूतम्भुवनम्भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥४॥
यस्मिन्नृचः साम यजूꣳषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिँश्चित्तꣳ सर्वमोतम्प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥५॥
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिनऽइव ।
हृत्प्रतिष्ठंय्यदजिरञ्जविष्ठन्तन्मे मनः शिवसङ्कल्पमस्तु ॥६॥
पितुन्नु स्तोषम्महो धर्म्माणन्तविषीम् ।
यस्य त्रितो व्योजसा वृत्रंविपर्वमर्दयत् ॥७॥
अन्विदनुमते त्वम्मन्यासै शञ्च नस्कृधि ।
क्रत्वे दक्षाय नो हिनु प्र णऽआयूꣳषि तारिषः ॥८॥
अनु नोऽद्यानुमतिर्य्यज्ञन्देवेषु मन्यताम् ।
अग्निश्च हव्यवाहनो भवतन्दाशुषे मयः ॥९॥
सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्यमाहुतम्प्रजान्देवि दिदिड्ढि नः ॥१०॥

॥२॥ पञ्च नद्यः सरस्वतीमपियन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥११॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वमग्ग्ने प्प्रथमोऽअङ्गिराऽऋषिर्द्देवो देवानामभवः शिवः सखा ।
तव व्व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥१२॥
त्वन्नोऽअग्ग्ने तव देव पायुभिर्म्मघोनो रक्क्ष तन्न्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्क्षमाणस्तव व्व्रते ॥१३॥
उत्तानायामवभरा चिकित्त्वान्त्सद्यः प्प्रवीता वृषणञ्जजान ।
अरुषस्तूपो रुशदस्य पाजऽइडायास्प्पुत्रो वयुनेऽजनिष्ट ॥१४॥
इडायास्त्वा पदे वयन्नाभा पृथिव्व्याऽअधि ।
जातवेदो निधीमह्यग्ग्ने हव्व्याय वोढवे ॥१५॥
प्रमन्महे शवसानाय शूषमाङ्गूषङ्गिर्व्वणसेऽअङ्गिरस्वत् ।
सुवृक्तिभि स्तुवतऽऋग्ग्मियायार्च्चामार्क्कन्नरे विश्श्रुताय ॥१६॥
प्र वो महे महि नमो भरद्ध्वमाङ्गूष्ष्यꣳ शवसानाय साम ।
येना नः पूर्व्वे पितरः पदज्ज्ञाऽअर्च्चन्तोऽअङ्गिरसो गाऽअविन्दन् ॥१७॥
इच्छन्ति त्वा सोम्म्यासः सखायः सुन्न्वन्ति सोमन्दधति प्प्रयाꣳसि ।
तितिक्क्षन्तेऽअभिशस्तिञ्जनानामिन्द्र त्वदा कश्चन हि प्प्रकेतः ॥१८॥
न ते दूरे परमा चिद्रजाꣳस्या तु प्प्रयाहि हरिवो हरिब्भ्याम् ।
स्थिराय वृष्ष्णे सवना कृतेमा युक्ता ग्ग्रावाणः समिधानेऽअग्ग्नौ ॥१९॥
अषाढँय्युत्सु पृतनासु पप्प्रिꣳ स्वर्षामप्प्साँवृजनस्य गोपाम् ।
भरेषुजाꣳ सुक्क्षितिꣳ सुश्श्रवसञ्जयन्तन्त्वामनुमदेम सोम ॥२०॥
॥३॥ सोमो धेनुꣳ सोमोऽअर्व्वन्तमाशुꣳ सोमो वीरङ्कर्म्मण्ण्यन्ददाति ।
सादन्न्यँव्विदत्थ्यꣳ सभेयम्पितृश्श्रवणँय्यो ददाशदस्म्मै ॥२१॥
त्वमिमाऽओषधीः सोम विश्श्वास्त्वमपोऽअजनयस्त्वङ्गाः ।
त्वमाततन्थोर्व्वन्तरिक्क्षन्त्वञ्ज्योतिषा वि तमो ववर्त्थ ॥२२॥
देवेन नो मनसा देव सोम रायो भागꣳ सहसावन्नभियुद्ध्य ।
मा त्वातनदीशिषे वीर्य्यस्योभयेब्भ्यः प्प्रचिकित्त्सा गविष्ष्टौ ॥२३॥
अष्ष्टौ व्व्यक्ख्यत्ककुभः पृथिव्व्यास्त्री धन्न्व योजना सप्प्त सिन्धून् ।
हिरण्ण्याक्षः सविता देवऽआगाद्दधद्रत्ना दाशुषे वार्य्याणि ॥२४॥
हिरण्ण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवीऽअन्तरीयते ।
अपामीवाम्बाधते वेति सूर्य्यमभि कृष्ष्णेन रजसा द्यामृणोति ॥२५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हिरण्यहस्तोऽअसुरः सुनीथः सुमृडीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्प्रतिदोषङ्गृणानः ॥२६॥
ये ते पन्थाः सवितः पूर्व्यासोरेणवः सुकृताऽअन्तरिक्षे ।
तेभिर्नोऽअद्य पथिभिः सुगेभी रक्षा च नोऽअधि च ब्रूहि देव ॥२७॥
उभा पिबतमश्विनोभा नः शर्म्म यच्छतम् । अविद्रियाभिरूतिभिः ॥२८॥
अप्नस्वतीमश्विना वाचमस्म्मे कृतन्नो दस्रा वृषणा मनीषाम् ।
अद्यूत्त्येवसे निह्वये वाँवृधे च नो भवतँवाजसातौ ॥२९॥
द्युभिरक्तुभिः परिपातमस्म्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवीऽउत द्यौः ॥३०॥

॥४॥ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥३१॥
आ रात्रि पार्थिवꣳ रजः पितुरप्प्रायि धामभिः ।
